सर्वेषां सुखबोधार्थं मायूराप्पयदीक्षितः ।
हेमाद्रिमाधवीयादिप्रायश्चित्तविनिर्णयम् ॥
अनुसृत्य यथाशास्त्रं यथामति सयुक्तिकम् ।
इति कर्तव्यतामाह प्रायश्चित्ते महत्तराम् ॥
यद्यदाचरितव्यन्तत् कर्म साङ्गं समाचरेत् ।
अङ्गहीनन्तु यत्कर्म तदापदि विनिर्दिशेत् ॥
अन्यथा क्रियमाणन्तु निष्फलं स्यान्न संशयः ।
एकस्य कर्मणो मध्ये यदङ्गस्य च विस्मृतिः ॥
तदारभ्यैव तत्कर्म यथावत्पुनराचरेत् ।
समाप्तश्चेदङ्गिकर्म विस्मृताङ्गस्मृतौ तदा ॥
पुनरङ्गि न कर्तव्यं कृष्णानुस्मरणं स्मृतम् ।

End :

शास्त्रेषु निष्कृतिरपि ब्रह्महन्तुः श्रुतीरिता ॥
स्त्रीं त्यक्तुरकृतप्रायश्चित्तिनः क्वापि नास्ति हि
शास्त्रेषु घटसंस्कारं भार्यासन्त्यागिनो यथा ॥

न कुर्युर्यदि वा लोभात् यद्वा क्रोधादिभिस्तथा ।
पातित्यं सम्भवत्येषां तस्मात्कुर्याद्विधानतः ॥
एकोदराणां भिन्नानां यद्येकः पतितो भवेत् ।
तदनुप्रभवो वापि अग्रजः पतितस्य वा ॥
शास्त्रोक्तेनैव मार्गेण घटसंस्कारमाचरेत् ।
ततः पतितसम्बन्धः नेतरेषां कदा भवेत् ॥

Colophon :

इति शौनकोक्तघटसंस्कारप्रायश्चित्तविधिस्समाप्तः ॥

No. **3485.** प्रायश्चित्तविषयः.

PRĀYAŚCITTAVIṢAYAḤ

Pages, 8. Lines, 7 on a page.

Begins on fol. 43*a* of the MS. described under No. 2632.

On the same subject as that of the above.

Beginning :

जम्बुनाथसभाधीशपण्डितीयप्रायश्चित्तपद्धतौ—
हेमाद्रिमाधवीयादौ पापानामपनोदकम् ।
प्रायश्चित्तं तु सामान्याद्वर्षान्तं परिकीर्तितम् ॥
ततः परं न कथितं कारणं तत्र किं वद ।
इति नारायणो योगी दू(दु)र्वाससमपृच्छत ॥
नारायणः—
दुर्मांसभक्षणेनैव दुस्संसर्गविशेषतः ।
दुष्कृत्यशतसाहस्रैः दुराचारसहस्रतः ॥

End :

ब्राह्मणः पूर्ववच्छुद्धो जायते स्फटिकोपमः ।
स्वकर्मपरकर्मार्हो जायते तदनन्तरम् ॥

Colophon :

इति नारायणादिस्मृतिषु अत्यन्तत(द्र)व्यसाध्यस्वकर्मपरकर्मार्हप्रायश्चित्तविधानं भवति ॥

No. **3486.** प्रायश्चित्तविषयः.

PRĀYAŚCITTAVIṢAYAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 48*a* of the MS. described under No. 2824.

On certain expiatory rites. Contains Gandharvanaṣṭaprāyaścittam, Praṇītāskannaprāyaścittam and Jvaravidhiḥ.

Beginning :

प्रोक्षिता(क्षण्या)दीनि पात्राणि प्रोक्षिता प्रोक्षिता(क्षणी) जलैः ।
प्रणीतामो(प्रो)क्षपर्यन्तं न स्पृशेत्तु कदाचन ॥
छिन्ने भिन्नेऽपि नष्टे वा दग्ध(ग्धे)गन्धर्वनामके ।
तन्तुमत्या घृते सूक्तैः स(ह्व)ग्नौ शान्तिस्तदाचरेत् ॥

* * * *

गन्धर्वमन्त्रैर्यथालिङ्गं प्रकल्प्य दण्डो गन्धलिप्तो यथा पुरस्तात् । यदि प्रणीताः स्कन्देयुरुपदस्येयुर्वा आपो हि ष्ठा मयो भुव इति तिसृभिः पुनर्गृहीतत्वम् ।

End :

अथवा फलीकरणमिश्रैर्ज्वरगायत्र्या तर्पणङ्कुर्यात् ।
भस्मायुधाय विद्महे एकदंष्ट्राय धीमहि ।
तन्नो ज्वरः प्रचोदयात् ॥

* * * *

मेखलाजिनकर्माणि तावदश्मानमाचरेत् ।
प्रत्यगाशिषमात्राणां भवेद्वाचनमेव च ॥

औपनायनिके शेषे कर्मण्युत्तरतो वटुः ।
यावद्ब्रह्मोपदेशस्तु तावद्दक्षिणतो वटुः ॥
मौञ्जीकर्मावसाने तु आमभैक्षं समाचरेत् ।
अन्वहं पक्कमेव स्यादा समावर्तनाद्वटुः ॥

* * * *

अज्ञात्वा चेद्विशेद्ग्रामं प्रमादाद्बुद्धिपूर्वकम् ।
त्रिरात्रेण विशुद्धिस्स्यादा मध्याह्नाद्विशुध्यते ॥

No. **3487.** प्रायश्चित्तशतद्वयी—सव्याख्या.

PRĀYAŚCITTAŚATADVAYĪ WITH COMMENTARY.

Substance, palm-leaf. Size, 15 × 1½ inches. Pages, 128. Lines, 8 on a page. Character, Grantha. Condition, good. Appearance, old.

A work on expiatory ceremonies consisting of 200 Ślōkas, with a commentary by Veṅkaṭēśa.

Complete in 4 Prakaraṇas.

Extracts—same as those of No. 1077.

No. **3488.** प्रायश्चित्तसारावलिः.

PRĀYAŚCITTASĀRĀVALIḤ.

Pages, 18. Lines, 6 on a page.

Begins on fol. 11*b* of the MS. described under No. 2632.

Adhyāyas 1 to 4 complete.

A portion of Bṛhannāradapurāṇa.

Also deals with expiatory ceremonies.

Beginning :

बृहन्नारदीये उत्तरभागे प्रायश्चित्तप्रकरणे शुनश्शेफः—
भगवन्मुनिशार्दूल सर्वज्ञ करुणानिधे ।

सर्वलोकहितार्थाय कलिकाले विशेषतः ॥
तपोभिः कर्मभिर्हीने ब्राह्मण्यं केन वर्तते ।
वदस्व तपतां श्रेष्ठ वात्सल्यान्मयि विश्वदृक् ॥

नारदः—

शृणुष्व तपतां श्रेष्ठ गुह्यमेतद्वदामि ते ।
पृष्टमेतत्पुरावृत्तं शङ्करेण महात्मना ॥
पितामहः प्रजास्रष्टा शङ्करं प्रति सादरम् ।
कलिवृत्तान्तमध्ये तु सर्वेषां हितकाम्यया ॥

पितामहः—

तपस्स्वाध्यायहीनोऽपि सर्वयज्ञविवर्जितः ।
ब्राह्मण्यं श्राद्धसन्धि(न्ध्या)भ्यां परं प्राप्नोति वै द्विजः ॥
ततो द्विजातिसंस्कारात् ब्राह्मण्यं सम्प्रवर्तते ।

End :

कलौ शास्त्रनिषिद्धत्वात् सेतु(स्नानं) दिनेदिने ॥
स्नानं त्रिवर्षपर्यन्तं कृत्वा भ्रूगर्भमोचनम् ।
गोगर्भे वटगर्भे च कृत्वा शुद्धिमवाप्नुयात् ॥

Colophon :

इति प्रायश्चित्तसारावल्यां ब्रह्मनारदोत्तरे ब्रह्मरुद्रसंवादे वर्णसाङ्कर्यप्रायश्चित्तं नाम प्रथमोऽध्यायः ॥

End :

भोजयेद्द्विप्रमुख्यांस्तु नारायणबलिक्रमात् ।
आमेन हेम्ना वा कृत्वा नारायणबलिं ततः ॥
ब्राह्मणान् भोजयेत् पश्चात् यथाशक्ति यथाविधि ।
अकृत्वा घटसंस्कारं पितृश्राद्धं करोति चेत् ॥

पितरस्तु पिशाचत्वं प्राप्नुवन्ति न संशयः ।
तस्माद्धटप्रहारेण त्यागं कृत्वा तु दुश्चरीम् ॥
विधवां विधवाजातां स्वजातामन्यजातितः ।
लघुसौदर्शनिं कृत्वा शुद्धिमाप्नोत्यसंशयः(म्) ॥

Colophon:

इति प्रायश्चित्तसारावल्यां ब्रह्मरुद्रसंवादे ब्रह्मनारदोत्तरे दुश्चरीविधवाविधवाजाताविवाहे घटस्फोटनविधिर्नाम चतुर्थोऽध्यायः ॥

No. **3489.** प्रायश्चित्तसारावलिः.

PRĀYAŚCITTASĀRAVALIḤ.

Substance, palm-leaf. Size, 12½ × 1¼ inches. Pages, 19. Lines, 5 on a page. Character, Grantha. Condition, much injured. Appearance, new.

Contains 2 Adhyāyas on the expiatory ceremony to be performed in cases of the intermingling of castes. Has an index of 7 pages at the end.

No. **3490.** प्रायश्चित्तसुधानिधिः.

PRĀYAŚCITTASUDHĀNIDHIḤ.

Pages, 153. Lines, 7 on a page.

Begins on fol. 55*a* of the MS. described under No. 2117.

A work on expiatory ceremonies, by Sāyaṇācārya, son of Māyaṇa.

Breaks off in Prakaraṇoktaniṣkādiparimāṇa.

Beginning:

दद्याद्दन्तिमुखो यस्य लीलयार्थान्त(योर्ध्वाण्ड)खण्डने ।
नवाङ्कुरवदाभाति दन्ताग्रं तद्बहिर्गतम् ॥

चिदानन्दकलां वाणीं वन्दे चन्द्रकलावतीम् ।
नैर्मल्यतारतम्येन बिम्बितां चित्र(त्त)भित्तिषु ॥

अस्ति श्रीसङ्गमक्ष्मापः पृथ्वीतलपुरन्दरः ।
यत्कीर्तिमौक्तिकादर्शे त्रैलोक्यं प्रतिबिम्बते ॥

यश(:)क्ष(क्षी)राहुतीकृत्य यत्प्रतापहुताशने ।
परे यान्ति पदं दिव्यं राजानो रणदीक्षिताः ॥

तूर्णं कर्णान्तिके प्राप्ते यत्प्रतापधनञ्जये ।
पुरो निधाय गाङ्गेयं स्वात्मा नं(सं)रक्ष(क्ष्य)ते परे(रैः) ॥

(त)स्य मन्त्रिशिरोरत्नमस्ति मायन(ण)सायन(ण): ।
यः ख्यातिं रत्नगर्भेति यथार्थयति पार्थिव(वी)म् ॥

यत्कीर्तौ जाह्नवीस्फूर्तौ कीर्त्या विद्विषतामपि ।
कळिन्दनन्दिनीना(का)न्तिस्स्पर्धयेव प्रपद्यते ॥

येन निर्म(र्मी)यते नित्यं धनैरायोधनैरपि ।
श्रेयसे यशसे दानं विदुषां विद्विषामपि ॥

न ध्यानं न क्रतुर्नार्चा न समाधिर्न वा जपः ।
मन्त्रसिद्धौ फलं यस्य मतिरेव महीयसी ॥

तेन मायणपुत्रेण सांयुगे(सायणे)न मनीषिणा ।
ग्रन्थः कर्मविपाकाख्यः क्रियते करुणावता ॥

कृतानां विविधानाञ्च ज्ञानतोऽज्ञानतोऽपि वा ।
इह रोगनिदानानां कर्मणां निष्कृतिं ब्रुवे ॥

अयुक्तमिव मे भाति न त्वेतदुपपादनम् ।
(अनारब्धफलेषु स्यात्) अना(समा)रब्धभवे(फले)षु वा ॥

नैतदाद्येषु युज्येत लिङ्गस्यादर्शनादिह ।
प्रायश्चित्तस्य भूयस्त्वात् अपि स्मृत्यन्तरोदितात् ॥
तथैव न द्वितीयेषु वैयासकिविरोधितः ।
तत्रानारब्धकार्याणां ब्रह्मज्ञाने च सत्यपि ॥
दुरितानां क्षयस्योक्तेर्युक्ता चैतद्विनिश्चितम् ।

* * * *

Colophon :

इति माधवबोधनाद(भोगनाथ)सहोदरस्य मायणनन्दनस्य सायणाचार्यस्य कृतौ प्रायश्चितसुधानिधौ शास्त्रस्थापनं नाम प्रथमप्रकरणम् ॥

End :

कृष्णलाः पञ्च ते माषाः ते सुवर्णस्तु षोडश ।
पलं सुवर्ण(।श्चत्वा)रः पञ्च वापि प्रकीर्तितम् ॥

ते त्रयः कृष्णला इत्यादिके मध्ययवास्त्रयः कृष्णलः; कृष्णलो गुणाः ते कृष्णलाः; दशभिर्माषैस्सुवर्णः; तैः पुरस्कृतः । चतुःपलमितं तस्य दशधरणं विदुः । दश ध(प)लानि धरणमित्यर्थः । तथा च मनुः—

पलं सुवर्णाश्चत्वारः.

No. 3491. प्रायश्चित्तसुधानिधिः.

PRĀYAŚCITTASUDHĀNIDHIḤ.

Substance, palm-leaf. Size, $18\frac{3}{8} \times 1\frac{1}{2}$ inches. Pages, 62. Lines, 6 on a page. Character, Telugu. Condition, injured Appearance, old.

Begins on fol. 50*a*. The other works herein are—Navagrahahōmavidhi 1*a*, Svapnādhyāya 15*a*, Paitṛmēdhikavidhiḥ 17*a*.

Same work as the above.

End :

आन्त्रवृद्धिं महारोगं दानेनानेन तोषितः ॥
चक्रहस्त गदापाणे शमयाशु जगत्पते ।
एवं दत्वा (तु) तद्दानं क्षमाप्य ब्राह्मणं ततः ॥
विप्राणां भोजनं दद्यात्स्नात्वा भुञ्जीत ब(न्धुभिः) ।
(पुत्रादि)युक्तो विमलस्सुचिरं सुखमेधते ॥
इत्यान्त्रवृद्धिप्रकरणम् ॥

Colophon :

इति श्रीमन्माधवभोगनाथसहोदरस्य मायणनन्दनस्य सायणाचार्यस्य कृतिः कर्मविपाकप्रायश्चित्त(सुधानिधिः) समाप्तः ॥

No. 3492. प्रायश्चित्तसुबोधिनी.

PRĀYAŚCITTASUBŌDHINĪ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{5}{8}$ inches. Pages, 121. Lines, 7 on a page. Character, Grantha and Telugu. Condition, good. Appearance, new.

A work on Śrauta-Prāyaścitta by Śrīnivāsadīkṣita.

Incomplete.

Beginning :

अर्हङ्गोळग्रामवासी श्रीनिवासमही(खी)सुधीः ।
बालानुद्दिश्य तनुते प्रायश्चित्तसुबोधिनीम् ॥

तत्रादावनुद्धरणप्रायश्चित्तमुच्यते—

उदयात्(पू)र्वमस्तमयात्पूर्वमाहवनीयानुद्धरणप्रायश्चित्तार्थं मनो ज्योतिर्जुषतां, त्रयस्त्रिंशत्तन्तव इति द्वे चतुर्गृहीते आहुती होष्यामीति सङ्कल्प्य, प्रणयनानन्तरं हुत्वा, चतुर्गृहीतं गृहीत्वा.

End:

अश्ममयानि मृन्मयानि च अप्सु प्रक्षिपेत्, पुत्रस्य दृषदं दद्यात् । इत्थं पात्रवितानं कृत्वा, अग्नीन्मृतशरीरमस्थीनि वा प्रति नीत्वा, पितृमेधेन दाहनं कार्यम्.

No. **3493.** प्रायश्चित्तानुक्रमणिका.

PRĀYAŚCITTĀNUKRAMAṆIKĀ.

Pages, 26. Lines, 9 on a page.

Begins on fol. 20*a* of the MS. described under No. 2631.

Gives a list, in the order of sequence, of the details connected with the performance of various expiatory ceremonies.

Complete.

Beginning:

क्षौरम्—

अनुज्ञाय क्षुरप्रदाय ।

क्षुरप्र सर्वपापघ्न नमस्ते शीघ्रकृन्तन ।
केशाश्र(श्रि)तानि पापानि नाशयाशु ममानघ ॥

इति क्षुरप्रमभिमन्त्र्य उदु त्यमिति मन्त्रेण सूराय दर्शयित्वा ।

यानि कानि च पापानि ब्रह्महत्यायुतानि च ।
केशानाश्र(श्रि)त्य तिष्ठन्ति तस्मात्केशान्वपाम्यहम् ॥

आत्मनश्शुद्धिकामो वा प्रतिष्ठाकाम एव वा ।
वपनं कारयिष्यामि तीरेऽहन्नव(हं नर)सन्निधौ ॥

इति मन्त्रेण पूर्वेद्युर्निशामुखे सर्वाङ्गक्षौरम् ।

End:

व्याहृतीभिः प्रायश्चित्तं कृत्वा, संपाताज्यं गृहीत्वा, अक्षीभ्यामिति

मन्त्रेण पूर्ववत्कर्तारं मूर्धादिपादान्तमङ्क्त्वा, वस्त्रेण दर्भपुञ्जेन च मार्जयेत् । ततः पाशि(हि)त्रयोदशहोमं विरजाहोममुत्तराङ्गं पूर्ववत्कुर्यात् । ततः कूश्माण्डहोमं कुर्यात् । ततो दशदानं भूरिदानं ब्राह्मणभोजनम् । ततः प्रायश्चित्तं समाश्रयणश्च कुर्यात् ॥

Colophon:

इति प्रायश्चित्तानुक्रमणिका सम्पूर्णा ॥

No. **3494.** ब्रह्मचारिव्रतलोपप्रायश्चित्तम्.

BRAHMACĀRIVRATALŌPAPRĀYAŚCITTAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 234*a* of the MS. described under No. 2892.

Regarding the ceremony to be performed as expiation for the sin caused by the breach of the rules relating to the period of one's Brahmacarya or bachelorhood, a period specially dedicated to the study of the Vēdas.

Beginning:

अथ ब्रह्मचारिव्रतलोपप्रायश्चित्तान्युच्यन्ते—

अथ उपनयनानन्तरं व्रतमध्ये यज्ञोपवीतादिनाशे वस्त्रं सूत्रान्तरं वा धृत्वा मनो ज्योतिरिति मनोलिङ्गकाभिः त्वमग्ने व्रथ(त)मसीत्यादिभिः.

End:

उदगयनादिकालांशेन प्रतीक्ष्य क्रियानिमित्तानन्तरमेव कार्यम् । एतत्सर्वमुपनयनवत् (अजि)नवासोमेखलादीनामपि ग्रहणं कृत्वा स्विष्टकृदादिहोमशेषं समापयेत् । इति संवत्सरव्रतं भवति ॥

No. **3495.** महार्णवः (कर्मविपाकः).

MAHĀRṆAVAḤ (KARMAVIPĀKAḤ).

Pages, 40. Lines, 7 on a page.

Begins on fol. 129*a* of the MS. described under No. 2117.

Gives out the names of the diseases caused by various kinds of sin committed in a former existence, and also the nature of the ceremony to be performed in expiation of those sins.

By Viśvēśvarabhaṭṭa, son of Peddibhaṭṭa.

This contains a long genealogy of a royal dynasty.

Incomplete.

Beginning :

नमः परमकल्याणभाजनाय पिनाकिने ।
नमो लक्ष्मीनिवासाय देवतायै गिरे नमः ॥

प्रवाळाद्रिप्रस्थद्युतिनिचयप(र्यायवपुषे)
नमो विघ्नश्रेणीविहननपटिष्ठे(ष्ठा)य महसे ।
जगत्प्रादुर्भावस्थितिलयनिरायासरचना-
विनोदासक्ताय प्रणतफलसिद्धिप्रतिभुवे ॥

यदिन्दिरानाथपुरन्दराद्यैः आराधितं भक्तिभरानताङ्गैः ।
श्रीचण्डिकायाश्चरणारविन्दं वन्दामहे मत्कुलदेवतायाः ॥

आसीदसीमगुणनाटकलाम्बुराशा-
वुद्यत्प्रभूतशुभकीर्तिनयप्रकाशः ।
लोकैस्सदा हृदि धृतो गुणसन्निविष्टः
श्रीरत्नपालनृ(पतिः)भुवनैकरत्नम् ॥

तस्यात्मु(त्म)जो धरणिपाल इति प्रसिद्धः
सिद्धाङ्गनाजनसमाजसमृद्धकीर्तिः ।
दानेन यस्सुकृतिनां क्षिपति स्म दैन्यं
सैन्यश्च वैन्यसदृशः प्रतिभूपतीनाम् ॥

सुतोऽस्य जातस्सुकृतोन्नतस्य न म(य)स्य कश्चित्सदृशो बभूव ।
यमश्वलस्तुल्य(स्वलत्सत्य)मवेक्ष्य जातं नाम्ना हरिश्चन्द्र इति व्यधत्त ॥

तस्यात्मजोऽभूदतुलप्रतापः साधारणो भूमिपतिर्वदान्यः ।
अभूतपूर्वो जगतीश्वराणामजीगणद्यो जगति स्वकीर्तिम् ॥

बन्धच्छिदाविरुदकीर्तिमिहान्वितार्थं
कृत्वा परत्र च तथैव विधातुमिच्छुः ।
कीनाशपाकचयबन्धविमोचनार्थं
तीर्थं त्रयीकरविमुक्तमचीकरद्यः ॥

अस्यात्मजः श्रीमदनेन राजा नाम्ना च रूपेण च सङ्गतार्थः ।
रोषारुणे चक्षुषि यद्विपक्षे स्मर्तव्यरूपत्वमवाप कामः ॥

* * * *

पुत्रेषु सत्स्वपि कलत्रयुगेऽथ तस्य
पुत्रौ जगत्त्रयविसृत्वरकीर्तिपूर्वौ ।
जातौ प्रधा(प्रिया)वतितरां प्रथमप्रसूतौ
नीतौ महोन्नतिमनल्पगुणौ विनीतौ ॥

उदारशीलौ सुमनोविलाससमनोज्ञवृन्दावनकेळिलोलौ ।
यशोदयावर्धितमङ्गळौ यौ श्रीरामकृष्णाविह सम्प्रतीतौ ॥

यच्छैशवानुकरणं न युवा न वृद्धः
शक्नोति कर्तुमितरः कृ(श्रु)तसद्गुणोऽपि ।
दानान्निदानमखिलार्थजनार्थसिद्धिः
कीर्तिर्दिगन्तरचि(वित)ता च यतस्तदीया ॥

अप्रतिमल्लः पृथ्व्यां पृथ्वीमल्लस्तयोरभूज्ज्येष्ठः ।
अपरो मान्धातृगुणैर्मान्धाता गीयते जगति ॥

सोऽयं कृती विधाता रिपुकुलजेता तनोति मान्धाता ।
विद्वन्मुखेन मतिमान् सत्कृतिरत्नं महार्णवं नाम्ना ॥

माता पुण्यचरित्रकीर्तिविभवा यस्याम्बिका नामतः
शाकल्यापरमूर्तिरार्यचरितः श्रीपेद्दभट्टः पिता ।
सोऽयं कोकिल(कौशिक)वंशभूषणमणिः श्रीभट्टविश्वेश्वरः
वेदस्मार्तमते नये च (सपदे) वाक्ये कृतिर्व(ती न)र्धते ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परा शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतल(भूते स्थितिमिया-
दियं) व्यासारण्यप्रचुरमुनिशिष्यस्य फणितिः ॥
श्रुतिस्मृतिपुराणानि समालोक्य यथामति ।
निबध्यते समासेन निबद्धा(न्धोऽ)यं महार्णवः ॥
दुष्कर्मपाकजनितामयकर्शितानां
सत्कर्मशर्मकरमित्युदितं मुनीन्द्रैः ।
तत्सङ्गजातमितरोक्तिविधानपेक्षं
वक्ष्यामि रोगिनिखिलार्तिनिबर्हणाय ॥

तत्र तावद्वक्ष्यमाणसकलकार्योपयोगित्वेन कर्मविपाकरूपरोगादिनिवृत्त्यर्थं प्रायश्चित्तादेरवश्यकर्तव्यता प्रतिपाद्यते । तद्यथा—

"ब्रह्महा क्षयरोगी स्यात् ।"

इत्यादिरोगनिदानकथनात् निदानोच्छेदेन व्याधिनिवृत्तेरवगतत्वात् तत्तन्निदानोच्छेदाय क्षयत्वादिलक्षणरोगयुक्तैः द्वादशवार्षिकादिप्रायश्चित्त-व्याधिप्रतिकृतिदानानि कर्तव्यानि । अत्र केचित्प्रत्यवतिष्ठन्ते ।

End: See next number.

No. 3496. महार्णवः (कर्मविपाकः).
MAHĀRṆAVAḤ (KARMAVIPĀKAḤ).

Substance, palm-leaf. Size, $13\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 260. Lines, 6 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 28a. The other works herein are—Ugraratha-śāntikalpa (with Prayōga) 1a, Sapiṇḍīkaraṇaviṣaya 157a.

Consists of ten Taraṅgas, of which the 5th and the 10th are here incomplete, and the 6th is wanting: fols. 53 to 57 and 117 to 124 are missing.

Subject—same as that of the above.

Beginning: See previous number.

End:

पूर्वरीत्या कृतार्चन इति अन्तको देवता तत्रेत्यारभ्य परिभाषायां व्याधिप्रतिमादानम् । विधावुक्तप्रकारेणेत्यर्थः । शतपदमिति शतं पदानीत्यर्थः; समुदायापेक्षणीयं वचनम् ॥

Colophon:

इति शूलरोगहरप्रतिमादानम् ॥
माता पुण्यचरित्रकीर्तिविभवेत्यादि ।
महार्णवाख्ये महति प्रबन्धे मान्धातृनाम्नो मदनात्मजस्य ।
सत्कर्ममाणिक्यगणेन पूर्णे पूर्णः प्रसिद्धो नवमस्तरङ्गः ॥
अथ ज्वरहराणि । तत्र गार्ग्यः—
ये पुनः क्रूरकर्माणः पापाचाराश्च वेतसः ।
ते भवेयुः सदा शीतज्वरवन्तश्च वेतसः ॥

* * * *

अथ विसर्पहरम् । कर्मविपाकसमुच्चये—
अमेध्यस्य प्रदानात्तु विसर्पव्याधिमान् भवेत् ।
मासं पयोव्रतं कुर्यात् दद्यादन्ते पयस्विनीम् ॥
पयस्विनीं गाम् । गोदानमन्त्रो नवग्रहयज्ञकर्मणि दर्शितः ॥

No. 3497. महार्णवः (कर्मविपाकः).
MAHĀRṆAVAḤ (KARMAVIPĀKAḤ).

Pages, 56. Lines, 8 on a page.

Begins on fol. 296a of the MS. described under No. 2744.

Tarangas 8 and 9 complete.

Breaks off in Nētrarōgahara in the 10th Taranga

On the same subject as the above.

Beginning:

अथ रोगनिर्हरणानि ।

तत्र क्षयरोगहराणि क्षयरोगनिदानमाह याज्ञवल्क्यः—

ब्रह्महा क्षयरोगी स्यात् इत्यादि । तन्निवृत्त्यर्थं षडब्दप्रायश्चित्तं कुर्यात् । प्रायश्चित्तार्थं हस्ति स्त्रियो रोगिण एव वा । इति रोगिणोद्दि- प्रायश्चित्तमिति(?) एतेनैवाभिधानात् इति क्षयरोगप्रायश्चित्तम् ।

End—Same as in the above number.

No. **3498.** महार्णवः (कर्मविपाकः).

MAHĀRṆAVAḤ (KARMAVIPĀKAḤ).

Substance, palm-leaf Size, 12⅝ × 1⅝ inches. Pages, 9. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Wants beginning and end.

On the same subject as that of the above.

Beginning:

. . . . तव्यपुष्पिणि ।

गर्भस्रावे ति(तु)नारीणां नव वन्ध्या(ः) प्रकीर्तिताः ॥

उपवासेन सुखे(स्रो)ता जपामूले नउ(समु)द्धृते ।

एकवर्णगवां क्षीरैः पीतं(त्वा) स्त्री लभते सुतम् ॥

* * * *

अतः परं प्रवक्ष्यामि सङ्क्षिप्तं सूक्तमुत्तमम् ।

आयुर्वेदोपदेशेऽस्मिन् कर्मपाकं(को) विकथ्यते ॥

प्रयत्नेन महापापं यत्कृतं मनुजा(जैः) स्वयम् ।

नानायोनिषु जायन्ते कर्मान्ते गतरूपिणः ॥

पापं कृत्वा प्रयत्नेन मनोवाक्कायकर्मणः ।

पूर्वजन्माधिकं कर्म रोगदोषं(षो) निकथ्यते ॥

End:

षड्ग्रहणी वृष्यमेकं च उन्मादं पञ्चमे(धै)व च ।

पीनसाष्टादशं चैव अभ(प)स्मारं(र) चतुष्टयम् ॥

मूषकं वृश्चिकं चैव बालग्रहचतुष्टयम् ।

आम्लपैत्त्यं च(तथै)कैकं चाध्मारुए(नन्त्वे)कमेव च ॥

ज्ञातव्यं भेषजं चैव रोगनामान्स(त्र)कीर्तिताः(तम्) ।

No. **3499.** महार्णवः (कर्मविपाकः.)

MAHĀRṆAVAḤ (KARMAVIPĀKAḤ).

Pages, 162. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 3273.

Same subject as that of the above work.

Complete.

Beginning:

अथ रोगनिबर्हणानि ।

तत्र क्षयरोगहराणि ।

क्षयरोगनिदानमाह याज्ञवल्क्यः—

ब्रह्महा क्षयरोगी स्यात् इत्यादि । अथ क्षयरोगहरकदलीदानम् ।

पद्मपुराणे—

क्षयी स्यात्क्षेत्रमरणे ।

क्षेत्रगतस्य मारणमुदकदानादिप्रतिषेधरूपायनिष्ठाचरणेन ।

End:

पाण्डुः—

पाण्डुः पाण्डुरपीनाङ्गो दण्डधारि(री) द्विबाहुकः ।
ऊर्ध्वकेशो ज्वलद्दंष्ट्रो दष्टोष्ठो हन्तुमुद्यतः ॥

विस्फोटः—

विस्फोटो दण्डपाणिः स्यात् नासानिहिततर्जनिः ।

उदर्दः—

उदर्द उज्ज्वलन्नेत्रः शूलपाशाङ्कुशान्वितः ।
स्थूलकायः किरत्केशः कालमेघद्युतिः खरः ॥

Colophon:

इति कर्मविपाके उत्तरकल्पविधानोक्तरोगस्वरूपनिरूपणं समाप्तम् ॥

No. 3500. महार्णवः (कर्मविपाकः).

MAHĀRṆAVAḤ (KARMAVIPĀKAḤ).

Substance, palm-leaf. Size, $18\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 610. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Vāmadēvasaṁhitā 306*a*.

Complete.

Same subject as that of the above.

Beginning:

मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्लाघ्यं जगति ऋजवस्ते कतिपयः(ये) ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमियात्
इयं व्यासारण्यप्रवरमुनिशिष्यस्य फणितिः ॥

पेद्दभट्टात्मजः श्रीमान् भट्टो विश्वेश्वरस्सुधीः ।
महार्णवाभिधं स्मार्तं निबन्धं कुरुते कृतिः(ती) ॥

माता पुण्यचरित्रकीर्तिविभवा यस्याम्बिका नामतः
शाकल्यापरमूर्तिरा(येचरित) श्रीपेद्दभट्टः पिता ।
सोऽयं कौशिकवंशभूषणमणिः श्रीभट्टविश्वेश्वरः
वेदे स्मार्तमते नये च सपदे वाक्ये कृते(ती) वर्धते ॥

अथ निबन्धे परिच्छेदानुक्रमः श्लोकः—

एनोविपाक(विस्तारः) कीर्त्यते कालनिर्णयः ।
कृत्यश्च हायनस्येति निबन्धेऽस्मिन्ननुक्रमात् ॥

अथ कर्मविपाकपरिच्छेदस्य प्रतिज्ञाश्लोकः—

दुष्कर्मपाकजनितामयकर्शितानां
सत्कर्मशर्मकरमित्युदि(तं) मुनीन्द्रैः ।
तत्सङ्गजातमितरोक्तिविधानपेक्षं
वक्ष्यामि रोगिनिखिलार्तिनिबर्हणाय ॥

ननु कथं कर्मविपाककालनिर्णयवार्षिककृत्यानां पौर्वापर्यम्? अत्रोच्यते—

काले हि कर्म विधीय(ते; तथा) च वत्सरकृत्यस्य कर्मणः कालापेक्षायां सुपरीक्षिते काले कर्म वक्तुं कर्तुश्च सुकरमिति । तस्मात्पूर्वं कालस्य निर्णयस्सङ्गतः । स च कालः प्रतिपदादितिथिविशेषवाचिशब्दाभिधेयः (प्रतिपदादितिथिह्रा)सवृद्धिवशाच्च तत्तत्तिथिविहितकर्मणि पूर्वा वा तिथिर्ग्राह्या परा वेति संशये स्मृतिपुराणादिभिः कचित्पूर्वा कचिच्च परेति व्यवस्थाभिधेया । तिथीनां ह्रासवृद्धिसामान्यानि च प्राणिकर्म(जनितादृष्टाय)त्तानि ।

तदुक्तं गोबि(भि)लेन—

खर्वो दर्प्ये(दीर्घ)स्तथा हिंसा त्रिविधं तिथिलक्षणम् ।
धर्माधर्मवशादेव तिथिस्त्रेधापि वर्तते ॥ इति ।

End:

अथ धूपमन्त्रः—

ओं चामुण्डे नमो दिव्ये हुं फट् ह्रीम् २ अपसरन्तु दुष्टग्रहा हूम् २ तथा गच्छन्तु म(गु)ह्यका यत्र स्वस्थानन्तु शुद्धरुद्रो ज्ञापयति स्वाहा इति सर्वबालग्रहसाधारणानुलेपनस्नानधूपमन्त्राः ॥

मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परा शीलं श्लाध्यं जगति ऋजवस्ते कतिपयः(ये) ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमिया-
दियं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥

Colophon:

इति श्रीमहार्णवाभिधाने निबन्धे कर्मविपाकपरिच्छेदः समाप्तः ॥

No. **3501.** महार्णवः (कर्मविपाकः).

MAHĀRṆAVAḤ (KARMAVIPĀKAḤ).

Substance, palm-leaf. Size, $16\frac{3}{8} \times 1\frac{5}{8}$ inches. Pages, 282. Lines, 7 on a page. Character, Telugu. Condition, good. Appearance, new.

The same subject as that of the above.

No. **3502.** मेखलाजिनदण्डनाशप्रायश्चित्तम्.

MEKHALĀJINADAṆḌANĀŚAPRĀYAŚCITTAM.

Pages, 8. Lines, 4 on a page.

Begins on fol. 13*a* of the MS. described under No. 2973.

Regarding the ceremony to be performed when the sacred waist-string of a Vedic student, the piece of deer-skin attached to his sacred thread, or his Palāśa stick, which are all together emblomatic of his bachelorhood, is lost.

Complete.

Beginning:

मेखलामजिनं दण्डं सावधानं सुरक्षितम् ।
दैवादनुगते नाशौ(शे) प्रायश्चित्तं कथं भवेत् ॥
यथाशक्ति हिरण्यं वा विप्रहस्ते प्रदीयते ।

End:

यदाज्येन प्रयाजा इज्यन्त इत्यादि पङ्क्ति[ति] मनूद्यन्तीति जपित्वा द्वादशगृहीतेनाज्यं गृहीत्वा इत्येकामाज्याहुतिं हुत्वा.

Colophon:

आज्यपात्रस्कन्नप्रायश्चित्तम् (समाप्तम्) ॥

No. **3503.** शुनकदष्टप्रायश्चित्तम्.

ŚUNAKADAṢṬAPRĀYAŚCITTAM.

Page, 1. Lines, 6 on a page.

Begins on fol. 116*b* of the MS. described under No. 3482.

Regarding the purificatory ceremony to be performed when one is bitten by a dog.

Incomplete.

Beginning:

शुन(क)दष्टप्रायश्चित्तम् ।

वसिष्ठः—

ब्राह्मणस्तु शुना दष्टो नदीं प्राप्य समुद्रगाम् ।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति ॥

आङ्गिराः—

ब्रह्मचारी शुना दष्टस्त्रिरात्रेणैव शुध्यति ।
गृहस्थस्तु द्विरात्रेण एकाहेनाग्निहोत्रवान् ॥

End:

यां दिशं तु गतस्सोमः तां दिशं त्ववलोकयेत् ।
सोममार्गेण सा पूता पञ्चगव्येन शुध्यति ॥

स्पर्शने सचेलस्नानम्.

No. 3504. श्राद्धभोजनप्रायश्चित्तविधिः.

ŚRĀDDHABHŌJANAPRĀYAŚCITTAVIDHIḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3007.

Regarding certain restrictions to be observed by Brahmins selected for feasting during Śrāddha ceremonies.

Beginning:

न भोजयेत्प्रयत्नेन निमन्त्रणदिनात्परम् ।
दिनत्रयं वर्जयित्वा प्र(वृ)णुयादिति चर्यतः ॥

आङ्गिर(स)स्मृतौ—

अनुमासिकभोक्तारं पक्षमात्रं विसर्जयेत् ।
ऊनमासिकभोक्तारं मासमात्रं परित्यजेत् ॥
नग्नश्राद्धे वर्षमात्रं नवश्राद्धे तदर्धकम् ।
षोडशे सार्धवर्षन्तु सपिण्डे च द्विवत्सरः ॥
वर्जयित्वा द्विजं पश्चात् ग्राहयेत् श्राद्धकर्मणि ।
शूद्रामत्श्राकं(श्राद्धकं) सम्यक् त्यजेद्वर्षत्रयं सदा ॥

End:

स्मार्तकर्मपरित्यागो राहोरन्यत्र सूतके ।
श्रौतकर्मणि तं कालं स्नातश्शुद्धिमवाप्नुयात् ॥ इति ।
गङ्गायां ग्रहणे चैव सूतकन्तु न विद्यते ।
भुक्तेनापि हि कर्तव्या स्नानदानादिकाः क्रियाः ॥
एकोद्दिष्टस्य दिवसे सपिण्डीकरणं विना ।
श्राद्धं कुर्यात्पितृक्रोधात् क्षयमाप्नोति सन्ततिः ॥

No. 3505. समावर्तनकालातिक्रमप्रायश्चित्तम्.

SAMĀVARTANAKĀLĀTIKRAMAPRĀYAŚCITTAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 209*a* of the MS. described under No. 2892.

Regarding the ceremony to be performed when one does not finish the study of the Vēdas within the time allowed.

Complete.

Beginning:

तस्मात् प्राक् च वरश्शुभ्रवस्त्राभरणभूषितः ।
कांस्यपात्रं कराभ्यान्तु गृहीत्वा शुद्धमानसः ॥
तत्पात्रे स्वर्णशुभ्रन्तु यथाशक्त्या निधाय च ।
ताम्बूलसहितं कृत्वा सभायाः पुरतः स्थितः ॥
नमस्कृत्वा वरो धीमान् कुर्याद्विज्ञापनं ततः ।

अशेषे हे परिषद् मदीयां विज्ञापनामवधार्येमां दक्षिणां स्वीकृत्य.

End:

सकलपापेभ्यो विमुक्तो भूत्वा समावर्तनाधिकारी भविष्यसीत्येषा परिषदादिशति ॥

No. 3506. समुद्रस्नानविधिः.

SAMUDRAŚNĀNAVIDHIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 28*b* of the MS. described under No. 2973.

Regarding the proper time for bathing in the sea in view to get rid of certain kinds of sin.

Complete.

Beginning:

सभूमिजा कृष्णचतुर्दशी या तस्यान्तु पर्वण्यतिभक्तियुक्तः ।
स्नात्वा समुद्रे विनिहन्ति पापं सहस्रजन्मान्तरसंचितं यत् ॥

End:

.यो नरस्स्नाति तीर्थेषु समुद्रे सेतुबन्धने ।
सप्तजन्मकृतं पापं तत्क्षणादेव नश्यति ॥

Colophon:

इति कात्यायनीपुराणोक्तमुदधिमाहात्म्यं समाप्तम् ॥

No. 3507. सर्वप्रायश्चित्तानुक्रमणिका.

SARVAPRĀYAŚCITTĀNUKRAMAṆIKĀ.

Pages, 11. Lines, 9 on a page.

Begins on fol. 172*a* of the MS. described under No. 143.

Gives in order the various details connected with the various kinds of expiatory ceremonies.

Complete.

Beginning:

तस्यानुक्रमणिका—

सचेलस्नानं, महासङ्कल्पः, कर्ता(र्त्रा) सभां प्रति विज्ञापितानां पापानां प्रायश्चित्तनिरूपणं, विधायकवरणं, विधायकमुखेनानुवादकवरणं, विधायकानुवादकवाक्यप्रकारः, दन्तधावनविधिः.

End:

अनुलोमन गर्भधारणापनोदनं सर्वप्रायश्चित्तं धर्मशास्त्रोक्तमार्गेण उक्तप्रत्याम्नायरूपेण व्यहसाव्य(ध्य)मखण्डप्राच्योदीच्याङ्गसहितमाचरिष्य इति सङ्कल्प्य उक्तमार्गेण कुर्यात् ॥

No. 3508. सर्वप्रायश्चित्तम्.

SARVAPRĀYAŚCITTAM.

Pages, 4. Lines, 7 on a page.

Begins on fol. 43*b* of the MS. described under No. 2902.

Incomplete.

Regarding certain general expiatory ceremonies.

Beginning:

ए(ये)षां शरीरे निवसन्ति वेदा यैर्दत्तमश्नन्ति हविस्सुधामिव ।
छन्दांसि सर्वाणि वसन्ति देहे पवित्रतां ते सततं दिशन्तु ते ॥
नित्य(नम)स्सकलकल्याणदायिने ब्रह्मरूपिणे ।
सदसे सर्वपूज्याय दुष्कृतारण्यवह्नये ॥
जातिमात्रस्तु विप्रोऽपि पूज्यस्सर्वसुरासुरैः ।
स्मृतिमात्रेण युक्तश्चेत् स तु सर्वगुरुर्भवेत्

End:

भर्तृपैतृकराहित्याशास्त्रकथाश्रवणपुत्ररमणानादरणोध्वऽनुकजलपानजलमध्ये(ध्यं)मूत्रामेध्योत्सर्जनपापकर्मनिरीक्षणपरपुरुषसहासननानाविधकर्मकरणत्वादीनां(दिभ्यो) मुक्ता भूयाम(स्म).

No. 3509. सूक्तमाहात्म्यम्.

SŪKTAMĀHĀTMYAM.

Pages, 44. Lines, 6 on a page.

Begins on fol. 164*a* of the MS. described under No. 3019.

Regarding the efficacy of certain Vedic Sūktas in removing sins.

Copying is said to have been completed on the 13th day of Caitraśuddha in the year Vikṛti.

Beginning:

शौनक उवाच—

वक्ष्येऽहं सूक्तमाहात्म्यं वर्गो मन्त्राः प्रयत्नतः ।
शृणुध्वं भूसुरास्सर्वे विश्वासेन समाहिताः ॥

सूक्तानां तत्फलं प्रोक्तं मन्त्राणां तत्त्वतोत्तरम् ।
कृतादिषु जपेद्धीमानृग्वर्गाणि यथाक्रमम् ॥

आध्वर्यवादिसूक्तं च त्रिसहस्रं जपे(ले)जपेत् ।
इहजन्मकृतास्सर्वा(र्वे) मुच्यन्ते ब्रह्महत्यया ॥

मित्रो जनानिति सूक्तं त्ययुतं तु शिवालये ।
लिङ्गं स्पृष्ट्वा जपेद्धीमान् सुरापी मुच्यते ततः ॥

End:

वेदाक्षराणि यावन्ति पठितानि द्विजोत्तमैः ।
तावन्ति हरिनामानि कीर्तितानि न संशयः ॥

साक्षान्मूलप्रमाणाय विष्णोरमिततेजसे ।
आद्याय सर्ववेदानामृग्वेदाय नमो नमः ॥

III. DIGESTS—(SPECIAL).

(9) PRAYŌGA.

The works included in this subdivision relate to the various details connected with the performance of the several rites and ceremonies mentioned in the previous subdivisions.

No. 3510. अग्निमुखम्.

AGNIMUKHAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 57*a* of the MS. described under No. 430.

Regarding the method of hallowing the fire so as to make it fit for sacrificial purposes.

Incomplete

Beginning:

अथ कर्माण्याचाराद्यानि गृह्यन्ते ।

प्राणानायम्य, अमुकं(दकः) कर्म करिष्ये—

केवलैस्तण्डुलैर्वापि तच्चूर्णेन मृदापि वा ।
गौरवर्णेन वा कुर्यात् स्थण्डिलं चतुरश्रम(श्रक)म् ॥
तिस्रः प्रागायता रेखाः तिस्रः प्रागुदगायताः ।
लिखित्वा द्वौ तु दर्भौ तु कपर्द्यादिभिरीरितम् ॥
प्राचीः पूर्वमुदक्संस्थं दक्षिणारम्भमालिखेत् ।
तथोदीचीः पुरस्संस्थं पश्चिमारम्भमालिखेत् ॥

End:

उदगग्राभ्यां पवित्राभ्यां त्रिरुत्पूय, समं प्राणैर्हृत्वा, उत्तरेणाग्निं पुनस्स्तीर्णेषु दर्भेषु सादयित्वा, ...

पूर्णपात्रस्य तत्स्थानं कपर्द्यादिभिरीरितम् ॥

अष्टदर्भैः प्रच्छाद्य.

No. 3511. अग्निसन्धानप्रयोगः.
AGNISANDHĀNAPRAYŌGAḤ.

Substance, palm-leaf. Size, $11\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 16. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, new.

Pertains to the Sāmavēdins and is according to the views of Aupamanyava.

Begins on fol. 1*a*. The other works herein are—Śrāddhaprayōgaḥ (Sāmavēda) 8*b*, Pūrvakārikāślōkāḥ (Sāmavēda) 22*a*, Āgnēyarcaḥ (Sāmavēda) 35*a*, Samāvartanasaṅkalpa (Sāmavēda) 44*a*.

Deals with the sanctification of fire.

Complete.

Beginning :

प्राणायामश्च संकल्पलेपलेखनसेचनम् ।
अग्नि(ग्ने)स्समूहनं भूमिर्ब्रह्मादिस्त(व)रणासनम् ॥
आज्यसंस्कारपरिषेकेध्ममात्मादिपूजनम् ।
प्रपदं व्याहृती(ति)श्चैव पुरस्तात्तन्त्रकर्म वै ॥

*   *   *   *

दर्भप्रहरणं पश्चात् शब(ल)लीहोम एव च ।
ब्रह्मणोद्वासनं वामदेव्यर्चं च जपेत्सुधीः ॥

ततः अनुग्रहं कृत्वा, दक्षिणाताम्बूलं गृहीत्वा, पत्या(त्न्या) सह तिष्ठन् सन् सादा इति साम जपित्वा, दक्षिणां परिषत्सन्निधौ निधाय ।

End :

वामदेव्यगानम्, ऋग्जपं, शान्तिजपं च कुर्यात् ॥

Colophon :

अग्निसन्धानं समाप्तम् ॥

No. 3512. अग्निहोत्रकारिका.
AGNIHŌTRAKĀRIKĀ.

Substance, palm-leaf. Size, $13\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 9*a*. The other works herein are, Upākarmaprayōga 1*a*, Adhyāyōtsarjanavidhi 6*a*, Vaiśvadēvaprayōga 7*a*, Madhvādyuddēśatyāga 13*a*

On the same subject as that of the above ; metrical in form.

Beginning :

स्थाता शाखामथाहृत्य वत्सापाकरणं तथा ।
यष्टा व्रतं न कुर्याच्च गवां प्रस्थापनादिकम् ॥
उपगूहनान्तं शाखायाः प्रशातनविधित(स्त)था ।
कुर्याद्वेषश्च वल्कश्च त्रिवृत्कुद्ध्यान्तथैव च ॥
इयन्ते यज्ञपो मुश्च पृथिव्या संभवेति च ।
यन्मेऽत्र तु यदत्रापि यदन्नमपि रुद्रिया ॥

End :

शालामुखीयं प्राजिहितं दक्षिणाग्निन्तथैव च ।
आयुर्बृहद्धविर्धानमाग्नीध्रीयं सदस्तथा ॥

*   *   *   *

यजमानो बहुविदं कर्मज्ञं विद्वांसमाहूय बहुविदाग्निमुद्धरेत्याह । स बहुविद्वाचा त्वा होत्रेत्यादिनाग्निमुद्धरेत् । यजमानेन भूर्भुवस्सुवरित्याद्याभिमन्त्रणे कृते बहुविदे स्नेहोद्रिक्तं धनं दद्याद्यजमानः । ततो बहुविदग्निपतयेऽग्नये मे विद्धीत्यादिनाग्निं हरेत् ॥

No. 3513. अग्निहोत्रम्.
AGNIHŌTRAM.

Pages, 14. Lines, 7 on a page.

Begins on fol. 107*a* of the MS. described under No. 1035.

On the details connected with the performance of Agnihōtra, *i.e.*, a sacrifice to Agni.

Beginning :

मम....र्थ सायमाग्निहोत्रं तण्डुलैर्होष्यामि । ओमुद्धराहवनीयम् । तूष्णीं दक्षिणाग्निं प्रणीय, आहवनीयं ज्वलन्तमुद्धरेत् । देवन्त्वा देवेभ्यः श्रिया उद्धरामि । उद्ध्रियमाण उद्धर पाप्मनो मा यदविद्वान् यच्च विद्वांश्चकार । अह्ना यदेनः कृतमस्ति किञ्चित् सर्वस्मान्मोद्धृतः पाहि तस्मादमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य योनौ । तयानन्तं काममहं जयानि प्रजातिः प्रथमो यं जिगायाग्नावग्नि(ः)स्वाहा । इति निदध्यात्.

End :

अनृणा अस्मिन्ननृणाः परस्मिंस्तृतीये लोके अनृणा स्याम । ये देवयाना उत पितृयाणाः सर्वान् पथो अनृणा आक्षीयेम ।

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नम आहवनीयाय महावेद्यै नमो नमः ॥
काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे ।
स्वर्गापवर्गरूपाय यज्ञेशाय नमो नमः ॥

No. **3514.** अग्निहोत्रमन्त्रः.

AGNIHŌTRAMANTRAH.

Pages, 13. Lines, 5 on a page.

Incomplete.

Begins on fol. 1*a* of the MS. described under No. 1574.

The Mantras to be recited in the ritual of Agnihōtra.

Beginning :

धृष्टिरसि ब्रह्म यच्छ धृष्टिमादाय सुगार्हपत्यो विदहन्नरातिरुषसः श्रेयसि श्रेयसीर्दधत । (अथासप)त्नाँ अपबाधमानो रायस्पोषमिषमूर्जमस्मासु धेहि । गार्हपत्यमभिमन्त्र्य

* * * *

प्रतिष्ठापयति । प्राङ्मुख(ः)प्रातः ओं भूर्भुवस्स्वः समिधः प्रोक्ष्य, समिधश्शेषा विभज्य ।

End :

अहे बु . पातय ।
सन्ततश्रीरस्तु । समस्तमङ्गलानि भवन्तु ।

मत्कर्म कुर्वतां पुंसां कर्मरूपो भवेद्यदि ।
तत् कर्म सफलं कुर्युः त्रिस्रः कोट्यो महर्षयः ॥
अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व पुरुषोत्तम ॥

अनेन प्रातरग्निहोत्रहोमेन भगवान् सर्वात्मकः.

No. **3515.** अग्निहोत्रस्थालीपाकः.

AGNIHŌTRASTHĀLĪPĀKAḤ.

Page, 1. Lines, 7 on a page.

Begins on fol. 5*b* of the MS. described under No. 854.

Deals with the cooking of the rice-offering for a fire-sacrifice.

Beginning :

प्रज्वाल्य वह्निं परितस्समुह्य . . . तेन सम्यक् ।
दर्भैः परि(स्तीर्य) . . . .

* * * *

स्मृतिसङ्ग्रहे प्रजापतिः—

कन्यागते सवितरि श्राद्धं कार्यं दिने दिने ।
कृष्णपक्षेऽपि वा कुर्यात् पञ्चम्यादिदिनादिह ॥

End :

माधवीयविद्यारण्यादौ—

कारुण्यानां च सर्वेषां श्राद्धं कार्यं दिने दिने । इति । एवमेव निर्णयसिन्धौ यल्लाजीयादौ ज्ञेयम्.

No. 3516. अग्न्यनुगतप्रायश्चित्तम्.

AGNYANUGATAPRÂYAŚCITTAM.

Pages, 11. Lines, 5 on a page.

Begins on fol. 132*a* of the MS. described under No. 2539.

Beginning:

प्रकरणादग्निहोत्राद्यग्नीनामनुगमनप्रायश्चित्तान्युच्यन्ते--आदौ विहरणकालातिपत्तेः प्रायश्चित्तं सायं प्रातर्वा अधिवृक्षसूर्ये आपस्सूर्ये इत्युक्तविहरणकालातिपत्तौ नित्याग्निहोत्रमन्त्रेण विहृत्य हविरुपसादनान्ते जुहां च चतुर्गृहीतं गृहीत्वा मनो ज्योतिः-घृतेन स्वाहा.

End:

होत्रेत्याहवनीयमुद्धरति । यजमानो भूर्भुवस्सुवरिति उद्ध्रियमाणमभिमन्त्रयते । यः कश्चिद्ब्राह्मणो . . . .

भवति ध्रुवस्तदग्नेः पूर्वतो गच्छति । तस्य पश्चाद्धहुविदग्निम् उर्वन्तरिक्षंवि(क्षमन्वि)हीत्यनुद्रवति.

No. 3517. अङ्कुरार्पणप्रयोगः.

AṄKURĀRPAṆAPRAYŌGAḤ.

Substance, palm-leaf. Size, 18¼ × 1⅝ inches. Pages, 5. Lines, 6 on a page. Character, Telugu. Condition, slightly injured Appearance, old.

Begins on fol. 16*a*. The other works herein are—Vaibhavēṣṭi 1*a*, Pañcasaṁskāradhāraṇaprayōga 4*a*, Sudarśanahōma 5*b*, Prapatyanuṣṭhānaprayōga 7*a*, Samprōkṣaṇaprayōga 8*a*, Brahmakūrcavidhi 11*b*, Sudarśanapāñcajanyapratiṣṭhāvidhi 14*b*.

On the rite of sowing certain seeds for the purpose of augury, just before the commencement of a marriage ceremony and of certain other ceremonies connected with temple-worship.

Beginning:

अङ्कुरार्पणप्रकारः--

वल्मीकमृदमाहृत्य गोमयञ्च तथैव च ।
दूर्वामश्वत्थपर्णञ्च शिरीषं बिल्वपत्रकम् ॥
तासां मूले तु बध्नीयात् श्वेतसूत्रेण वेष्टयेत् ।

ओं भूः ब्रह्माणमावाहयामि, ओं भुवः प्रजापतिमावाहयामि, ओं सुवः चतुर्मुखमावाहयामि,

* * * *

ब्रह्मेन्द्रयमवरुणसोमादिभ्यो नमः यथाभागश इदं गुडं निवेदयामि । ताम्बूलं निवेदयामि । व्रीहियवतिलमुद्गसर्षपाः ।

End:

यथाक्रमं शुद्धाभिः सिकताभिः प्रच्छाद्य, पञ्चगव्येन यथाक्रमं सेचयेत् । प्रणये(वे)न साभि(पि)धानं कृत्वा, यावत्कर्म तावत्सुरक्षितं गोपायेदिति ॥

Colophon:

इत्यङ्कुरार्पणप्रकारस्समाप्तः ॥

No. 3518. अध्यायोत्सर्जनविधिः.

ADHYĀYŌTSARJANAVIDHIḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 6*a* of the MS described under No. 3512.

Regarding the details connected with the ceremony to be performed before closing the annual session for the study of the Vēdas.

Beginning:

आद्यवराहकल्पेत्यादि । अधीतानां वेदानामयातयामत्वाय अध्यायोत्सर्जनकर्म करिष्ये । तदङ्गं पुण्याहवाचनं करिष्ये । उपलेपाद्यग्निप्रतिष्ठापनान्तं कृत्वा अत्र देवतेत्यादि चक्षुषी आज्येन सावित्र्यादयः ।

End:

आज्यभागान्तं कृत्वा उपाकर्मवत् प्रधानाहुतीर्हुत्वा यज्ञोपवीतश्च हुत्वा स्विष्टकृद्धोमानन्तरं यज्ञो.

No. **3519.** **अनाहिताग्निपैतृमेधिकप्रयोगः.**

ANĀHITĀGNIPAITṚMĒDHIKAPRAYŌGAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 121*a* of the MS. described under No. 2539.

Deals with the details of the funeral rites to be connected in the case of a dead man who had not regularly maintained the sacred fires.

Incomplete.

Beginning:

अथातः पैतृमेधिकं दहनमनाहिताग्नेः पितृमेधप्रयोगो वक्ष्यते—

मरणसंशये अद्भिः स्नपयित्वा, कुशास्तृतविलिप्तदेशे दक्षिणशिरसं संवेशयित्वा, गोद्वयं तिलान् हिरण्यं भूमिं च दापयित्वा, ब्रह्मविदाप्नोति परम्, भृगुर्वै वारुणिः इत्येतावनुवाकौ दक्षिणे कर्णे जपेत् । आयुषः प्राण॰सन्तन्विति वामके.

End:

ततः पात्रान्तरेण पूर्वप्रयुक्तान्यर्घ्योदकान्यादाय, या दिव्या इति मन्त्रान्ते पितृतीर्थेन स्वधा नम इत्यर्घ्यं दत्वा, छादनान्तं पूर्ववत्कृत्वा, अथोपवीती विष्णुमभ्यर्च(र्च्य).

No. **3520.** **अनाहिताग्निसंस्कारप्रयोगः.**

ANĀHITĀGNISAṀSKĀRAPRAYŌGAḤ.

Pages, 48. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3032.

Incomplete.

Regarding the method of cremating the dead body of persons who had not maintained the sacred fires.

Beginning:

अथानाहिताग्नेः संस्कारविधिरुच्यते—

कर्ता सचेलं स्नात्वा, तिलदर्भहिरण्यं गृहीत्वा, समस्तसम्पदिति ब्रह्मदण्डं निधाय, यजमानस्य पितुर्गोत्रस्य शर्मणः सर्वप्रायश्चित्ते उत्क्रान्तितिलपात्रकर्णमन्त्रराहित्याद्यसंस्कारमरणे सति संस्कारयोग्यतासिद्ध्यर्थं मृतशरीरे पुनः प्राणप्रतिष्ठापनं कर्तुं मुख्यकालो भूत्वा (यात्) अधिकारसम्पदास्त्विति भवन्तो ब्रुवन्तु । अधिकारसम्पदस्तु । प्राणानायम्य ।

End:

यत्पाकत्रा मनसा दीनदक्षाणा(न) । यज्ञस्य मन्वते मर्तासः । अग्निष्टद्धोता क्रतुविद्विजानन् । यजिष्ठो देवाꣳ ऋतुशो यजाति (स्वाहा).

No. **3521.** **अन्नप्राशनम्.**

ANNAPRĀŚANAM.

Substance, palm-leaf (Śrītāla). Size, $7\frac{1}{8} \times 1\frac{1}{2}$ inches. Pages, 2. Lines, 9 on a page. Character, Telugu. Condition, good. Appearance, new.

Complete.

Begins on fol. 12*b*. The other works herein are:—Gṛhapravēśahōma 1*a*, Āgnēyasthālīpāka 2*b*, Aupāsana 4*a*, Śēṣahōmaprayōgaḥ 4*b*, Garbhādhāna 7*a*, Sīmanta 7*b*, Puṁsavana 9*a*, Jātakarmanāmakaraṇa 9*b*, Caulam 13*a*, Upanayana 14*a*, Itihāsa 15*a*, Mahānyāsa 22*a*, Mahāsaṅkalpa 26*a*, Rudrapraśna 31*a*, Maṅgalāśāsana 32*a*.

Regarding the details of the ceremony connected with feeding a child with solid food for the first time. According to the **Yajurvēda**.

Beginning:

अथान्नप्राशनम्—

जन(न्म)नोऽधिषष्ठे मासि तत्र पुण्याहं वाचयित्वा, गृहमखं चाभ्युदयं च कृत्वा, रक्षाबन्धनं च कुर्यात् । अपरेद्युर्मङ्गलस्नातो भूत्वा, प्राणानायम्य इमं महेश्वरशर्माणं कुमारमन्नप्राशनाख्येन कर्मणा संस्करिष्ये ॥

End:

महेश्वरशर्मन् इति कुमारं सकृत् प्राशयित्वा । तैत्तिरेण मांसेनेत्येके ॥

Colophon:

इत्यन्नप्राशनम् ॥

No. 3522. अन्वारोहणविधिः.

ANVĀRŌHAṆAVIDHIḤ.

Pages, 22. Lines, 4 on a page.

Begins on fol. 34a of the MS. described under No. 2973.

Complete.

On the process of the ceremony of Satī.

Beginning:

शूर्पकञ्चुकादीनि यथाशक्ति दत्वा, उत्क्रान्तितिलपात्रदशदानानि दत्वा, पुनस्संकल्पं कृत्वा, आत्मनो भर्तुश्च समस्तपापक्षयार्थं नरकोत्तारणार्थमनेकस्वर्गादिलोकमोक्षफलावाप्त्यर्थं मम भर्त्रा सह नित्यनिरतिशयानन्दादिभूतश्रीविष्णुलोकप्राप्त्यर्थं मम पुत्रपौत्रामित्रादीनामायुरारोग्यैश्वर्याभिवृद्ध्यर्थं सकलश्रुतिस्मृतिपुराणेतिहासादिकल्पोक्तसंपूर्णसकलफलावाप्त्यर्थं मम भर्त्रा सह अन्वारोहणं करिष्ये—इति संकल्प्य, ब्राह्मणान् पतिं नमस्कृत्य, चितिं प्रदक्षिणीकृत्य, पतिं नारायणश्च ध्यायति.

End:

एवं तिथौ पितृगोत्रस्य शर्मणः प्रेतस्य [मर] सपिण्डीकरणाख्यान्नश्राद्धे पितृपितामहप्रपितामहान् गोत्रान् रूपानुद्दिश्य मया कृतेनानेन पितुः श्राद्धीयतिलोदकपिण्डप्रदानेन पितृपितामहप्रपितामहानां रूपाणामुद्दिश्य मया दत्ताः पिण्डाः गयापिण्डसदृशमस्त्वि(शास्सन्त्वि)ति भवन्तो ब्रुवन्तु.

No. 3523. अपरकृष्णीयम्.

APARAKṚṢṆĪYAM.

Pages, 126. Lines, 18 on a page.

Begins on fol. 77a of the MS. described under No. 2714.

Regarding the details connected with the performance of obsequial ceremonies.

By Kṛṣṇa.

Complete.

Beginning:

अथा(नु)गमनप्रयोग उच्यते—

पत्युर्मरणसंशये पत्युस्सर्वप्रायश्चित्ताचरणकाले पत्नी यथोक्तस्त्रीप्रायश्चित्तं कृत्वा, यथाशक्ति गोदानादिदानानि कृत्वा, भर्त्रे प्राणदानं कुर्यात् । तत्प्रयोगः—

एवंतिथौ श्रीमत्याः अमुकगोत्राया मम भर्तृसालोक्यसिद्ध्यर्थं भर्त्रे प्राणदानं करिष्ये—इति सङ्कल्प्य,

भर्त(:)श्रीवासुदेवात्मन् त(त्व)त्सालोक्यपरीप्सया ।
मनोबुद्धीन्द्रियैस्सार्धं पञ्च प्राणान् ददाम्यहम् ॥

इति मन्त्रेण भर्तृहस्ते कर्षमात्रं सुवर्णं सोदकं दद्यात् । तत्सुवर्णं ब्राह्मणे दद्यात् । पत्युर्मरणानन्तरमपि प्राणदानं कुर्यात् । ततः पत्युः पैतृमेधिकसङ्कल्पात्पूर्वममुकगोत्रस्य(त्रायाः) मम समस्तपापक्षयार्थं स्वर्गलोके निवाससिद्ध्यर्थं भर्त्रा सहानुगमनं करिष्ये—इति सङ्कल्पं कुर्यात् । ततः कर्त्रा भर्तुः पैतृमेधिकसङ्कल्पादि(कं कृत्वा), वाहकैर्नियमैर्नीयमाने(न)पत्या स्वयं ब्रह्मरथमारुह्य, मङ्गळवाद्यैस्सह हरिद्राकुङ्कुमपाणिः पृष्ठतो गच्छेत् । अध्वनश्चतुर्थांशं गत्वा बलिदानार्थं पत्यौ संवेशिते पत्युर्मुखमवलोकयन्ती वामभागे तिष्ठेत् ।

End :

आनन्दाय . . गृहान् । अप नश्शोशुच . . स्वाहा । इति स्रुवेण जुहोति । अग्नये शुचय इति त्यागः । पुनश्चतुर्गृहीतं गृहीत्वा न वै तत्र प्रमीयते . . पशुः । यत्रेदं ब्रह्म क्रियते . . व॰स्वाहा । अग्नये शुचय इदम् ॥

Colophon :

अपरकृष्णीयं समाप्तः(म्) ॥

No. 3524. अपरप्रयोगः.

APARAPRAYŌGAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 38*a* of the MS. described under No. 3302.

Subject, same as that of the above.

Incomplete.

Beginning :

श्रीवैकुण्ठं गमिष्यन्तं पुरुषं शं नो (दे)वी . शंयोरभिस्रवन्तु नः ; आपो वा इदं . सुवराप ओम् ; द्रुपदादिव मुञ्चतु . मैनसः ;

* * * *

इत्ये(तै): मन्त्रैस्संस्नाप्य, ऊर्ध्वपुण्ड्रादि धारयित्वा, भगवत्पादोदकं तद (दीयपादो) दकं प्राशयित्वा, अशेषे हे परिषत् स्वीकृत्य, गोत्रस्य शर्मणः पितुः पापानुगुणं द्वादशाब्दादिकृच्छ्रं कर्तुं योग्यता(सिद्धिमनु)गृहाण । प्राणानायम्य, सङ्कल्प्य,

End :

चतुर्गृहीतेनाज्येन हुत्वा अनाज्ञातहोमात् औपासनान्तं हु(त्वा) संस्कुर्यात् ॥

No. 3525. अपरप्रयोगः.

APARAPRAYŌGAḤ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{4}$ inches. Pages, 150. Lines, 6 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Quotes the Kātyāyanakārikā here and there in the body of the work.

The Prayōga itself is based on the Kātyāyanakārikā.

Incomplete.

Beginning :

कात्यायनोक्तकारिकानुसारेण संस्कारविधिं वक्ष्ये—

पुत्रः पितुर्मरणकाले जन्मप्रभृत्येतत्क्षणपर्यन्तं ज्ञानाज्ञानकृतपापशमनार्थं यथाशक्ति दानं दद्यात् ।

आदौ धेनुस्ततो भूमिः तिलस्वर्णे घृताम्बरे ।
धान्यं गुडं च रजतं लवणं च यथाक्रमम् ॥

ब्राह्मणेभ्यो दत्वा प्रायश्चित्तं च कारयेत् । पुत्रः पितुरङ्गं गो(गङ्गो)दकेन सालग्रामजलेन प्रोक्ष्य, उत्क्रान्तिगोदानं . . . . . लौकिकाग्निमाहृत्य, पञ्चपदार्थं कृत्वा, (सं)स्थाप्य[ा]परिस्तरणादिपर्युक्षणान्तं कृत्वा, आज्येन प्रजापतये इन्द्राय अग्नये सोमाय भूः स्वाहा, भुवः स्वाहा, स्वः स्वाहा, अयाश्चाग्नेमेनो ज्योतिः.

End :

अथाभ्युदयिके श्राद्धे प्रदक्षिणमुपचारः, पूर्वाह्ने पितृमन्त्रवर्जञ्जपं(पः) ऋजवो दर्भा यवैस्तिलार्थान् प्रकुर्वीत, दधिबदराक्षतमिश्राः पिण्डाः, सम्पन्नमिति तृप्तप्रश्नः सुसम्पन्नमिति ब्रूयुः.

No. 3526. अपरप्रयोगः.

APARAPRAYŌGAḤ.

Substance, palm-leaf. Size, $17\frac{?}{?} \times 1\frac{1}{4}$ inches. Pages, 97. Lines, 7 on a page. Character, Grantha. Condition, much injured. Appearance, old.

Complete.

Copying finished by Naḍādur Anantāchāriar on Wednesday the 26th Āvaṇi in the year Śrīmukha.

Beginning :

अशेषे हे परिषत् स्वीकृत्य, गोत्रस्य शर्मणः मम पितुः प्राणानां वियोगकाले जीवप्रायश्चित्तं कर्तुं योग्यतासिद्धिमनुगृहाण । प्राणानायम्य, सङ्कल्प्य, पञ्चम्यां पुण्यतिथौ गोत्रस्य शर्मणः मम पितुः प्राणानां वियोगकाले बाल्यकौमार . . . .

एतेषां पापानां सद्योऽपनोदनार्थं मम पितुः समस्तपापक्षयार्थं प्राजापत्यकृच्छ्रप्रतिनिधिं यत्किञ्चिद्धिरण्यरूपेण करिष्य इति सङ्कल्प्य, तद्द्रव्यं श्रीवैष्णवेभ्यो दत्वा.

End :

स्वर्णपुष्पं समर्पयामि, पिण्डकरणावशिष्टमन्नं ग्रासमात्रं प्राणे निविष्टोऽमृतं जुहोमि ब्रह्मणि मा(म आ)त्माऽमृतत्वायेति प्राश्य, उपवी(ती) . .

पिण्डानप्सु प्रक्षिपेत् । मध्यमपिण्डं पत्न्यै दद्यात् । अग्निमु(ग्नेरु)पस्थानं कृत्वा, आत्मसमारोपणं कृत्वा, परेऽहनि तर्पणमाब्दिकपर्यन्तं न कुर्यात् ॥

No. 3527. अपरप्रयोगः(सर्वानुक्रमणिका).

APARAPRAYŌGAḤ (SARVĀNUKRAMAṆIKĀ).

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{1}{2}$ inches. Pages, 260. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, old.

Incomplete.

Beginning :

सदाचार्यपदाम्भोजसंश्रयान् सद्गुणार्णवान् ।
सतः प्रणम्य कलये सर्वानुक्रमणीं पराम् ॥
महतां सेवया योऽर्थः पैत्रे(पित्र्ये) संशीलितः पुरा ।
तस्याविस्मरणायैव यत्नोऽयं क्रियते मया ॥
सूत्रभाष्यनिबन्धादीन् प्रौढानाञ्चैव सङ्ग्रहान् ।
ग्रन्थानालोक्य विविधाननुष्ठानङ्गरीयसाम् ॥
अकल्यानामपि प्रायः प्रयोगपटुताप्तये ।
सन्दिग्धार्थप्रकाशाय संक्षिप्यैषा प्रकाश्यते ॥
कारिकास्तत्र लिख्यन्ते प्रायशस्स्मृतिषूदिताः ।
सङ्गृह्य स्फुरणार्थाय नव्याः क्वचिदुदीरिताः ॥
विना मूलप्रमाणेन न किञ्चिदपि वर्ण्यते ।
तस्मादत्रोदितार्थेषु विस्रम्भः क्रियतां बुधैः ॥
प्रेतं पितॄंश्च निर्दिश्य भोज्यं यत्प्रियमात्मनः ।
श्रद्धया दीयते यत्तु तच्छ्राद्धं परिकीर्तितम् ॥

विष्णुपुराणे—

पूर्वाः क्रिया मध्यमाश्च तथा चैवापराः क्रियाः ।
त्रिप्रकाराः क्रिया ह्येतास्तासां भेदमिमं शृणु ॥
दाहाद्येकाहपर्यन्ताः क्रियाः पूर्वास्ततस्तु याः ।
सापिण्ड्यान्ता मध्यमास्स्युस्तदूर्ध्वा अपराः क्रियाः ॥
इत्येवं त्रिप्रकारेषु कर्तव्यक्रम उच्यते ।
वक्ष्यमाणानुक्रमस्तु सङ्ग्रहात्प्रतिपाद्यते ॥
उपोद्घातश्च सङ्कीर्णे परिभाषा च कर्तृता ।
अग्निस्सन्धिर्दुर्मृतादिनिवेशोऽमन्त्रसंस्क्रिया ॥

पितृमेधब्रह्ममेधावन्तर्वत्न्यादिसंस्क्रिया ।
ततो दशाहकृत्यं स्यादेकाहश्चेति पूर्वतः ॥

इत्युपोद्घातः ॥

श्रुतिस्स्मृतिस्सदाचारस्स्वस्य च प्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्ममूलमिदं स्मृतम् ॥

End:

विरुणद्ध्यन्यथा सत्यव्रतवाक्यं यथा च तत् ॥
यस्मिन्राशौ स्थिते भानौ यो मृतिं प्रतिपद्यते ॥
तदा तद्राशिमापन्ने भानावाब्दिकमाचरेत् ॥

इति मध्यक्रिया ॥

* * * *

भ्रात्रे भगिन्यै पुत्राय स्वामिने मातुलाय च ।
मित्राय गुरवे श्राद्धमेकोद्दिष्टन्न पार्वणम् ॥
यश्च मन्त्रं तदर्थं वा यश्च विद्यां प्रयच्छति ।
गुरू तावपि जानीयात्तयोर्नैव तु पार्वणम् ॥

श्राद्धोद्देश्यविषये.

No. **3528.** अपरप्रयोगः.

APARAPRAYŌGAḤ.

Substance, palm-leaf. Size, 6 × 1⅜ inches. Pages, 66. Lines, 8 on a page. Character, Nandināgarī. Condition, good. Appearance, new.

Wants the first leaf. Breaks off in Vidhavāprāyaścitta.

Ṛgvēdaprayōga.

Incomplete.

Beginning:

मन्युराये निधिमद्यं[द्यं] करामहे सुपुरुधस्रवांसि ता नो विश्वानि जरिता ममत्तु परातरं सु । अभीष्वामर्यः पौंस्यैर्भवेम द्यौर्न भूमिं गिरयो नाजानु. . . . .

अथ नवश्राद्धविधिरुच्यते—

समस्तसंपत् । ब्रह्मदण्डः । पितुः शर्मणः गोत्रस्य प्रेतस्य प्रेतान्तर्यामी . . . . . अन्धत्वबधिरत्वमूकत्वनिर्हरणार्थं नवश्राद्धं कर्तुं मम मुख्यकालो भूत्वा(यात्) अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । पुनः अधिकारसम्पदस्तु ।

End:

मित्रपत्नीदुहितृ(पुत्र)पत्नीरजस्वलाशरणागताप्रव्रजितानिषिद्धस्त्रीगमनादिगुरुतल्पसमरूपपातकेभ्यः गोवधव्रात्यत्वसामान्यस्तेयद्रव्यरु(ऋ)णाद्यपहरणाद्युपपातकेभ्यः खरोष्ट्रमृगमीनाहिमहिषीवधादिसङ्कलीकरणेभ्यः क्रिमिकीटकवधमद्यानु.

No. **3529.** अपरप्रयोगः.

APARAPRAYŌGAḤ.

Substance, palm-leaf. Size, 11¼ × 1¼ inches. Pages, 64. Lines, 7 on a page. Character, Nandināgarī. Condition, slightly injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are–Prāyaścittaprayōga 33*a*, Āśvalāyanapūrvaprayōga 51*a*, Maṇimañjarī 78*a*, Viṣṇusahasranāma 88*a*, Vighnēśvarapūjā 104*a*, Saptarṣistōtra 130*a*, Gajēndramōkṣa 132*a*, Kṛṣṇastuti 136*a*.

Same work as the above.

Incomplete.

No. **3530.** अपरप्रयोगः.

APARAPRAYŌGAḤ.

Pages, 47. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 115.

Complete.

Prayōga according to Āśvalāyana-sūtra.

At the end there are 7 pages describing the method of preparing Pañcagavya.

Beginning:

सङ्कल्प्य—थौ यजमानस्य पितुः पश्चानां वायूनामनिरोधि(ध)तो ब्रह्मरन्ध्रेण सुखोत्क्रमणसिद्ध्यर्थमनन्तरं विष्णुलोकावाप्त्यर्थं सम्भावि(म्भव)-ता नियमेन सम्भविद्रव्यैश्च . . . कालकर्तव्य उ(मु)त्क्रान्ति-गोदानङ्करिष्ये । ब्राह्मणमभ्यर्च्य, दानमन्त्रः—

अत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यं संप्रद(दे) धेनुमिमामुत्क्रान्तिसंज्ञिकाम् ॥

End:

पिण्डार्चनपात्रं(त्रेण) सह नदीं गत्वा, तटाकादिषु उत्सृज्य, स्नात्वा, गृहं गत्वा, अभ्यञ्जनं कृत्वा, अशुभनिवृत्त्यर्थं शुद्धिपुण्याहवाचनं कृत्वा, अलक्ष्मीपरिहारार्थं निरीक्षितकनकाज्यदानङ्कृत्वा, सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ॥

No. 3531. अपरप्रयोगः.

APARAPRAYŌGAḤ.

Pages, 46. Lines, 8 on a page.

Begins on fol. 27*a* of the MS. described under No. 63.

Prayōga according to Drāhyāyaṇasūtra.

Same subject as that of the above.

Beginning:

प्रयाणकाले भारद्वाजगोत्रस्य नारायणशर्मणः पितुः श्रीवैकुण्ठप्राप्त्यर्थं कर्णमन्त्रजपं करिष्ये—इति संकल्प्य । वेदादिवेदान्तानि . . . तवश्यावीयानि सामानि ।

गानप्रकारः—ओ त म्रा इ । आ या दू ही वो इ तो या म्रे इ । तो का या म्रे इ ।

End:

यवदानम्—

यवास्समस्तधान्यानां राजानः परिकीर्तिताः ।
पवित्रा मुनिभिः प्रोक्ता अतश्शान्तिं प्रयच्छ मे ॥

No. 3532. अपरप्रयोगसङ्ग्रहः.

APARAPRAYŌGASAṄGRAHAḤ.

Substance, palm-leaf. Size, $14\frac{3}{4} \times 1\frac{1}{4}$ inches. Pages, 21. Lines, 7 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Yallājīya 16*a*.

Same subject as that of the above.

Complete.

Beginning:

अथाहिताग्नेरन्त्येष्टिः—

सुखोत्क्रमणार्थं ब्राह्मणाय गां दत्वा, नानानमिति चतुरो वर्गान् जप्त्वा, नारायणं स्मरेत्; न स्त्रीणामित्येके । कर्ता ब्राह्मणैरनुज्ञातो वपनक्रियामाचरेत् ।

End:

चतुर्दिशामुपस्थानम्, अपः यत्पिबति, स्वादते, मोदते । लाङ्गलं चोद्धरेत्तेन देवानृषीन् पितॄन् प्रीणाति । यस्योत्सृजतीत्याहाश्वलायनः । तिलानुदकुम्भं हिरण्यं वासो दक्षिणा ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयी(ये)त ॥

No. **3533.** अर्कविवाहः.

ARKAVIVĀHAḤ.

Substance, palm-leaf. Size, 16⅜ × 1¼ inches. Pages, 2. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 29*a*. The other works herein are—Prayōgacandrikā 1*a*, Ṛtuśāntiprayōga 3*a*, Palāśahōma 5*b*, Putrasaṅgraha 7*a*, Āturādisnānavidhi 11*a*, Ṣaṣṭipūrtividhāna 15*a*, Kṛkalāsaśāntiḥ 16*a*. Nālavēṣṭanaśānti 18*a*, Navagrahajapādi 20*a*, Pañcasaṁskāravidhi 23*a*, Bījadānasaṅkalpa 24*a*, Kūśmāṇḍahōma 25*a*, Gandharvanaṣṭaprāyaścitta 28*a*, Punarvivāhādiprayōga 30, Sudarśanahōmaḥ 35*a*, Srīpañcasaṁskāra 39*a*, Śūdrapañcasaṁskāra 41*a*, Mṛttikāsnānavidhiḥ 44*a*, Brahmacārinārāyaṇabali 46*a*, Brahmakūrcavidhi 48*a*, Pratiṣṭhākālavidhi 52*a*, Pratiṣṭhākrama 54*a*, Grahaprōkṣaṇavidhi 58*a*.

On marrying the Arka plant.

For extracts *vide* No. 2900.

Complete.

No. **3534.** अर्कविवाहः.

ARKAVIVĀHAḤ.

Pages, 2. Lines, 7 on a page. Character, Nandināgarī and Grantha.

Begins on fol. 35*a* and is contained in Āpastambapūrvāparaprayōgaḥ which begins on fol. 18*a* of the MS. described under No. 1058.

Complete.

Beginning:

यजमानः गन्धाक्षतपुष्पनैवेद्यताम्बूलदक्षिणालाजाज्यानि वस्त्राणि च तण्डुलानि च गृहीत्वा, ब्राह्मणैस्सह देवालये नदीतीरे वा गत्वा, तत्रस्थमर्कमभितो देशं गोमयेनोपलिप्य.

End:

अर्कविवाहाङ्गमभ्युदयं हिरण्यरूपेण करिष्य इति (सङ्कल्पं) कृत्वा पुण्याहं कुर्यात् । ब्राह्मणान् संपूज्य, अथ ब्राह्मणभोजनं कुर्यात् ॥

Colophon:

अर्कविवाहं(हः) संपूर्णः ॥

No. **3535.** अर्कविवाहः.

ARKAVIVĀHAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 105*a* of the MS. described under No. 2908.

Complete.

Same subject as that of the above.

Beginning:

अथार्कविवाहश्शौनकीये [अथार्कविवाहः] तृतीये विवाहे प्राप्ते अर्कविवाहं कुर्यात्तस्यायं प्रयोगः—

पूर्वेद्युर्नान्दीश्राद्धं कुर्यात् । वाद्यमङ्गलतूर्यघोषसहितोऽर्कसमीपं गत्वा, स्थलशुद्धिं कृत्वा, अर्कवृक्षमलङ्कृत्य, वस्त्रद्वयेनावेष्ट्य, प्रतिसरसूत्रं बद्ध्वा, अग्निरायुष्मानिति पञ्चभिर्मन्त्रैर्बृहत्सामेति च बद्ध्वा.

End:

अर्कं प्रदक्षिणीकृत्य.

नमस्ते मङ्गले(लं)देहि नमः[स्ते] सवितुरात्मजे ।
त्राहि मां कृपया देवि पत्नीत्वं सुमहा(समुपा)गता ॥
नयत्कृ(मया कृ)तमिदं कर्म स्थावरेषु जरायुणा ।
अपत्यकानि नो देहि सर्वं स(क्ष)न्तुमिहार्हसि ॥

इत्युक्त्वा, होमशेषं समाप्य, अर्कालङ्करणादीन्याचार्याय दद्यात् । एवं कृत्वा, मानुषीं कन्यां विवहेत् । पुत्रपौत्रा(दिमा)न् भवति ॥

No. **3536.** अशनिहतशान्तिः.

ASANIHATASANTIH.

Pages, 4. Lines, 7 on a page.

Begins on fol. 14b of the MS. described under No. 3239.

On the Sānti to be performed when houses, temples, palaces, &c., are struck by lightning.

Complete.

Beginning:

अशनिहतशान्तिविधिं व्याख्यास्यामः—

वसन्तो(न्ते)ग्रीष्मे शरदि का(ले) देवगृहे प्रासादे राजगृहे ग्राममध्ये गोष्ठे जनसमूहे धनधान्यसमूहे ब्राह्मणसमूहे बृन्दावने वननालिकेरक्रमुकतरुवनचूतवनान्तरे अशनिहते वा शतक्रतुस्थाने यजमानस्य क्षोणीवृद्धिर्भवेत्। आग्नेयां(य्यां) राजराष्ट्रविनाशनम्। याम्यां(म्य)स्थाने गोधनधान्यविनाशनम्।

End:

आचार्याय सहस्रदक्षिणां ददाति। अशनिहतशान्तिर्भवतीत्याह भगवान् बोधायनः ॥

Colophon:

इति अशनिहतशान्तिस्समाप्ता ॥

No. **3537.** अश्वत्थप्रतिष्ठाविधिः.

ASVATTHAPRATISTHĀVIDHIH.

Pages, 3. Lines, 3 on a page.

Begins on fol. 27b of the MS. described under No. 2973.

On the religious planting of the Asvattha-tree.

Complete.

Beginning:

अश्वत्थप्रतिष्ठाविधिं व्याख्यास्यामः—

उदगयन आपूर्यमाणपक्षे पुण्येषु नक्षत्रेषु इदं विष्णुरिति मन्त्रेण ब्रह्मवृक्षसमिद्भिः पायसेनाज्येनाष्टोत्तरशतं जुहुयात्।

End:

अनुज्ञां गृहीत्वा, सुहृद्भिस्सह बन्धुभिः ब्राह्मणान् भोजयित्वा गृहं व्रजेत् ॥

कृत्वाश्वत्थप्रतिष्ठां तु विधिनानेन मानव।
स याति वैष्णवं लोकमश्वत्थदलसंख्यया ॥

Colophon:

इति अश्वत्थप्रतिष्ठाविधिः ॥

No. **3538.** अष्टकाश्राद्धम्.

ASṬAKĀSRĀDDHAM.

Pages, 5. Lines, 19 on a page.

Begins on fol. 95a of the MS. described under No. 199.

Relates to the ceremony performed on behalf of the manes of the departed on the 7th, 8th and 9th days of the dark fortnight in the month of Māgha.

Complete.

Beginning:

या माघ्याः पौर्णमास्या उपरिष्टाद्व्यष्टका तस्यामष्टमी ज्येष्ठया सम्पद्यते, तामेकाष्टकेत्याचक्षते। तस्यास्सायमौपासकाव्य(नार्थ)मपूपं चतुश्शरावꣳ श्रपयित्वाष्टाकपाल इत्येके।

* * * *

सप्तम्यां रात्रौ सायमौपासनं कृत्वा, प्राचीनावीती, प्राणानायम्य, अष्टकाश्राद्धङ्करिष्य इति सङ्कल्प्य, यज्ञोपवीती भूत्वा, अपूपं चतुश्शरावꣳ श्रपयति.

End:

उत्तरार्धात्स्विष्टकृते ऽवदाय, मांसौदनं पिष्टान्नञ्चावदायाभिघार्य, अग्नये स्विष्टकृते स्वाहा—अग्नये स्विष्टकृत इदम्। अन्नाभिमर्शादिशेषं मासिश्राद्धावत्कुर्यात् ॥

No. **3539.** अग्नेयस्थालीपाकः.

ĀGNEYASTHĀLĪPĀKAḤ.

Pages, 4. Lines, 9 on a page.

Begins on fol. 2*b* of the MS. described under No. 3521.

On a cooked offering to the sacred fire.

Complete.

Beginning:

अथैनामाग्नेयेन स्थालीपाकेन याजयति—

दर्भेष्वासीनो जरुह(दर्भान् धारयमाणः पत्न्या सह) प्राणानायम्य, एनां वधूमाग्नेयेन स्थालीपाकेन याज इ(यि)ष्य (इ)ति सङ्कल्प्य, व्रीही-(न्पत्न्यवहन्ति चरु)न्निरू(प्य)[दर्भान् धारयमाणः पत्न्या सह] प्रोक्ष्य, श्रपयित्वा, अभिघार्य, प्राचीनमुदीचीनं वोद्वास्य, प्रतिष्ठितमभिघार्य, अग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वारब्धायां स्थालीपाकाज्जुहोति ।

End:

पूर्ववत्स्थालीपाकं हुत्वा । एवममावास्यायां दर्शस्थालीपाकेन यक्ष्ये—इति सङ्कल्पः ॥

No. **3540.** आचमनादिप्रयोगः.

ĀCAMANĀDIPRAYŌGAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 34*a* of the MS. described under No. 430.

On the manner in which Ācamana should be performed. This consists in sipping water three times by taking a small quantity of it each time on the palm of the hand.

Beginning:

पुराणाचमनम्—

केशवाद्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ ।
गण्डोष्ठौ स(सं) मृजेद्द्वे द्वे एकैकं पाणिपादयोः ॥

मूर्ध्नि चैकं वचस्येकं नासाक्ष्णोः कर्णयोर्द्वयोः ।
बाह्वोर्नाभौ च हृद्देशे मूर्ध्नि चैकं विनिक्षिपेत् ॥

End:

मुण्डनञ्चोपवासश्च गौतम्यां सिंहगे गुरौ ।
कन्यागते तु कृष्णायां न तु तत्तीरवासिनाम् ॥
तीर्थश्राद्धे नित्यश्राद्धे आमश्राद्धे तथैव च ।
मासिकानि सपिण्डानि अन्नसूक्तानि वर्जयेत् ॥

No. **3541.** आचार्यभिक्षाप्रयोगः.

ĀCĀRYABHIKṢĀPRAYŌGAḤ.

Pages, 2. Lines, 21 on a page.

Begins on fol. 97*b* of the MS. described under No. 199.

On how a disciple should collect alms for his आचार्य or religious instructor.

Complete.

Beginning:

अथ शिष्टानां मन्त्राणां विनियोगमाह—आचार्यार्थं भिक्षां(करो)मीति सङ्कल्प्य, स नित्योत्तरां जपित्वार्थं ब्रूयात् । अन्नमिव ते दृशे भूयासं, वस्त्रमिव ते दृशे भूयासं, वित्तमिव ते दृशे भूयासम्.

* * * *

आचार्यार्थं भवन्तु भिक्षा मि(इ)ति सप्त मन्त्राञ्जपित्वा बोधयति, रथं लब्ध्वा, योजयित्वा, प्राञ्चमवस्थाप्य, उत्तरया रथचक्रे अभिमृशति.

End:

करौ(लौ) त्रिंशत्सहस्राब्दे पूर्णे नष्टा भवन्ति ते ।
निश्शेषताङ्गताः पश्चादध्येता(या)र्थानुचिन्तकाः ॥

दीपादिस्पर्शप्रायश्चित्तम्––

दीपाग्रन्दीपतैलश्च भस्म चास्थि रजस्वलाम् ।
एतानि ब्राह्मणस्स्पृष्ट्वा सवास(ः)जलमाविशेत् ॥

No. 3542. आतुरसन्न्यासप्रयोगः.

ĀTURASANNYĀSAPRAYŌGAḤ.

Pages, 5. Lines, 4 on a page.

Begins on fol. 41*a* of the MS. described under No. 3029.

On how one who is seriously ill may be made into a Sannyāsin

Complete.

Beginning:

आतुरसन्न्यासविधिं व्याख्यास्यामः—

अरण्ये सङ्कटे घोरे चोरव्याघ्रेषु (घ्रादि)गोचरे ।
भयं प्राप्तस्य सन्न्यासः(सं) कर्तव्यं मनुरब्रवीत् ॥
आतुराणां विशेषोऽस्ति न विधिर्नैव च क्रिया ।
प्रेषमात्रं तु सन्न्यास आतुराणां विधीयते ॥

व्याधिग्रस्ते आतुरः वपनपूर्वकं सम्यक् स्नात्वा, धौतवासः परिधाय, प्राङ्मुख उपविश्य, प्राणानायम्य, सङ्कल्प्य, यथाशक्ति गोभूसाळग्रामदानानि दत्वा, पुनः प्राणानायम्य, मम समस्तपापक्षयद्वारा ब्रह्मलोकावाप्त्यर्थमातुरसन्न्यासं करिष्य इति संकल्प्य, आतुरः अपां समीपं गत्वा पात्राभ्यामप उद्धृत्य ।

End:

दशभिर्जन्मभिर्वेदं(दं) वेदार्थं शतजन्मभिः ।
सहस्रजन्मभिस्सोमं सन्न्यासं कोटिजन्मभिः ॥

मृतेऽपि सन्न्यासधर्मेण और्ध्वदेहिकं कुर्यात् । अनाहिताग्नेरयमातुर सन्न्यासविधिः ॥

No. 3543. आतुरसन्न्यासप्रयोगः.

ĀTURASANNYĀSAPRAYŌGAḤ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{1}{3}$ inches. Pages, 12. Lines, 4 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 18*a*. The other work herein is, Tōṭacakram.

Same work as the above.

No. 3544. आतुरसन्न्यासप्रयोगः.

ĀTURASANNYĀSAPRAYŌGAḤ.

Substance, palm-leaf. Size, $13\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 5. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 12*a*. The other works herein are, Kūṣmāṇḍahōmavidhi 1*a*, Gaṇahōma 5*b*.

Incomplete.

Same work as the above.

No. 3545. आतुरादिस्नानविधिः.

ĀTURĀDISNĀNAVIDHIḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 11*a* of the MS. described under No. 3533.

On how one who is ill is to be given the religious bath.

Beginning:

आतुरस्नान उत्पन्ने दशकृत्वो ह्यनातुरः ।
स्पृष्ट्वा स्पृष्ट्वा पुनस्स्नायात् हतवाससपूर्वक(ःपुरस्सर)म् ॥
स्त्रीणान्तु पूर्ववत् स्पृष्ट्वा हरिद्रादानपूर्वकम् ।
हतवस्त्रधृता कुर्यात् प्रसूताशुचिवा(ता) भवेत् ॥

पुमांश्चे(पुंसाश्चे)द्भागवतकरस्पर्शं, स्त्रीणाञ्चेत् स्त्रीकरस्पर्शनम् । त्रीन् पञ्च वा संख्याप्रकारः स्पर्शक्रमः ।

* * * *

गोत्राया नाम्न्याः प्रसूतिका(या)रजस्वला(या) वा मन्त्रस्नानविधिना मन्त्रस्नानङ्करिष्य इति यथोचितं सङ्कल्प्य, गोमयेन चतुरश्रमुपलिप्य, तन्मध्ये प्रस्थाष्टभिर्धान्यैस्तदर्धं तण्डुलैस्तत्पादन्तिलैरुपर्युपरि निक्षिप्य ।

End:

आपस्सर्वस्य भेषजीस्तास्ते कृण्वन्तु भेषजम्—इति तीर्थं प्राशयित्वा, आशीर्वादङ्कुर्यात् ॥

Colophon:

इति सूतिकारजस्वलामन्त्रस्नानविधिः ॥

No. 3546. आधारशक्तिप्रयोगः.

ĀDHĀRAŚAKTIPRAYŌGAḤ.

Substance, palm-leaf. Size, 17¼ × 1⅛ inches. Pages, 3. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Complete.

Begins on fol. 8*a*. The other works herein are :—

	Fol.		Fol.
Prārthanāṣōḍaśī	1*a*	Ārādhanakramasaṅgraha	13*a*
Ārādhanakramaḥ ..	3*a*	Ammālsantatikrama ..	17*a*
Brahmakūrcavidhi ..	9*a*	Gōdāstutiḥ	18*a*
Mūlamantranyāsa ..	11*a*	Śaraṇāgatidīpikā ..	19*a*
Śaraṇāgatimantranyāsa ..	11*b*	Hayagrīvastōtram ..	22*a*
Viṣṇuṣaḍakṣarīmantranyāsa	12*a*	Dēhalīśastutiḥ	23*a*
Nṛsiṁhaikākṣaramantranyāsa	1*a*2	Nyāsadaśakam	24*b*
Nṛsiṁhakavaca	12*b*	Nyāsatilakam	25*a*
		Nyāsaviṁśatiḥ	27*a*

	Fol.		Fol.
Paramārthastutiḥ ..	28*b*	Rāmāṣṭōttaraśatanāma ..	44*a*
Darśapūrṇamāsēṣṭiprayōga	30*a*	Rāmāṣṭōttaraśatanāmāvaliḥ	45*a*
Vibhāgaviṣayavacanāni	33*a*	Navagrahāṣṭōttaram ..	47*a*
Prāyaścittaprayōgakārikā	36*a*	Bhūstutiḥ	48*a*
Grahaṇaśrāddhanirṇaya	38*a*	Ammālmaṅgalāśaṁsanam	52*a*
Aṣṭōttaraśatadivyadēśanāmāni	40*a*	Nṛsiṁhāṣṭōttaraśatanāmāvaliḥ	53*a*
Veṅkaṭēśasuprabhātam ..	42*a*	Saṅkramaṇirṇayavacanāni	54*a*
Nṛsiṁhāṣṭōttaraśatanāma	43*a*	Viraktasannyāsaviṣayavacanāni	56*a*

Beginning:

ओम् आधारशक्त्यै नमः, ओं प्रकृत्यै नमः, ओम् अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः, ओमनन्ताय नागराजाय नमः, ओं भूं भूम्यै नमः, ओं श्रीवैकुण्ठाय दिव्यलोकाय नमः ।

End:

ओं सर्वेभ्यो भगवद्दिव्यपरिच्छदेभ्यो नमः; ओं समस्तपरिवाराय श्रीमते नारायणाय नमः ॥

ए(ये)के चास्मत्कुले जाता अपुत्रा गोत्रजा मृताः ।
ते गृह्णन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

No. 3547. आपस्तम्बपितृमेधप्रयोगः.

ĀPASTAMBAPITṚMĒDHAPRAYŌGAḤ.

Pages, 110. Lines, 21 on a page.

Begins on fol. 148*a* of the MS. described under No. 199.

On the conduct of funeral rites according to Āpastamba.

Complete.

Beginning:

पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ पितुर्गोत्रस्य शर्मणः सुखेन प्राणोत्क्रमणसिद्ध्यर्थमुत्क्रान्तिधेनुदानङ्करिष्ये.

*　　*　　*　　*

वाहकवरणं कुर्यात् । प्रेतस्य दक्षिणपाणिं लौकिकाग्नौ समीपे निधाय । कर्ता प्रेतं स्पृष्ट्वा उपावरोह जातवेदः.

End:

आर्द्रवासास्स्वगृहं प्रविश्य, उष्णोदकेन स्नात्वाचम्य, वस्त्रद्वयमाच्छाद्याचम्य, ततः प्राङ्मुखमुपवे(वि)श्य, प्राणानायम्य, पितुः पैतृमेधिककर्मान्ते इतः परं मङ्गळावाप्त्यर्थं शेषाणामायुष्याभिवृध्यर्थं ब्राह्मणैस्सह कर्मणः पुण्याहवाचनं कृत्वा, नूतनयज्ञोपवीतानि सन्धार्य ॥

Colophon:

पितृमेधं(ध)प्रयोगं(गः)समाप्तः ॥

No. **3548.** आपस्तम्बपुंसवनादिप्रयोगः.

ĀPASTAMBAPUṀSAVANĀDIPRAYŌGAḤ.

Pages, 9. Lines, 21 on a page.

Begins on fol. 60*b* of the MS. described under No. 199.

On the conduct of the Puṁsavana and other ceremonies according to Āpastamba.

Complete.

Beginning:

अथातः पुंसवनं व्याख्यास्यामः—

व्यक्ते गर्भे तृतीयमासि, चतुर्थे वा तिष्ययुक्तेऽहनि प्रातरौपासनं हुत्वा, नान्दीमुखं कृत्वा, ब्राह्मणान्निमन्त्र्य, कर्माङ्गश्राद्धं कृत्वा, प्राणानायम्य, गणपतिं संपूज्य, पुनः प्राणानायम्य, पुंसवनाङ्गत्वेन पुण्याहवाचनं करिष्ये.

End:

अंहोमुचमाङ्गिरसं गयन्तः स्वस्त्यात्रेयं मनसा च ताक्ष्यम् । प्रयतपाणिश्शरणं प्रपद्ये स्वस्ति सम्बाधेष्वभयं नो अस्तु ॥

शुभङ्शुभम् ॥

No. **3549.** आपस्तम्बपूर्वप्रयोगः.

ĀPASTAMBAPŪRVAPRAYŌGAḤ.

Pages, 26. Lines, 6 on a page. Character, Nandināgarī and Grantha.

Begins on fol. 18*a* of the MS. described under No. 1058.

On the conduct of those Gṛhya ceremonies which precede death. Prayōga according to Āpastamba.

Beginning:

नमस्सदसे . व्यै । कर्मारम्भमुहूर्तस्सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु । आदौ विघ्नेश्वरपूजां कुर्यात् । पञ्चम्यां शुभतिथौ धर्मप्रजासम्पत्त्यर्थं स्त्रियमुद्वोढुं वरान् प्रेषयिष्ये . . . . पार्वतीनाम्नीं कन्यां नप्त्रे पौत्राय पुत्राय सहिरण्योदकपूर्वकं यज्ञशर्मणे वराय प्रजासहत्वकर्मभ्यः प्रतिपादयामीति दद्यात् ।

कन्यां कनकसंपन्नां कनकाभरणैर्युताम् ।
दास्यामि विष्णवे तुभ्यं ब्रह्मलोकजिगीषया ॥

End:

ताम्बूलं चन्दनं पुष्पं वस्त्रमाभरणानि च ।
एकहस्तेन गृह्णीयात् दातुः श्रेयोऽभिवृद्धये ॥
कामधेनोस्समुद्भूतं सर्वक्रतुषु संस्थितम् ॥
देवानामाज्यमाहारमतश्शान्तिं प्रयच्छ मे ॥

अस्मै ब्राह्मणायेत्यादि . . ददे ॥

No. **3550.** आपस्तम्बपूर्वप्रयोगः.

ĀPASTAMBAPŪRVAPRAYŌGAḤ.

Substance, palm-leaf. Size, 15 × 2⅜ inches. Pages, 7. Lines, 12 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 42*a*. The other works herein are :—Śrīstuti 1*a*, Gōdāstuti 2*a*, Bhūstuti 3*b*, Dayāśataka 5*a*, Yatirājasaptati 10*a*, Varadarājapañcāśat 13*b*, Yathōktakāristōtra 16*b*, Aṣṭabhujāṣṭaka 17*a*, Śaraṇāgatidīpikā 17*b*, Nyāsadaśaka 21*a*, Nyāsaviṁśati 21*b*, Abhītistava 24*a*, Mahābhāṣya (5th Āhnika) 25*a*, Utpalaparimala (54 and 55th Addhyāya) 29*a*.

Same subject as that of the above.

Complete.

Beginning :

श्रावण्यां पौर्णमास्यां प्रातःकाले प्राणानायम्य, तैष्यां पौर्णमास्या- मध्यायोत्सर्जनाकरणप्रायश्चित्तार्थमष्टोत्तरसहस्रसङ्ख्यया कामोऽकार्षीन्मन्यु- रकार्षीदिति मन्त्रजपङ्करिष्य इति सङ्कल्प्य, तं मन्त्रं जपेत् । ब्रह्मचारी केशान्वापयेत् । अथापराह्णे, माध्याह्निकानन्तरं प्राणानायम्य, श्रावण्यां पू(पौ)र्णमास्यामध्यायोपाकर्म करिष्य इति सङ्कल्प्य, कटिसूत्रकौपीनोप- वीतमौञ्जयजिनदण्डान् नवान् ब्रह्मचारी धरेत् ।

End :

मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियन्दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ।

मन्त्रहीनं क्रियाहीनं . स्मरणं परम् ॥

प्रणम्याभिवादयेत् ॥

श्रीश्रीनिवासराघवगुरुणा कौण्डिन्यवंशसद्गुरुणा ।
आदिष्टेन तदेतल्लिखितं श्रीदेशिकाख्यदासेन ॥

No. **3551.** आपस्तम्बपूर्वप्रयोगः.

ĀPASTAMBAPŪRVAPRAYŌGAḤ.

Pages, 41. Lines, 21 on a page.

Begins on fol. 70*a* of the MS. described under No. 199. Complete.

Beginning :

प्राणसंयमनं प्रथमं भवेत् प्रेषणं सुहृदामभिमन्त्रणम् ।
सङ्गताय वराय समर्प्यते स्वामिना त(व)धूर्जलपूर्वकम् ॥

* * * *

तत्रायं प्रयोगः—

प्राणानायम्य, वरान् प्रेषयिष्ये—सुहृदस्समवेतान् मन्त्रवतो वरान् प्रहिणुयात् । मदर्थं कन्यां वृणीध्वम्, चतुरो वरान् प्रेषयति, ताना- दितो द्वाभ्यामभिमन्त्रयेत ।

End :

एताभ्यामेव लाजान् जुहुयादग्निं प्रदक्षिणीकृत्य, मङ्गलसूत्रं बद्ध्वा, जयादिब्रह्मादिविसर्जनान्ते ब्रह्मणे वरन्दद्यात्, ब्राह्मणान् भोजयित्वा- शुचो(शिषो)वाचयित्वा, अपमृत्युपरिहारार्थं मृत्युञ्जयजपञ्च कृत्वा, रक्षा- बन्धनमोचनञ्च कुर्यादित्याह भगवान् बोधायनः ॥

No. **3552.** आयुष्यसूक्तप्रयोगः.

ĀYUṢYASŪKTAPRAYŌGAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 41*b* of the MS. described under No. 430. On the conduct of a sacrificial ceremony for obtaining long life. Complete.

Beginning :

यो ब्रह्मा ब्रह्मण उज्जभार प्राणैश्शिरः कृत्तिवासाः पिनाकी ।
ईशानो देवस्स न आयुर्दधाति(तु) तस्मै जुहोमि हविषा घृतेन ॥

End:

घृतसूक्तेन च परिमृज्य ।

गृहस्थो ब्रह्मचारी वा यो निश्वं(विस्रं)सि तपश्चरेत् ।
प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः ॥
प्रक्षाल्य पयसा चैव घृतसूक्ते(क्तैः) तथैव च ।
पवमानानुवाकेन मार्जयेत्करबन्धनम् ॥

No. **3553.** आयुष्यहोमप्रयोगः.

ĀYUṢYAHŌMAPRAYŌGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 92*a* of the MS. described under No. 2898.

Incomplete.

Beginning:

देशकालौ सङ्कीर्त्य, अमुकगोत्रनक्षत्रराशौ जातस्य मम आयुरभिवृद्धिद्वारा परमेश्वरप्रीत्यर्थं मम जन्मदिवसे दूर्वाहोमायुष्यचरुहोमौ तन्त्रेण करिष्य इति सङ्कल्प्य, अग्निप्रतिष्ठापनान्तं कृत्वा, पुनः प्राणानायम्य, दूर्वाहोमायुष्यचरुहोमादिदेवतापरिग्रहार्थमन्वाधानं करिष्ये.

End:

जातवेदस इत्यस्य, मरीचपुत्रः कश्यप ऋषिः, जातवेदसाग्निर्देवता, त्रिष्टुप् छन्दः, प्रधानचरुहोमे विनियोगः.

No. **3554.** आयुष्यहोमः—कारिकासहितः.

ĀYUṢYAHŌMAḤ WITH KĀRIKĀ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 31*a* of the MS. described under No. 3239.

Complete.

Beginning:

जन्मर्क्षे जन्मभे चैव गोत्रस्य शर्मणः कुमारस्य आयुर्वृद्ध्यर्थमायुष्यहोमं करिष्ये—इति सङ्कल्प्य, पुण्याहं वाचयित्वा, चरुद्वयं क्षीरप[क्ष]कं जलपकं च लौकिकाग्नावौपासनाग्नौ वा प्रणीताभ्यः कृत्वा, अग्नय आयुष्मते वो जुष्टं निर्वपामि—इति प्रथमचरुः; प्र(ा)णाय वो जुष्टं निर्वपामि—इति द्वितीयः ।

पात्रसादनादि प्रणीतासादनान्तं कृत्वा.

End:

आयुर्वृद्धिर्भवति । एवमायुष्कामः कुर्यात् ॥

Colophon:

इति बोधायनोक्त आयुष्यहोमं(मः) संपूर्णम्(:) ॥

ब्राह्मणान् भोजयेत् । अथायुष्यहोमकारिका—

जन्मर्क्षे जन्मभे चैव महोत्पा(त)कवसु(त्सु) च ।
दीर्घायुष्याभिवृद्ध्यर्थमायुष्यं होममाचरेत् ॥
उल्लेखनप्रणीत्यन्तं कृत्वाग्निमु(श्चो)त्तरेण तु ।

* * * *

पूर्णाहुतिं ततः कृत्वा परिषेचनमाचरेत् ।
सङ्कल्पपूर्वं प्र(ा)श्नीयात् पञ्चगव्यं यथाविधि ॥

No. **3555.** आराधनक्रमः.

ĀRĀDHANAKRAMAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 3*a* of the MS. described under No. 3546.

On the method of worshipping the image of God in houses.

Complete.

Beginning:

अथ परमैकान्तिनो भगवदाराधनं वक्ष्ये—

भगवत्कैङ्कर्यरतिः परमैकान्ती भूत्वा, भगवानेव स्वशेषभूतेन मया स्वकीयैरेव कल्याणतमौपचारिकसांस्पर्शिकाभ्यवहारिकैः भोगैरखिलपरिच्छदान्वितं स्वात्मानं प्रीतिं कारयितुमुपक्रमत इत्यनुसन्धाय, तीर्थं गत्वा शुचौ देशे पादौ प्रक्षाल्याचम्य.

* * * *

परमगुरुं भगवन्तमुपगम्य, तमेव प्राप्यत्वेन प्रापकत्वेनानिष्टनिवारकत्वेन यथावस्थितस्वरूपरू(प)गुणविभूतिविस्तारमनुसन्धाय, तमेव शरणमुपगच्छेत् ।

End:

ततः अर्घ्यजलमादाय, भगवन्तमनुज्ञाप्य, पूजां समापयेत् ॥

Colophon:

इति भगवद्रामानुजविरचितं नित्यं समाप्तम् ॥

No. **3556.** आराधनक्रमः.

ĀRĀDHANAKRAMAḤ.

Substance, plam-leaf. Size, $8\frac{1}{8} \times 1$ inches. Pages, 14. Lines, 6 on a page. Character, Grantha. Condition, fair. Appearance, old.

Begins on fol. 16*a*. The other works herein are, Vaiśyōpanayanavidhi 1*a*, Viṣṇupūjākrama 13*a*, Sandhyāvandanaprayōga 23*a*.

Same work as the above.

Complete.

No. **3557.** आराधनक्रमसङ्ग्रहः.

ĀRĀDHANAKRAMASAṄGRAHAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 13*a* of the MS. described under No. 3546.

An epitome of the previous work.

Complete.

Beginning:

सुप्रक्षालितपाणिपादस्स्वाचान्तस्सोर्ध्वपुण्ड्रः शुचौ देशे भुवं सङ्गृह्य, तां शोषणादिभिर्विशोध्य, अस्मद्देशिकमित्याद्यनुसन्धाय, भगवत्सन्निधौ द्विः प्रणम्य, आसनमुपविश्य,

* * * *

अनन्तगरुडविष्वक्सेनानां सपीठकानि पद्मासनानि परिकल्प्य, सर्वतः पुष्पाक्षतानि विकीर्य, पीठस्य पश्चिमोत्तरदिग्भागे अस्मद्गुरुभ्यो नमः, अस्मत्परमगुरुभ्यो नम इति गुरूनावाह्य, सर्वार्थमुद्धरण्यार्घ्यजलमादाय ।

End:

अनेन(नया) भूतशुद्धिना(द्ध्या) शरीरं पावनं कृत्वा, अनन्तरं साङ्गत्याग . . . यथाशक्तिवारं मूलमन्त्रजपं कारयेत् ॥

* * * *

विष्णुं शारदचन्द्रकोटिसदृशं शङ्खं रथाङ्गं गदा-
मम्भोजं दधतं सिताब्जनिलयं कान्त्या जगन्मोहनम् ।
आबद्धाङ्गदहारमौक्तिकरमाशोभास्फुरद्वक्षसं
श्रीवत्साङ्कमुदारकौस्तुभधरं वन्दे मुनीन्द्रावृतम् ॥

No. **3558.** आरोग्यस्नानप्रयोगः.

ĀRŌGYASNĀNAPRAYŌGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 114*b* of the MS. described under No. 2898.

On taking a religious bath after recovering from illness.

Complete.

Beginning :

अथारोग्यस्नानविधिं व्याख्यास्यामः—

यस्मिन्नक्षत्रे तिथौ रोग(गो)जायते; तन्नक्षत्रदेवता(तां) संपूज्य दुष्टनक्षत्रे दुष्टतिथौ दुष्टवारोपेते चन्द्रताराबलरहिते एवंविधदिवसे तिथिनक्षत्रवारदेवतामथ ऋत्विजां(ज)श्चतुरो वृणुयात् ।

End :

ततो ब्राह्मणान् भोजयित्वा, शक्त्या दक्षिणां दद्यात्; एवं कृते नीरोगी भवति, अथ पुनरगदो भवतीत्याह भगवान् बोधायनः ॥

Colophon :

इत्यारोग्यस्नानम् ॥

No. 3559. आशीर्वादः.

ĀŚĪRVĀDAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 241*a* of the MS. described under No. 2892.

Regarding the pronouncing of a benediction.

Complete.

Beginning :

श्रीवैदेहीकुचकुम्भकुङ्कुमपङ्काङ्कितविशालवक्षस्स्थलविशेषभासमानतारहारप्रभासमुदितसुस्थितवदनचन्द्रः श्रीरामचन्द्रोऽस्य यजमानस्य निरापदास्सम्पदः सन्ततं सन्तनोत्वित्यनुगृह्णन्तु । दीर्घदोर्मण्डलदृढतरपरिरम्भसम्भ्रमसंपादितानन्दसन्दोहसमुज्जृम्भमाणमन्दस्मितचन्द्रिकालङ्कृतवदनाम्बुजा जनकजास्य यजमानस्य मन्दिरे निरन्तरनिवासिनी भूयादित्यनुगृह्णन्तु ।

End :

अस्मिन् ग्रामे स्थिता आस[ः]न्नास्सर्वे यजमाना नीरोगा निरुपद्रवाः श्रीहरिगुरुभक्तास्सदाचारसंपन्नाः तत्त्वज्ञानिनो भवास्त्वि(वन्त्वि)ति महान्तोऽनुगृह्णन्तु ॥

No. 3560. आशीर्वादः.

ĀŚĪRVĀDAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 61*a* of the MS. described under No. 430.

Incomplete.

Same subject as that of the above.

Beginning :

स्वस्तीष्टास्सी (स्त्युरिति) सहस्राणां, द्विजगोरा(शि)दैवत्यानां, पुरुहूतवह्निदण्डधरनिशाचरनाथपाशपाणिमरुद्वैश्रवणशशिशेखराणाम्, आयुष्मतः कमलासनस्य सकलदेवताशिरोमणेर्यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाध्यष्टाङ्गयोगनिरतानां वसिष्ठवामदेव(वाल)खिल्यविश्वामित्रदक्षकात्यायनकौण्डिन्यगौतमाङ्गिरसपाराशर्यव्यासवाल्मीकिशुकशौनकभरद्वाजसनकसनन्दन.

End :

निरन्तरमनुकूलाश्शुभावहास्सर्वे ग्रहास्सनक्षत्रादिशुभैकादशस्थानफलदा वरदास्सुमुहूर्तास्सुप्रसन्ना भवन्तु ॥

No. 3561. आश्वलायनगृह्यप्रयोगः.

ĀŚVALĀYANAGṚHYAPRAYŌGAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 58*b* of the MS. described under No. 115.

On the conduct of the Gṛhya ceremonies according to Āśvalāyana-sūtra.

For Extracts see No. 1160.

No. 3562. आश्वलायनगृह्यसूत्रम्.

ĀŚVALĀYANAGṚHYASŪTRAM.

Substance, palm-leaf (Śrītāla). Size, 6¼ × 2 inches. Pages, 54. Lines, 13 on a page. Character, Nandināgarī. Condition, good. Appearance, old.

Begins on fol. 2*a*. The other works herein are, Pañcagavyahōmavidhiḥ 1*a*, Sōpānakārikā 29*a*, Utsarjanōpakarmavidhi 29*b*, Āśvalāyanaprayōga 32*a*, Kārikā 72*a*, Mahāsaṅkalpa 73*a*, Cūrṇikā 74*a*, Maṅgalāṣṭaka 75*b*.

For Extracts *vide* No. 1160.

No. 3563. आश्वलायनपूर्वप्रयोगः.

ĀŚVALĀYANAPŪRVAPRAYŌGAḤ.

Pages, 410. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2892.

Āśvalāyanakārikā is intermingled; it extends from fol. 96 to 149.

The first two leaves are much injured.

Beginning:

सस्तनूभिः । व्यशेम देवहितं यदायुः । द्रविणोदा द्रविणसस्तुरस्य । द्रविणोदास्स नरस्य प्रयंसन् । द्रविणोदा विरवति मिषं नो द्रविणोदा रासते दीर्घमायुः । सविता पश्चात्तात्सविता पुरस्तात्सवितोत्तरात्तात्सविताधरात्तात्सविता नस्सोऽवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥

* * * *

दक्षिणकलशमादाय, ओं सन्त्वा सिञ्चामि यजुषा प्रजामायुर्धनञ्च । दीर्घमायुरस्तु, मनस्समाधीयताम्, समाहितमनसस्स्मः । प्रसीदन्तु भवन्तः, प्रसन्नास्स्मः ।

प्राणानाय(म्य), सङ्कल्प्य, श्वः प्रस्तुतकर्माङ्गभूतं पूर्वेद्युः कर्तव्यं नान्दीदेवताह्वानं करिष्ये, सङ्कल्प्य, एकस्मिन् पात्रे दक्षिणा(णां)ताम्बूलफलपुष्पसहितमादाय.

End:

लग्नत्रिषष्ठगस्सूर्यः स्वतुङ्गस्थो भवेद्यदि ॥
नाशयन्त्यखिलं दोषं स्वोदयात्तिमिरं यथा ।
केन्द्रत्रिकोणगस्सौम्यो मित्रराश्यंशगो यदि ॥
पापकेन्द्रश्रुतन्दोषं हन्तीभान् केसरी यथा ।
अ(त)स्माद्विचिन्त्य लग्नादिभावस्थग्रहजं फलम् ॥

Colophon:

इति कश्यपब्रह्मर्षिविरचितायां महासंहितायाम् उपनयनप्रकरणं नाम अष्टाविंशतितमोऽध्यायः ॥

श्वानौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ ।
ताभ्यां बलिं प्रदास्यामि स्यातामेतावहिंसकौ ॥

इति गो(दो)हनमात्रं तत्र स्थित्वातिथिग्रहणाय प्रक्षाल्य पादौ पाणी चाचम्य पश्चाज्जपेत् । शान्ता पृथिवी शिवमन्तरिक्षं द्यौर्नो देव्यभयं नो अस्तु । शिवा दिशः प्र दिश उ दिशो न आपो विद्युतः परिपान्तु सर्वतः शान्तिः शान्तिः शान्तिः । सर्वारिष्टशान्तिरिति ॥

No. 3564. आश्वलायनपूर्वप्रयोगः.

ĀŚVALĀYANAPŪRVAPRAYŌGAḤ.

Pages, 40. Lines, 5 on a page.

Begins on fol. 59*b* of the MS. described under No. 115.

Incomplete.

Beginning:

सुमुहूर्तोऽस्त्विति भवन्तोऽनुगृह्णन्तु । सुमुहूर्तमस्तु । एवंगुणविशेषणविशिष्टायां शुभतिथौ अस्य कुमारस्यायुष्याभिवृद्ध्यर्थमतिशयजननार्थं

जातकर्मनामकरणान्नप्राशनचौलोपनयनाख्यानि कर्माणि करिष्यमाणः तद्-ङ्गदेवताह्वानं स(च)करिष्यमाणः ग्रहार्चनपुरस्सरं नवग्रहहोमाख्यं कर्म करिष्यमाणः . . . . . महाजनैस्सह स्वस्तिपुण्याहवाचनं करिष्ये । ओं पुण्याहे चतुरो ब्राह्मणान् भोजयिष्ये ।

End:

सङ्कल्प्य, गायत्रीप्रदानं करिष्ये—

जान्वाच्य दक्षिणं पादा आ(वा)चार्यस्योपगृह्य च ।
नाम्नाभिवादनीयेन शिरस्तस्योपनम्य च ॥
अधीहीत्यादिकं . . . . ।

अधीहि भो सावित्रीं भो अनुब्रूहीति । नय, आचार्य सावित्रीं ब्रवीतु ।

ब्रह्मचारिणमाचार्यः परिधानीय वाससा ।
पाणिभ्याश्चात्मनस्तस्य पाणिं गृह्णात्यतः परम् ॥

प्रणवस्यान्तर्यामी ऋषिः.

No. **3565.** आश्वलायनपूर्वप्रयोगः.

ĀŚVALĀYANAPŪRVAPRAYŌGAḤ.

Pages, 52. Lines, 6 on a page.

Begins on fol. 51*a* of the MS. described under No. 3529.

Incomplete.

Beginning:

पुण्याहम्, आसने प्राणानायम्य, सङ्कल्प्य, विशिष्टायां तिथौ प्रारिप्सितस्य कर्मणः . सुमुखश्चैकदन्तश्च, ध्यायामि, आवाहयामि, सर्वेषु कालेषु.

* * * *

अस्माकं सहकुटुम्बानामस्य कुमारस्य प्रस्तुतकर्माङ्गभूतमादित्यादीनां नवानां ग्र(हा)णामाभ्युदयिकं कर्तुं नान्द्याह्वानं करिष्यमाणः तदादौ शुद्ध्यर्थं वृद्ध्यर्थं शान्त्यर्थमभ्युदयं महाजनैस्सह करिष्ये.

End:

यदग्ने सेन्द्रस्य सप्रजापतिकस्य सर्षिकस्य सार्षिराजन्यस्य सपितृकस्य सपितृराजन्यस्य समनुष्यस्य समनुष्यराजन्यस्य साकाशस्य सातीकाशस्य सानूकाशस्य सप्रतीकाशस्य सदेवमनुष्यस्य सगन्धर्वाप्सरस[स्क]श्च सहारण्यैश्च पशुभिर्याम्याश्च यन्म आत्मन आत्मनि व्रतम् ॥

No. **3566.** आश्वलायनप्रयोगः.

ĀŚVALĀYANAPRAYŌGAḤ.

Substance, palm-leaf. Size, $13\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 132. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Pūrva and Apara; incomplete.

Five leaves numbered from 16 are found in addition at the end.

Beginning:

प्र ते ददामि मधुनो घृतस्य वेदं सवित्रा प्रसुतं मघोनाम् ।
आयुष्मान् गुप्तो देवताभिश्शतञ्जीव शरदो लोके अस्मिन् ॥
मेधान्ते देवस्सविता— स्रज । अश्मा भव—
भव ।

* * * *

ज्येष्ठाम्नायन्तामित्यादिसूक्तैः कलशमभिमन्त्र्य, एतैस्सूक्तैस्सह शुची वो हव्या, प्रतान्विन्द्रमित्यादिसूक्तैर्मार्जयित्वा, ऋत्विग्भ्यो ब्राह्मणेभ्यो यथाशक्ति दक्षिणां दत्वा, कर्माधिकारसिद्ध्यर्थं कृच्छ्रत्रयं कृत्वा, ततः कर्म समारभेत्(त) ॥

End :

इदानीं पितामहनिर्गमनानन्तरमनुक्रमेण सापिण्ड्यसिद्ध्यर्थमस्मत्पितुः शर्मणो गोत्रस्य वसुरूपस्यास्मत्पितामहप्रपितामहवृद्धप्रपितामहैः शर्मभिर्गोत्रैर्वसुरुद्रादित्यरूपैस्सह समानोदकसापिण्ड्यसिद्ध्यर्थं पितुः शर्मणो गोत्रस्य वसुरूपस्य एकोद्दिष्टविधानेनास्मत्पितामहप्रपितामहवृद्धप्रपितामहानां शर्मणां गोत्राणां वसुरुद्रादित्यरूपाणां पार्वणविधानेन कालकामसंज्ञकविश्वदेवपूर्वकं विष्ण्वन्तम् इत्थं पार्वणैकोद्दिष्टोभयात्मकमस्मत्पितुरनुक्रमेण पुनस्सपिण्डीकरणमद्य करिष्य इति सङ्कल्प्य, प्रेतशब्दं विहाय कुर्यात ॥

Colophon :

इति सूतिकामरणप्रायश्चित्तम् ॥

No. **3567.** आश्वलायनप्रयोगः.

ĀŚVALĀYANAPRAYŌGAḤ.

Pages, 80. Lines, 13 on a page.

Begins on fol. 32*a* of the MS. described under No. 3562. Incomplete.

Beginning :

आश्वलायनमाचार्यं नत्वा तद्गृह्यकर्मणाम् ।
प्रयोगं वच्मि केषाञ्चिद्वृत्तिकारेण भाषितम् ॥
अङ्गसङ्घस्य तत्रोक्तेस्स्थालीपाकः पुरोच्यते ।
गृहप्रवेशहोमाद्या पौर्णमास्यां गमिष्यति ॥
तस्यान्तत्प्रारभेदे(ते)ति वृत्तिकारादिभाषितम् ।
प्राणानायम्य सङ्कल्प्य परितस्स्थण्डिलं शुचिः ॥
अधिकं वेषुमात्रं वा गोमयेनोपलिप्य च ।
यज्ञियं शाकलङ्किञ्चिदाददीत ततः परः ॥

* * *

एतत्तत्रं हुतानान्तन्नोपवासादिरिष्यते ।
प्रधानदेवतान्यत्वं सद्यस्कालत्वमिष्यते ॥

End :

अस्माभिश्शुभं सनुहि सद्यो जवस्ते वाजाः अस्मभ्यं विश्वश्चन्द्राः व(प)शोश्च मक्षु जरन्ते । फलदानताम्बूलदानताम्बूलचर्वणा(नि) ।

Colophon :

इति जयन्तोक्तस्थालीपाकविधिः ॥

No. **3568.** आश्वलायनश्राद्धप्रयोगः.

ĀŚVALĀYANAŚRĀDDHAPRAYŌGAḤ.

Pages, 27. Lines, 14 on a page.

Begins on fol. 5*a* of the MS. described under No. 2941.

Contains also the method of performing Vicchinnaupāsana and Puṇyāhavācana, which form a part of the annual Śrāddha ceremony detailed in this work.

Beginning :

पूर्वोक्त एवङ्गुणविशेषणविशिष्टायां शुभतिथौ मम धर्मपत्न्या सह अनुगतस्यौपासनाग्नेः पुनस्सन्धानाख्यं कर्म करिष्ये । स्थण्डिलञ्चतुरश्रमिषुमात्रा(न)वरं गोमयेनोपलिप्य,

* * *

भूर्भुवस्सुवरोमित्यग्निं प्रतिष्ठाप्य, अग्न्याहरणपात्रयोरक्षतैस्सह अप आसिच्य, चत्वारि शृङ्गा वामदेवो जातवेदोऽग्निस्त्रिष्टुप्, अग्निमूर्तिध्याने विनियोगः ।

* * * *

आत्मानं ब्राह्मणांश्च प्रोक्ष्य, सकुशहिरण्ययवतिलहस्तः ।
समस्तसम्पत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।
अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥

* * * *

पूर्वोक्तैवङ्गुणपुण्यतिथौ अस्मत्पितुः प्रतिसांवत्सरिकमृताहश्राद्धे पितृपितामहप्रपितामहानां गोत्राणां वसुरुद्रादित्यस्वरूपाणाम्; उपवीती— पुरूरवोमाद्रवस्संज्ञकानां विश्वेषां देवानां श्राद्धसंरक्षकश्रीमहाविष्णोश्च पितुः प्रतिसांवत्सरिकश्राद्धमन्नेन हविषा पार्वणविधानेन युष्मदनुज्ञया सदैवमद्य करिष्ये । तिलान् स्पृष्ट्वा,

End:

यन्त्वा द्यावापृथिवी यन्त्वापस्त्सृष्ट्वा(स्त्वष्टा) यन्त्वा सुजनिना(मा) सुजाना(जजान) । पन्थामनु प्रविद्वान् पितृयानम्य(णं द्यु)मदग्ने समिधानो विभाहि । परेऽहनि तर्पणं कुर्यात् ॥

No. 3569. आश्वलायनश्राद्धप्रयोगः.
ĀŚVALĀYANAŚRĀDDHAPRAYŌGAḤ

Substance, palm-leaf. Size, $9\frac{7}{8} \times 1\frac{1}{4}$ inches. Pages, 39. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Same work as the above

Complete.

No. 3570. ईशानबलिः.
ĪŚĀNABALIḤ.

Pages, 5. Lines, 19 on a page.

Begins on fol. ·0*b* of the MS. described under No. 199.

On an offering to Īśāna.

Complete.

Beginning:

ईशानबलिमुदगयने सकृदेव करोति । प्राणानायम्य, ईशानबलिं करिष्ये—

औपासनाग्नौ ईशानाय स्थालीपाकं श्रपयित्वा, प्रतिष्ठितमभिघारणान्तं कृत्वा, क्षैत्रपत्यं च । क्षैत्रपत्यं स्थालीपाकं लौकिकाग्नौ श्रपयति । कुटंकरणार्थं सम्भारानादाय, प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य, स्थण्डिलं कृत्वा, श्रोत्रियागारादग्निमाहृत्य, अग्नेरुपसमाधानाद्यभिमुखान्ते अपरेणाग्निं द्वे कुटं कृत्वा द्वे कुटं प्राग्द्वारे उदगपवर्गे करोति । उत्तरया दक्षिणस्यामीशानमावाहयति ।

End:

क्षैत्रपत्यं सपिण्डाः प्राश्नन्ति । यथा वैषां कुलधर्मः स्यात् । कर्मानुष्ठातृणामपि प्राशनं कुलधर्मः

* * * *

द्वौ दैवे पितृकार्ये त्रीन् एकैकमुभयत्र वा ।
भोजयेत् सुसमृद्धोऽपि न प्रसज्येत विस्तरः ॥
अष्टकासु च वृद्धौ च गयायां च मृतेऽहनि ।
मातुश्श्राद्धं पृथक्कुर्यात् अन्यत्र पतिना सहेति ॥

No. 3571. उग्ररथशान्तिः.
UGRARATHAŚĀNTIḤ.

Pages, 2 Lines, 6 on a page. Character, Nandināgarī.

Begins on fol. 135*b* of the MS. described under No. 2898.

On the Śānti to be performed when one becomes sixty years old.

Complete.

Beginning:

अथातो(त उ)ग्ररथविधिं व्याख्यास्यामः—

ब्राह्मणराजन्यवैश्यानां जन्मदिनादारभ्य षष्टिसंवत्सरे जन्ममासे जन्मनक्षत्रे गोमयेन गोचर्ममात्रं चतुरश्रं कृत्वा, तस्याग्नेयदिग्भागे निष्कद्वयेन मृत्युप्रतिमां कृत्वा, विधिवत्कलशस्थापनं कृत्वा.

End :

अथाज्याहुतीरुपजुहोति । घृतसूक्तेन प्रत्यृचं हुत्वा, स्विष्टकृत्प्रभृत्या धेनुप्रदानादथाग्रेणाग्निं दूर्वास्तम्बेषु हुतशेषं निदधाति । अपरेणाग्निं प्राङ्मुख उपविश्य कलशोदकेनाभिषिच्य यथाशक्ति दक्षिणान्दद्याद्ब्राह्मणान्भोजये-दित्याह भगवान् बोधायनः ॥

No. **3572.** उग्ररथशान्तिः.

UGRARATHAŚĀNTIḤ.

Pages, 4. Lines, 6 on a page. Character, Nandināgarī.

Begins on fol. 138*a* of the MS. described under No. 2898.

Incomplete.

Same work as the above.

No. **3573.** उदकशान्तिः.

UDAKAŚĀNTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 112*b* of the MS. described under No. 2898.

On sanctifying water for religious purposes.

Complete.

Beginning :

अथ वै भवति । श्रद्धा वा आपः । श्रद्धामेवारभ्येति ; यज्ञो वा आपः । यज्ञमेवारभ्येति . . . . शान्ताभिरेवास्य शुचꣳशमयति—इति हि ब्राह्मणम् । तस्मात्पवित्रेण शान्त्युदकं करोतीति जन्मनक्षत्रे पुण्यनक्षत्रे विवाहचौळोपनयनसमावर्तना . . . . ब्रह्मजज्ञानमित्यथ तिरः पवित्र-मप आनीयमाने जपति.

End :

हस्त्यश्वोष्ट्रगोमहिष्यजाविकभृत्यांश्च धनधान्यादि च प्रोक्ष्य(क्ष)त्येव-मेकरात्रं त्रिरात्रं पञ्चरात्रं नवरात्रम(प)पुनर्मृत्युं जयतीत्याह भगवान् बोधायनः ॥

No. **3574.** उदकशान्तिः.

UDAKAŚĀNTIḤ.

Pages, 4. Lines, 4 on a page.

Begins on fol. 113*b* of the MS. described under No. 2973.

Beginning :

प्राणानायम्य, सङ्कल्प्य मम सर्वाभीष्टसिध्यर्थमुदक[कर्म] शान्ति-कर्म करिष्य—इति सङ्कल्प्य, पुण्याहं वाचयित्वा, गोमयानुलेपितरङ्ग-वल्ल्यादिरचिते स्थण्डिले तण्डुलं निधाय, चतुरश्रं कल्पयित्वा, उल्लेखनं कुर्यात् । मध्ये ब्रह्मजज्ञानं . . . . विवः ; दक्षिणतः नाके सुपर्णं . . . . भुरण्युम् ; उत्तरतः आप्यायस्व . . . . सङ्गथे.

End :

तच्छंयोरावृणीमहे ।

यो ब्रह्मा ब्रह्मणः, नमो ब्रह्मणे—इति प्रणवेनोदकुम्भं त्रिरुत्था-प्य, मार्जनं कृत्वा, सर्वारिष्टशान्तिर्भवतीत्याह भगवान् बोधायनः ॥

Colophon :

इत्युदकशान्तिस्समाप्ता ॥

No. **3575.** उपनयनप्रयोगः.

UPANAYANAPRAYŌGAḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 14*a* of the MS. described under No. 3521

On the conduct of the Upanayana ceremony.

Incomplete.

Beginning:

अथ उपनयनमुच्यते । उपनयनं व्याख्या(स्या)मः—

गर्भाष्टमेषु ब्राह्मणमुपनयीत; गर्भैकादशेषु राजन्यम्; गर्भद्वादशेषु वैश्यम्; वसन्तो ग्रीष्मश्शरदित्येते वर्णानुपूर्व्येण । तत्र पूर्वेद्युः पुण्या वाचयित्वा, ग्रहमखं चाभ्युदयिकं च कृत्वा, रात्रावङ्कुरार्पणं कृत्वा.

End:

आयुर्दा देवजरसं गृणानो घृतप्रतीको घृतपृष्ठो अग्ने ।
घृतं पिबन्नमृतं चारु गव्यं पितेव पुत्रं जरसे नयेमꣳस्वाहा ।
आचार्यो मन्त्रमुक्त्वा आ देहीति कुमारं ब्रूयात् ।

No. **3576.** उपाकर्मप्रयोगः.

UPĀKARMAPRAYŌGAḤ.

Pages, 11. Lines, 5 on a page.

Begins on fol. 1a of the MS. described under No. 3512.

Deals with the details connected with the ceremony of beginning a session for the study of the Vēdas.

Complete.

Beginning:

अथोपाध्यायश्शिष्यैस्सह स्वयं वा कुर्यात् । आद्यवराहकल्पेत्यादितिथिमुक्त्वा, श्रावण्यां श्रवणनक्षत्रे उत्सृष्टानां वेदानां पुनः स्वीकरणार्थमध्यायोपाकर्म करिष्ये; तदङ्गं पुण्याहवाचनं करिष्ये । सावित्र्यादयः प्रीयन्तामित्युपलेपनाद्यग्निप्रतिष्ठापनान्तं कृत्वा, अत्र देवतेत्यादि चक्षुषी आज्येन, सावित्र्याद्या नव प्रधानदेवता आज्येन, अन्नाद्या विंशतिदेवताः ।

End:

इति त्रिरुक्त्वा ततः सर्वे तिष्ठेरन् । संज्ञानमुशनावदत् । ओं स्वीकृता वेदाः । प्रायश्चित्तादिहोमशेषं समापयेत् । महाशान्त्यादि जपेत् । ब्रह्मचारिणस्समिदाधानं कुर्युः ॥

Colophon:

इत्युपाकर्मविधिः ॥

No. **3577.** उपाकर्मप्रयोगः.

UPĀKARMAPRAYŌGAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 93a of the MS. described under No. 430.

Similar to the above.

Incomplete.

Beginning:

श्रावण्यां पौर्णमास्यां शिष्यैस्सह प्राणानायम्य(यामं) कृत्वा, स्नात्वा,
देवालये नदीतीरे अश्वत्थे [च] मूलसन्निधौ ।
गोष्ठे बृन्दावने तीरे उपाकर्म मनीषिणः ॥
उपाकर्मणि यत्किञ्चिदापस्तम्बेन सूचितम् ।
तद्विविच्य प्रवक्ष्यामि न (तु) गूढं प्रयत्नतः ॥

इति वचनात् . . . .

प्राणानायम्य, एवं . . पुण्यतिथौ छन्दसां वीर्यवत्तासिद्ध्यर्थमध्यायोपाकर्म करिष्ये—इति सङ्कल्प्य, ऋष्यर्चनार्थं तण्डुलैस्स्थण्डिलं कल्पयित्वा.

End:

प्राणानायम्य, तिथावध्यायोपाकर्म करिष्ये । अग्नेरुपसमाधानाद्याज्यभागान्ते उत्सर्ज . . स्यादिति वचनात् . . सदसस्पतय इदम् । नवऋषीणामित्याज्याहुतीर्हुत्वा इति सप्तविंशतिमन्त्रैराज्यसंमिश्रतिलसक्तून् हुत्वा.

No. **3578.** उपाकर्मप्रयोगः.

UPĀKARMAPRAYŌGAḤ.

Pages, 11. Lines, 30 on a page.

Begins on fol. 92*a* of the MS. described under No. 859.

Similar to the above.

Complete.

Beginning:

अथातोऽध्यायोपाकरणम्—

आचार्यश्शिष्यैस्सह प्राग्वोदग्वा ग्रामाद्बहिर्निष्क्रम्य, बहूदकदेशे पुण्याहं वाचयित्वा, एवं तिथौ अधीतानां छन्दसां वीर्यवत्तार्थमध्ययन-विरामार्थमुत्सर्जनहोमाख्यं कर्म करिष्यमाणः . . . . . .

* * * *

नूतनब्रह्मचारिणामध्ययनयोग्यतासिद्ध्यर्थं सर्वेषां पुनरध्ययनयोग्यता-सिद्ध्यर्थमुपाकर्महोमाख्यं कर्म कारिष्यमाणः तदादौ शुद्ध्यर्थमृद्ध्यर्थं . . . . करिष्ये ।

End:

ये चान्ये आचार्यास्ते सर्वे तृप्यन्त्विति प्रतिपुरुषं पितॄन् तर्प-यित्वा, गृहानेत्य, यद्ददाति सा दक्षिणा । अथापि विज्ञायते—यं यं क्रतुम-धीते तन तेन सहास्य क्रतुनेष्टं भवतीति । विज्ञायते तस्य द्वावनध्यायौ यदात्मा शुचिर्यद्देश(ष):.

No. **3579.** उत्सर्जनोपाकर्मविधिः.

UTSARJANŌPĀKARMAVIDHIḤ.

Pages, 4. Lines, 13 on a page.

Begins on fol. 29*b* of the MS. described under No. 3562.

Contains the details connected with the ceremony of commencing as well as of concluding the study of the Vēdas at the beginning and end of a session respectively.

Complete.

Beginning:

उत्सर्जनम् ।

अत्र गृह्यकारिका ।

अथातोऽध्यायोपाकरणम्—

अध्यापनमुपाकर्म श्रावण्यां श्रवणेन तु ।

एवङ्गुणेत्यादि शुभतिथौ मम शिष्याणाञ्च अधीतवेदाध्यापनद्वारा श्रीलक्ष्मीनारायणप्रीत्यर्थमुत्सर्जनऋष्यर्चनङ्कर्तुं तदङ्गं स्वस्तिवाचनङ्करिष्ये ।

* * * *

वि(श्वे)श्वान्देवांस्तर्पयामि, देवतास्तर्पय(स्तृप्य)न्तु, इत्यादि सर्वान् (र्वेभ्य)स्तर्पणं दीयताम्, अध्यायोत्सर्जनं माघ्यां पौर्णमास्यां विधीयते ॥

Colophon:

इत्युत्सर्जनविधिस्समाप्तः ॥

End:

शिष्येणापि तथा च हुत्वा, अग्निमीळेत्यादि यथाचारं पठन् प्राय-श्चित्तादिहोमशेषं समापयेत् ॥

Colophon:

इत्युपाकर्मविधिस्समाप्तः ॥

No. **3580.** उपाकर्मप्रयोगः.

UPĀKARMAPRAYŌGAḤ.

Pages, 28. Lines, 6 on a page.

Begins on fol. 59*a* and 61*a* of the MS. described under No. 2765.

Contains 2 copies of the work.

Beginning:

नमस्सदसे । नमस्सदसस्पतये । नमस्सखीनां पुरोगाणां चक्षुषे । नमो दिवे । नमः पृथिव्यै । सप्रथ सभां मे गोपाय । सर्वेभ्यः श्रीवैष्णवेभ्यो नमः ।

अशेषे हे परिषत् मदीयां विज्ञापनां (श्रुत्वा) भवत्पादमूले मया समर्पितामिमां यत्किञ्चिद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य विहित(तोपा) कर्महोमकर्मण्यधिकारसंपदस्त्वित्यनुगृहाण । अधिकारसंपदस्त्विति प्रतिवचनम् । विष्वक्सेनपूजा । दर्भेष्वासीनो दर्भान्धारयमाणः पवित्रपाणिः शिष्यैस्सह प्राणानायम्य.

End:

अथाध्ययनहोमाङ्गमभ्युदयश्राद्धं करिष्ये—इति सङ्कल्प्य, अभ्युदयश्राद्ध यत्किञ्चिद्धिरण्यं यस्मै कस्मै ब्राह्मणाय संप्रददे न मम । तदङ्गं पुण्याहं वाचयित्वा, पुण्याहे चतुरो ब्राह्मणान् तोषयित्वा, पुण्याहं भवन्तो ब्रुवन्त्वित्यादि ।

समिधः पावनास्सौम्याश्शर्मयुक्ताः परःपराः ।
युष्मान् हरामि होमार्थमस्मान् रक्षत सर्वदा ॥

No. 3581. ऋतुशान्तिप्रयोगः.

ṚTUŚĀNTIPRAYŌGAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 3a of the MS. described under No. 3533.

Deals with the details of a pacificatory ceremony to be performed on the occasion when a girl attains puberty.

Complete.

Beginning:

नमस्सदसे . . . विष्वक्सेनपूजां कृत्वा, अस्यां शुभतिथौ गोत्राया नाम्न्या भार्यायाः प्रथमरजोदर्शनकाले तिथिवारनक्षत्रयोगकरणादिषु सञ्जातदोषशान्त्यर्थमेभिः श्रीवैष्णवैस्सह बोधायनोक्तप्रकारेण ऋतुशान्तिजपकर्म करिष्ये—इति सङ्कल्प्य, अस्मिन् ऋतुशान्तिकर्मणि ब्रह्माणं त्वां ब्रह्म(वृ)णीमहे.

End:

जयादिब्रह्मोद्वासनान्तं कृत्वा, ऋत्विग्भ्यो दक्षिणां दद्यात् । ततो नारीदोषः प्रमुच्यते ॥

Colophon:

इत्याह भगवान् बोधायनः ॥

No. 3582. एकनक्षत्रशान्तिप्रयोगः.

EKANAKṢATRAŚĀNTIPRAYŌGAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 62a of the MS. described under No. 3302.

Deals with the details of a ceremony intended to avert the evil consequences due to a son being born to a man under the same asterism as that of his own birth.

Beginning:

सर्वेभ्यः श्रीवैष्णवेभ्यो नमः । अशे . . स्वीकृत्य नक्षत्रे जातस्य शर्मणः नक्षत्रे जातस्य तस्य शिशोश्च एकनक्षत्र (जनित) दोषनिवृत्त्यर्थमेकर्क्षशान्तिं कर्तुं . - गृहाण । प्राणानायम्य, विष्वक्सेनं संपूज्य, एकर्क्षशान्तिं करिष्य(इति) सङ्कल्प्य.

End:

प्रतिमां वस्त्रसंयुक्तां प्राप्तारिष्टनिवृत्तये ।
तुभ्यं दास्यामि विप्रेन्द्र यथोक्तफलदो भव ॥
इमां प्रतिमां सदक्षिणाकां . . न मम ॥

No. 3583. औपासनप्रयोगः.

AUPĀSANAPRAYŌGAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 4a of the MS. described under No. 3521.

Deals with the details connected with the daily fire-offering and fireworship to be conducted by the twice-born in India.

Complete.

Beginning :

सायंप्रातरत ऊर्ध्वं हस्तेनैते आहुती तण्डुलैर्यवैर्वा जुहुयात् । स्थालीपाकवदे(दे)व त॰ सौरिपूर्वाहुतिः प्रातरित्येके; उभयतः परिषेचनं यथा पुरस्तात् । तस्य प्रयोगः—

दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य, औपासनं पा(प्रा)रप्स्ये तण्डुलैर्यवैर्वा ।

End:

पुनः प्राणानायम्य, सायमौपासनहोमं तण्डुलैर्यवैर्वा होष्यामीति सङ्कल्प्य औपासनं कुर्यात् ॥

No. **3584.** कदलीविवाहप्रयोगः.

KADALĪVIVĀHAPRAYŌGAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 59*a* of the MS. described under No. 430.

Deals with the details connected with the fictitious marriage of a man to a plantain tree.

Complete.

Beginning:

अथापस्तम्बमूलसूत्रविवरणे तृतीयविवाहात् पूर्वं कदलीविवाहविधिं व्याख्यास्यामः—

तृतीयविवाहात् पूर्वेद्युर्मङ्गलस्नातो भूत्वा, पुण्याहं वाचयित्वा, नान्दीश्राद्धं कृत्वा, प्राणानायम्य, तृतीयविवाहं करिष्यमाण आदौ कदलीविवाहं करिष्ये—इति सङ्कल्प्य, सूक्ष्मकदलीमुपहृत्य, सव्यवामभागे वेदिकामध्ये स्थापयित्वा-

End :

तदुपरि विवाहो(हं)न कुर्यात् परिव्राजकाश्रममाचरेत् ।
यदि विवाहं कुर्यात् कुलक्षयं(यो) भवतीत्यापस्तम्बवचनानि ॥

No. **3585.** कदलीविवाहप्रयोगः.

KADALĪVIVĀHAPRAYŌGAḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 40*a* of the MS. described under No 3302.

Similar to the above.

Complete

Beginning :

अथ रम्भाविवाहस्य विधिं वक्ष्ये यथाविधि ।
ज्येष्ठे च रोगिणी(णि) भ्रष्टे कुब्दे(ब्जेऽ)न्धे बधिरे जडे ॥
कनीयान् कन्यकार्थी स्यात्कदलीं नववाससा ।
आच्छाद्य तूष्णीं वेदिश्च निधायाङ्कुरपूर्वकम् ॥

End :

कारयित्वा ततस्तत्र दत्वा धेनुं पुरोधसे ॥
स्वगृह्योक्तविधानेन क्रियतां सदृशी विधा ।
इत्याह भगवान्व्यासो लोकानुग्रहणाय वै ॥

Colophon :

(इति) रम्भाविवाहविधिस्समाप्ता(प्तः) ॥

No. **3586.** कन्यादानमहासङ्कल्पः.

KANYĀDĀNAMAHĀSAṄKALPAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 73*a* of the MS. described under No. 430.

Deals with details in regard to how a man has to take the vow of giving away his daughter in marriage as a gift.

Complete.

Beginning :

अस्य श्रीमहापुरुषस्य आदिनारायणस्य अचिन्त्यापरिमितशक्त्या भ्रियमाणस्य श्रीमत्सभावेदिका(हाजलौघस्य)मध्ये परिभ्रममाणानामनेककोटि-ब्रह्माण्डानामेकतमे, अव्यक्तमहदहङ्कारपृथिव्यप्तेजोवाय्वाकाशावरणैरावृते.

End :

मया सह दशपूर्वेषां दशापरेषां मद्वंश्यानां सर्वेषां पितृणां नरकादुत्तीर्य शाश्वतब्रह्मलोके निवाससिद्ध्यर्थं सालङ्कृतकन्यादानं करिष्ये ॥

No. 3587. कन्यादानसङ्कल्पः.

KANYĀDĀNASAṄKALPAḤ.

Substance, palm-leaf. Size, 12⅞ × 1⅛ inches. Pages, 4. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 37*a*. The other works herein are, Piṅgalasaṁvatsarapañcāṅga 1*a*. Lalitāsahasranāmastōtra 39*a*.

An abbreviated process of taking the above vow.

Beginning :

शुभाभ्यां(भे) शोभने मुहूर्ते . शुभतिथावस्माकं सहकुटुम्बानां क्षेमस्थैर्यविजयायुरारोग्यैश्वर्याभिवृद्ध्यर्थं चिन्तितमनोरथफलावाप्त्यर्थं . . . . मया सह दशानां पूर्वेषां दशानामपरेषां मद्वंश्यानां मातृवंश्यानां पितृवंश्यानां पितृणां नरकादुत्तीर्य शाश्वतब्रह्मलोकनित्यानिवाससिद्ध्यर्थं मत्स्यपुराणोक्तसालंकृतकन्यादानाख्यमहादानं करिष्ये ।

End :

वरश्च स्वयं प्राङ्मुखस्तिष्ठन् कन्याजननीमुदङ्मुखीं कृत्वा, दक्षिणाताम्बूलं हस्ते गृहीत्वा त्रिपुरुषं वदेत्—

काश्यपावत्सारनैध्रुवत्र्यार्षेयप्रवरान्वितक.

No. 3588. कन्यादानसङ्कल्पः.

KANYĀDĀNASAṄKALPAḤ.

Substance, palm-leaf. Size, 17¼ × 1⅜ inches. Pages, 5. Lines, 9 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 51*a*. The other works herein are : — Upadēśasūtram 1*a*, Āyurdaśāphaladaśāḥ 4*a*, Jātakakalānidhi 35*a*, Bhāvasārasaṅgraha 45*a*, Bṛhajjātakam 54*b*, Jyautiṣaviṣaya 56*a*, Jñānapradīpikā 85*a*, Jaiminisūtram 99*a*, Santānadīpikā 113*a*, Jātakasudarśanavyākhyā 139*a*.

Complete.

Beginning :

अथानन्तवीर्यस्य श्रीमदादिनारायणस्य भगवतो महापुरुषस्य अचिन्त्यापरिमितशक्त्या भ्रियमाणस्य महाजलौघ(स्य)मध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानाम्.

End :

मया सह दशपूर्वेषां दशपरेषां मद्वंश्यानां नरकादुत्तीर्य श्रीलक्ष्मीनारायणप्रीत्यर्थं त्रिगुणीकृताग्निष्टोमातिरात्रपौण्डरीकवाजपेयादिशतक्रतुफलावाप्त्यर्थं स्वगृह्योक्तप्रकारेण नानापुराणोक्तमार्गेण स्वर्चितसालङ्कृतकन्यकादानमहं करिष्ये ॥

No. 3589. कन्यादानमहासङ्कल्पः.

KANYĀDĀNAMAHĀSAṄKALPAḤ.

Pages, 3. Lines, 13 on a page.

Begins on fol. 73*a* of the MS. described under No. 3562.

Complete.

Beginning :

अस्य श्रीमदादिनारायणस्याचिन्त्यापरिमितशक्त्या भ्रियमाणस्य महा-जलौघ(स्य)मध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमे अव्यक्तमह-दहङ्कारपृथिव्यप्तेजोवायु.

* * * *

एवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ मम इहजन्मनि जन्मान्तरेषु बाल्ययौवनकौमारवार्धकेषु जाग्रत्स्वप्नसुषुप्त्यवस्थासु.

End :

श्रीविष्णुलोकनिवाससिद्ध्यर्थं मत्स्यपुराणोक्तं षोडशमहादानान्तर्वर्ति यथाशक्ति सालङ्कृतकन्यादानङ्करिष्ये ।

No. **3590.** कर्मविपाकः.

KARMAVIPĀKAḤ.

Pages, 19. Lines, 6 on a page.

Begins on fol. 66*a* of the MS. described under No. 3107.

Deals with how the evil effects of Karma may be obviated by various ceremonies, gifts, &c.

Incomplete.

Beginning :

अथ परिषत् यजमानविज्ञापनं समाकर्ण्य, दक्षिणां स्वीकृत्य, धर्मशास्त्राणि पर्यालोच्य, यजमानस्य अधिकारं विचार्य, एवंविधं प्रायश्चित्तं विधायकमुखेन विदध्यात् । सप्त पञ्च त्रिपुडि(टी)ति न्यायेन यथाशक्ति विधायका(न्) नियोज्य. तेभ्यो विशेषदक्षिणां दत्वा, विधायकवरणं कृत्वा, तदनन्तरमनुवादकमेकं विप्रं नियुज्य, तस्य(स्मै) अधिकदक्षिणां दत्वा त(अ)स्मिन् प्रायश्चित्ते अनुवादकं त्वां वृणीमहे इति वर[ण]येत् । क्षत्रियवैश्यशूद्राणामन्तराल(ले) ब्राह्मणं वृणुयात् । कारयितुरपि कर्मसमाप्त्यनन्तरं विशेषदक्षिणां दद्यात् ॥

End :

उपपातकानां सङ्कलीकरणा(नां) मलिनीकरणानामपात्रीकरणानां जातिभ्रंशकराणां प्रकीर्णकानामेवं नवविधानामज्ञानतोऽसकृत्कृतानामज्ञानतोऽभ्यस्तानामज्ञानतोऽभ्यस्तात्यन्ताभ्यस्तानां निरन्तराभ्यस्तानां चिरकालाभ्यस्तानां बहूनां बहुविधानां सर्वेषां पापानामशीत्यधिक.

No. **3591.** कारिका.

KĀRIKĀ.

Pages, 2. Lines, 13 on a page.

Begins on fol. 72*a* of the MS. described under No. 3562.

An epitome in verse relating to the conduct of Gṛhya ceremonies.

Incomplete.

Beginning :

श्रुत्वातिथिः(थिं)पूज्य विनायकञ्च ऋत्विग्द्विजेभ्यस्सह पुण्यवाचः ।
नान्दीग्रहातिथ्यपुरश्चरञ्च वटोश्श्रियायुश्शुभकीर्तिविद्या(:) ॥
अग्निं प्रतिष्ठाप्य समूहम(न)ञ्च आशीर्वचोभिर्घृतसंस्कृतानाम् ।
वस्त्राजिनाधार्युपवीतकाले वटोः . . . . . . ॥

End :

विघ्नेश्वराजादिसुरेषु सौम्यो वाण्यादिशक्तिष्वभिवन्द्य सोऽहम् ।
गृह्योक्ततन्त्राणि निरीक्ष्य वक्ष्ये वटोश्श्रियायुश्शुभकीर्तिविद्या(:) ॥

No. **3592.** कूर्मदर्शनशान्तिः.

KŪRMADARŚANAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 5*a* of the MS. described under No. 3279.

A ceremony to avert the evil consequent upon seeing a tortoise.

Complete.

Beginning:

उत्पाता बहवस्सन्ति घोराश्चैव तु सर्वदा ।
कूर्मश्च कृकलासश्च महोत्पाता भवन्ति ते ॥

कृकलासस्य पतनात्कर्तुर्मरणमादिशेत् ।
कूर्मस्य दर्शनादेव यजमानो मरिष्यति ॥

* * * *

अत्र प्रयोगः—

निष्कत्रयप्रमाणेन यथाविभवसम्भवम् ।

कूर्मस्य प्रतिमां कृत्वा, आचार्यं ब्रह्माणं चतुर ऋत्विजश्च वरयेत् आचार्यस्सङ्कल्प्य, शुद्धस्थले व्रीह्युपरि विधिवत् कुम्भं प्रतिष्ठाप्य.

End:

दश दानानि कृत्वा, जपपरान् ब्राह्मणान् भोजयित्वा, आशीर्वचनं गृह्णीयात् ॥

Colophon:

इति बृहस्पतिप्रोक्ता कूर्मदर्शनशान्तिस्समाप्ता ॥

* * * *

कूर्मप्रतिमादानमन्त्रः—

कूर्म त्वमग्निचयने क्रतौ मुख्योऽसि सर्वदा ।
तस्मात्त्वत्प्रतिमादानात्सर्वदोषः प्रशाम्यतु ॥

इति कूर्मशान्तिः ॥

No. **3593.** कूर्मशान्तिः.

KŪRMAŚĀNTIḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 6*a* of the MS. described under No. 3279.

Complete.

Beginning:

अथातः कूर्मशान्तिं व्याख्यास्यामः—

देवालये जपस्थाने क्षेत्रे वा स्वगृहेऽपि वा ।
कूर्मदर्शनमात्रेण सद्यो यमपुरं व्रजेत् ॥

* * * *

कूर्मशान्तिं करिष्यमाणस्तदादौ शुद्ध्यर्थं पुण्याहं वाचयित्वा, अस्मिन् कूर्मशान्तिकर्मणि आचार्यं त्वां वृणे—इत्याचार्यवरणं कृत्वा, तत्र शान्तिकर्मण्यनुज्ञां प्रार्थयेत् ।

End:

अथ पूर्वोक्तप्रकारेणाग्निप्रतिष्ठापनादिशान्तिहोमं कृत्वा, कलशोदकैरभिषिक्तो यजमानः प्रतिमादानादिकं कुर्यात् ॥

Colophon:

इति कूर्मशान्तिः ॥

No. **3594.** कूर्मशान्तिः.

KŪRMAŚĀNTIḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 56*b* of the MS. described under No. 3302.

Incomplete.

Beginning:

नमस्सदसे . सर्वमायुरुपासताम् । सर्वेभ्यः . नमः । अशे . स्वीकृत्य मम गृहे कूर्मदर्शनेन यो दोषस्समजनि; तद्दोषपरिहा(रा)र्थं कूर्मशान्तिजपहोमकर्म कर्तुं योग्यता . गृहाण । प्राणानायम्य, सङ्कल्प्य, मम गृहे कूर्मदर्शनेन . जपहोमकर्म करिष्ये ।

End :

कुम्भमुत्थाप्य. यजमानं प्रोक्ष्य. कूर्मस्थाने प्रोक्ष्य. कुम्भस्येशानभागे समिदन्नाज्याहुतीर्हुत्वा. आज्यावलोकनम्.

No. 3595. कूश्माण्डहोमः.

KŪŚMĀṆḌAHŌMAḤ.

Substance, palm-leaf. Size, 18⅜ × 1¼ inches. Pages, 16. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, very old.

Begins on fol. 67*a*. The other works herein are—Yajamāna 1*a*, Maitrāvaruṇa 75*a*, Darśapūrṇamāsaprayōga 81*a*.

Complete.

Prayōga according to Āpastamba in relation to the ceremony known as Kūśmāṇḍahōma.

Beginning :

तस्य सर्वप्रायश्चित्तं श्रुतिरेवाह—

कूश्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतस्सिञ्चति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते ।

तद्विधानमाह बोधायनः—

अमावास्यायां पौर्णमास्यां वा केशश्मश्रुनखानि वापयित्वा.

End :

इत्युपस्थाय, यथेतं प्रत्येत्य,

यन्मे मनसा वाचा कृतमेनः कदाचन ॥

सर्वस्मात्सलितो मोग्धि त्वं हि वेत्थ यथातथम् ॥

समिधमाधाय, वरं ददाति । स्विष्टकृज्जयादिप्रभृतिसिद्धमाधेनुवरप्रदानात् ॥

Colophon :

इति कूश्माण्डहोमविधिः ॥

No. 3596. कूश्माण्डहोमप्रयोगः.

KŪŚMĀṆḌAHŌMAPRAYŌGAḤ.

Pages, 14. Lines, 9 on a page.

Begins on fol. 5*a* of the MS. described under No. 1014.

Complete.

Beginning :

अमावास्यायां पौर्णमा[वा]स्यां वान्यत्र वा हितकाले पूर्वाह्णे प्रातरौपासनं हुत्वा. दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य संकल्पं करोति । उपात्तसमस्तदुरितक्षय . . कूश्माण्डैर्होष्यामीति संकल्प्य, स्वगृह्योक्तप्रकारेण स्थण्डिलोल्लेखनाद्यग्निप्रतिष्ठापनं(नान्तं) कृत्वा . . . ओं भूर्भुवस्सुव . . . प्रचोदयात् स्वाहा सवित्र इदम् ।

End :

पुनस्त्वादित्या. व्याहृतयश्चेति हुत्वा. यजुर्भेषप्रायश्चित्तं जुहुयात् । ब्रह्मणे वरं दत्वा. ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा. स्वयं व(प)योव्रतं कुर्यात् । पूतो विपाप्मा भवतीत्याह भगवान् बोधायनः ॥

एवं द्वादशाहं षडहं चतुरहं त्र्यहं वा कूश्माण्डैर्जुहुयात् ॥

No. 3597. कूश्माण्डहोमप्रयोगः.

KŪŚMĀṆḌAHŌMAPRAYŌGAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 3544.

Complete.

Beginning :

पौर्णमास्यायां पौर्णमा(ममावास्यायां)वा केशश्मश्रुलोमनखानि वापयित्वा, स्नात्वा, प्रातरौपासनं हुत्वा, पत्न्या सह प्राणानायम्य, मम

भ्रूणह(त्या)या अर्वाचीनैनोनिवृत्त्यर्थं कूश्माण्डसूक्तैर्होष्य इति सङ्कल्प्याग्निमुपसमाधानाद्यग्निमुखान्ते, ओं भूर्भुवस्सुवरों तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् स्वाहा—देवाय सवित्र इदं न मम ।

End:

ब्राह्मणस्य व्रतं संवत्सरदीक्षितो भवति इत्यादिशक्त्यनुसारेण दीक्षारात्रिनियमः । यदि मन्येतोपदस्यामि इत्यादि ब्राह्म(णं त्रि)दिनमेवं होमं व्रतं ब्राह्मणतर्पणान्तं कुर्यात् । यदर्वाचि(चीन)मेनो भ्रूणहत्यायास्तस्मान्मुच्यत इति ब्राह्मणमनुसन्धेयम् ॥

Colophon:

इति कूश्माण्डहोमविधिः ॥

No. 3598. कूश्माण्डहोमप्रयोगः.

KŪŚMĀṆḌAHŌMAPRAYŌGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 854.

Complete.

Same work as the above.

No. 3599. कूश्माण्डहोमः.

KŪŚMĀṆḌAHŌMAḤ.

Pages, 12. Lines, 8 on a page.

Begins on fol. 96*a* of the MS. described under No. 2833.

Complete.

Beginning:

सुप्रक्षालितपाणिपादः स्वाचान्तः ताम्बूलदक्षिणां गृहीत्वा, ब्राह्मणाननुज्ञाप्य, दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य, श्रीगोविन्दे-

त्याद्यस्यां शुभतिथौ श्रीभगवदाज्ञया श्रीमन्नारायणप्रीत्यर्थमर्वाक् भ्रूणहत्याया यावन्त्येनांसि मयि संभवन्ति; तावतामेनसां सद्यो निर्हरणार्थं सकृत् कूश्माण्डैर्होष्ये—इति संकल्प्य, स्थण्डिलाद्यग्निमुखान्ते गायत्र्या चरुणाज्येन वा एकामाहुतिं हुत्वा, यद्देवा देवहेलनं . . . न मामित स्वाहा ।

End:

प्रणीतावो(प्रो)क्षणं, ब्रह्मोद्वासनम्, उपस्थानम्, अभ्युदयं, पुण्याहवाचनं च कृत्वा, ब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ॥

No. 3600. कूश्माण्डहोमः.

KŪŚMĀṆḌAHŌMAḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 25*a* of the MS. described under No. 3533.

Complete.

Same work as the above.

No. 3601. कृकलासशान्तिः.

KṚKALĀSAŚĀNTIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 3533.

A ceremony to avert the evil consequent upon a lizard falling on a man's body.

Complete.

For Extracts see No. 3280.

No. 3602. गणहोमः.

GAṆAHŌMAḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 117*a* of the MS. described under No. 3403.

On a ceremony known as Gaṇahōma.

Complete.

Beginning:

ओन्नमस्सदसे . . . सनाम् । सर्वेभ्यश्श्रीवैष्णवेभ्यो नमः । स्वामिनः . . . स्वीकृत्य, गणहोमं कर्तुं योग्यतासिद्धिरस्त्विति भवन्तोऽनुगृह्णन्तु । तथास्तु ।

End:

सवित्रे अग्नये वैश्वानरायेदम् । ततः स्विष्टकृदादिजयाद्युपस्थानान्तं कुर्यात् ॥

Colophon:

इति गणहोमः ॥

No. **3603.** गणहोमप्रयोगः.

GAṆAHŌMAPRAYŌGAḤ.

Pages, 20. Lines, 5 on a page.

Begins on fol. 11*b* of the MS. described under No. 1014.

Complete.

Beginning:

काम्यानां कर्मणामाधानस्य वादौ यथा दोह पवित्रकामः तथा गणहोमं कुर्यात् । तस्य क्रमः—

प्रातरौपासनं हुत्वा, दर्भेष्वासीनो दर्भान्धारयमा(णः) पत्न्या सह प्राणानायम्य, सङ्कल्पं करोति । उपात्तदुरि(त)क्षयद्वारा परमेश्वरप्रीत्यर्थमंहआगएनोनिवृत्त्यर्थं सप्ताहं सवनत्रयं वा गणहोमं करिष्ये—इति सङ्कल्प्य, स्वगृह्योक्तप्रकारेण स्थण्डिलोल्लेखनाद्यग्निप्रतिष्ठापनान्तं कृत्वा, पात्रप्रयोगकाले प्रणीतापात्रेण सह . . . . अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम स्वाहा अग्नय इदम् ।

End:

अनन्वीक्षमाणो निरस्य गृहं गत्वा, पादौ प्रक्षाल्य, आचम्य, पुनरेवमेव कुर्यात् ।

यावत्कूश्माण्डहोमं(मः)स्यात् तावत्कालं व्रताशिनौ ।
पयसा दम्प(ती नित्यं) गणहोमेषु चैव हि ॥
सवनत्रयपक्षे तु गणहोमस्य दम्पती ।
भुञ्जि(जि)क्रियामाचरेता अ(म)क्षारलवणाशिनौ ॥

No. **3604.** गणहोमः.

GAṆAHŌMAḤ.

Pages, 13. Lines, 7 on a page.

Begins on fol. 5*b* of the MS. described under No. 3514.

Complete.

Beginning:

उदगयन आपूर्यमाणपक्षे पुण्यनक्षत्रे प्रातरौपासनं हुत्वा, प्राणानायम्य, पत्न्या सह संकल्पं करोति । अ हआगएनोनिर्हरणार्थं सप्ताहादि . . . गणैर्होष्यामि । उल्लेखनादिप्रागुदग्वा तोयनिधानान्ते घृतौदनं श्रपयित्वेत्यादि पार्वणवदग्निमुखान्ते चरवाज्यमानीय ।

End:

पूर्वस्थितउ(मु)दकुम्भमादायान्वारब्धायां चतुष्पथं गत्वा, तत्र निधाय, सिंहानुवाकं जपेत् ॥

No. **3605.** गण्डूषप्रयोगः.

GAṆḌŪṢAPRAYŌGAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 34*a* of the MS. described under No. 430.

Deals with details as to when and how the mouth is to be purified by means of gargling.

Incomplete.

Beginning:

मूत्रे पुरीषे भुक्त(क्त्य)न्ते रेतःप्रस्रवणेऽपि च ।
चतुरष्टद्विषड्ड्वाष्टगण्डूषैः शुध्यति क्रमात् ॥
पुरतस्सर्वदेवाश्च दक्षिणे पितरस्तथा ।
ऋषयः पृष्ठतस्सर्वे वामे गण्डूषमुच्छ्र(त्सृ)जेत् ॥
गोकर्णाकृतिहस्तेन माषमग्नजलं पिबेत् ।

End:

सन्ध्यां तर्पयामि. गायत्रीं तर्पयामि. ब्राह्मीं तर्पयामि. निरृतिं तर्पयामि.

No. 3606. गन्धर्वनष्टप्रायश्चित्तम्.

GANDHARVANAṢṬAPRĀYAŚCITTAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 3533.

Deals with the expiatory rites to be performed when what is called the Gandharva stick is either cut or broken or lost in the course of a marriage ceremony.

Incomplete.

Beginning:

गन्धर्वनष्टप्रायश्चित्तम्——

छिन्ने भिन्ने विनष्टे वा दग्धा(ग्धे) गन्धर्वनामके ।
तन्तुमत्या वृतं सूक्तैः प्राजापत्यन्तथैव च ॥
व्याहृतीभिरनाज्ञातैर्लौकिकेऽग्नौ हुनेत्सुधीः ।
पुच्छदण्डं (तु) संस्थाप्य तन्त्रशेषं समापयेत् ॥

End:

र[illegible]ाङ्कुरौ सकृत्कुर्यान्नान्दीहोमान् पृथक्पृथक् ।
रक्षाबन्धनकाले च वधूपूर्वं प्रकल्पयेत् ॥

भुक्तिद्वये तु संप्राप्ते . समाचरेत् ।
क्षौरद्वये तु संप्राप्ते कथं क्षौरं विधीयते ॥

No. 3607. गर्भाधानम्.

GARBHĀDHĀNAM.

Pages, 2. Lines, 10 on a page.

Begins on fol. 7*a* of the MS. described under No. 3521.

Deals with the rites connected with the nuptial ceremony.

Complete.

Beginning:

ऋतुस्नातायां भार्यायां शुभेऽहनि मङ्गलस्नातो भूत्वा, रात्रौ पुण्याहं वाचयित्वा, पत्नीं दक्षिणत उपवेश्य, स्वयमुत्तरत आसीनो(नः) कृतप्राणायामः मम धर्मपत्न्याः गर्भाधानं करिष्य इति संकल्प्य, विष्णुर्योनिं कल्पयतु । त्वष्टा रूपाणि पिंशतु । आसिञ्चतु प्रजापतिः । धाता गर्भं दधातु ते ॥

End:

तया सह संभोगं कृत्वा, तदानीमाभ्युदयिकं कर्तुमयुक्तत्वादपरेद्युराभ्युदयिकं कुर्यात् ॥

Colophon:

इति गर्भाधानकर्म ॥

No. 3608. गर्भाधानम्.

GARBHĀDHĀNAM.

Pages, 28. Lines, 5 on a page.

Begins on fol. 215*b* of the MS. described under No. 2892.

Similar to the above.

Complete.

Beginning:

अथ प्रथमऋतुगर्भालम्बनकर्मोच्यते--

जयन्तेनोक्तमार्गेण गर्भाधानमिहोच्यते ।

चतुर्थदिवसादूर्ध्वं मघामूलादि वर्जयेत् ॥

गृहमलंकृत्य. पत्नी अभ्यङ्गस्नानं कुर्यात् ।

स(सु)मुहूर्तोऽस्तु--

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव ।

विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥

* * * *

ततः प्राणानायम्य. देशकालौ सङ्कीर्त्य, एवंविशिष्टे शुभे मुहूर्ते गर्भाधानाख्यं कर्म करिष्यमाणः निर्विघ्नेन सकलाभ्युदयसिद्ध्यर्थं श्रीगणाधिपतिपूजां सम्भविनां(वता) नियमेन करिष्ये ।

End:

बृहत्सामेति रक्षां धृत्वा. पूर्ववत्समिदारोपणं कुर्यात् ॥

Colophon:

इति गर्भाधानविधिः ॥

No. **3609** गर्भाधानम्.

GARBHĀDHĀNAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 76*a* of the MS. described under No. 3237.

Similar to the above.

Complete.

Beginning:

गर्भाधानम्--

स्वस्तिवाचनमाभ्युदयिकं कृत्वा. यजमानस्य धर्मपत्न्याः गर्भबम्भ(न्ध)-नाख्यं कर्म करिष्ये । अग्निं प्रतिष्ठाप्य. नित्यौपासनं कृत्वा. अन्वाधानादिचरुपि(णा) आज्येन प्रजापतिं प्रधानदेवताचरुद्रव्येण षड्वारं विष्णुप्रजापतिश्च.

End:

उदीर्ष्वात इति द्वाभ्यां पत्न्या दक्षिणनाश(सि)कायां पुटनोच(दृष-त्पुत्रेणोच्च)र्य, तद्रसं सेचयित्वा, स्विष्टकृदादि समित्समारोपयेत् ॥

No. **3610.** गृहनिर्माणविधिप्रयोगः.

GṚHANIRMĀṆAVIDHIPRAYŌGAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 3*a* of the MS. described under No. 430.

Deals with the initiatory ceremony in connection with the building of a house.

Incomplete.

Beginning:

गृहनिर्माणविधिर्व्याख्यायते--

दक्षिणा प्रत्यक्प्रवणमगारावकाशमुद्धत्य. नैरृतीं दिशमुध(द्ध)त्य, पालाशेन शमीमयेन वोदवाहेन पादूलकेनाहृत्य, एतामेव दिशमुत्तरयोदूहति । यद्भूमेः क्रूरं तदितो हरामि; पराचीं निरृतिं निर्वाहयामि ।

End:

निर्मितमगारं मन्त्रलिङ्गावगतदिङ्मुखोऽभिमन्त्रयते । पश्चिमे अभिमुखः.

No. **3611.** गृहप्रवेशप्रयोगः.

GṚHAPRAVĒŚAPRAYŌGAḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 4*a* of the MSS. described under No. 430.

Deals with the details of a ceremony connected with the first entrance into a new house with a view to live therein.

Complete.

Beginning:

गृहप्रवेशविधिमाह—

पालाशं स(श)मीमयं वेध्ममादीप्य, औपासनाग्नाविध्मानादधाति । उत्तरयाग्निमुद्धृत्य, उद्ध्रियमाण उद्धर पाप्मनो मा यदविद्वान् यच्च विद्वांश्चकार। अह्ना यदेनः कृतमस्ति पापं सर्वस्मान्नो धृतो मुञ्च तस्मात् ।

* * * *

यद्यहनि प्रवेशस्तदा रात्रिलिङ्गया रात्रौ चेदहर्लिङ्गया उत्तरेण यजुषा अगारं प्रपद्य.

End:

उत्तरयोदकुम्भेन शिरस्तोऽवनयेत्प्रातर्मध्यन्दिने सायम् । ऋषिर्बोधः प्रबोधः स्वप्नो मातरिश्वा । ते ते प्राणान् स्परिष्यन्ति मा भैषि(षीः)न मरिष्यसि । शिरस्यभिषिञ्चेत् । अगदो भवति ॥

No. **3612.** गृहप्रवेशहोमः.

GṚHAPRAVEŚAHŌMAḤ.

Pages, 3. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 3521.

Similar to the above.

Complete.

Beginning:

अवु(औ)पासनं कुर्यात् ।

लोहितं चर्मानडुहं प्राचीनग्रीवमुत्तरलोममध्येऽगारस्य शर्म वर्मेद-माभ(ह)र . . . . . . दक्षिणेन पदा निजगेहेऽग्निमभितिष्ठत्युत्त-रपूर्वे देशेऽगारस्य कृतप्राणायामः । अनया नवोढया वध्वा सह गृह-

प्रवेशहोमं करिष्य इति संकल्प्य, अग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वार-ब्धायाम्.

End:

ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवतः स्थितम् . . . षट् कृ-त्तिकामुख्ययोगं वहन्ति(न्ती)यमस्माकमेधत्वष्टमी । अरुन्धतीं च दर्शयति ॥

No. **3613.** गृहप्रोक्षणम्.

GṚHAPRŌKṢAṆAM.

Pages, 5. Lines, 6 on a page.

Begins on fol. 58*a* of the MS. described under No. 3533.

Deals with the purification of a house by sprinkling it with holy water.

Complete.

Beginning:

पराशर उवाच—

सम्प्रोक्षणं किन्निमित्तं प्रकारो वास्य कीदृशः ।
कथ्यतां भगवन् ब्रह्मन् मदनुग्रहकाम्यया ॥

श्रीभगवानुवाच—

Further portion of the extracts same as that under No. 2907.

No. **3614.** गृह्यप्रयोगः.

GṚHYAPRAYŌGAḤ.

Pages, 95. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 2824.

Gives details regarding the performance of various domestic sacramental rites; according to Kapardin,

Beginning:

कपर्द्यभिप्रायेण गृह्यप्रयोगो वक्ष्यते—

[स]प्राणायामेन्त(मान्ते)सङ्कल्पः । उप(दगयन)पूर्वपक्षाहःपुण्याहेषु कार्याणि चौळादीनि । सीमन्तोन्नयनादीनां पूर्वपक्षापेक्षा । पुण्याहं देवस्य सवितुः प्राणन्त(प्रातः)प्रसवः प्राण इत्यस्मिन् अनुवाके पञ्च पुण्याहा उक्ताः.

* * * *

ततस्त्वन्नो अग्ने स त्वन्नो अग्ने अनाज्ञातत्रयं जपेत् । एवं मासिश्राद्धे सर्पबलीशानबलि(भि)र्भवितव्यम् ॥

प्रथमः पटलः ॥

End:

अपां शब्दं न शृणुयात् । तस्मिन् देशे अग्नेरुपसमाधानादि शम्याः परिध्यर्थे आज्यभागान्ते इमं मे वरुण इति दशाहुतीर्जुहोति । जयादि परिषेचनान्तं करोति । अभिमुखेन मृतेभ्यो दक्षिणतः इमं जीवेभ्य इत्यश्मानं परिधीन्दधाति जीवनन्त्राणान् ॥

अयुक्तमत्युक्तमयुक्तयुक्तं व्यक्तेतरोक्तं बहुयुक्तियुक्तम् ।
तत्सर्वमार्याः परिशोधयन्तु गृह्यप्रयोगानुनिबन्धनस्य ॥

इत्यष्टमः पटलः ॥

Colophon:

इति गृह्यप्रयोगः(समाप्तः) ॥

No. 3615. ग्रहयज्ञः.

GRAHAYAJÑAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 97*a* of the MS. described under No. 430.

Gives details regarding the performance of an astrological rite to propitiate the planets.

Complete.

Beginning:

अथातो ग्रहयज्ञविधिं व्याख्यास्यामः—

मासि मासि स्मृ(ऋ)तावयं चन्द्रग्रहे सूर्यग्रहे विषुवे जन्मनक्षत्रे यात्रादौ प्रवेशे विवाहे चौलोपनयनान्नप्राशनसीमन्तपुंसवनेषु पूर्वेद्युः कर्तव्यं शुभाशुभग्रहयज्ञं कुर्यात् । पिङ्गलगोमयेन गोचर्ममात्रं चतुरश्रं मण्डपे वेदिकायां गृहे वासनानि (उप)लिप्य ।

End:

अग्निमलंकृत्य नमस्कुर्याद्ब्राह्मणसन्तर्पणमाशीर्वचनमित्याह भगवान् बोधायनः ॥

No. 3616. ग्रहयज्ञः.

GRAHAYAJÑAḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 28*a* of the MS. described under No. 3302.

Similar to the above. Yajurvēdaprayōga.

Incomplete.

Beginning:

अथ ग्रहातिथ्यपरिकर्मोपहारान् व्याख्यास्यामः—

दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य, संकल्प्य, विष्वक्सेनपूजां कृत्वा, प्राणानायम्य, सङ्कल्प्य, श्वः करिष्यमाणोपनयनकर्मणः लग्नसाद्गुण्यार्थमिष्टकाम्यार्थसिद्ध्यर्थं भगवत्प्रीत्यर्थमादित्यादिनवग्रहयज्ञं करिष्य इति सङ्कल्प्य.

End:

परिध्यञ्जनं, परिधिप्रहरणम्, अनाज्ञातं, प्रणीतामो(प्रो)क्षणं, ब्रह्मोद्वासनम्.

No. 3617. ग्रामशान्तिः.

GRĀMAŚĀNTIH.

Pages, 7. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 3302.

Details of a pacificatory ceremony to be conducted to secure the general health and welfare of villages.

Complete.

Beginning:

ग्रामशान्तिविधिं व्याख्यास्यामः—

अग्निदाहे व्याघ्राभिभूतो(ते) सृका(गा)लपीडिते ग्रामान्त(न्ते)श्वसा-(सृगा)लवासि(शि)ते प्रवे(वि)ष्टे च ग्रामस्य.

* * * *

नूतनग्रामारम्भे वा शान्तिं कुर्यात् । शुभवारे शुभलग्ने शुभनक्षत्रे शुभतिथौ विष्णोः स्थापनम्.

End:

सप्ताहं द्वादशाहं वा ब्राह्मणान् भोजयेत् । सर्वोत्पा(तविनिर्मुक्तो भवतीत्याह) भगवान् बोधायनः ॥

Colophon:

ग्रामशान्तिस्समाप्तं(प्ता) ॥

No. 3618. चित्रबलिः.

CITRABALIH.

Pages, 2. Lines, 5 on a page.

Begins on fol. 99*a* of the MS. described under No 430.

On an offering of food to be made to Citra and some other deities before any 'twice-born' Hindu takes his food.

Beginning:

चित्राय चित्रगुप्ताय (भू)तेभ्यश्च यमाय च ।
धर्माय च बलिं भूमौ दत्वा भुञ्जीत वै द्विजः ॥
पितृपक्षे व्यतीपाते सन्ध्यायां निशि पर्वसु ।
तथा प्रत्याब्दिकश्राद्धे चित्रे गुप्तानि वर्जयेत् ॥

End:

दशकृत्वः पिबेदापः गायत्र्या श्राद्धभुग्द्विजः ।
पुनस्सन्ध्यामुपासीत शुध्येत तदनन्तरम् ॥

No. 3619. चौलम्.

CAULAM.

Pages, 3. Lines, 9 on a page.

Begins on fol. 13*b* of the MS. described under No. 3521.

Details regarding the Hindu ceremony of tonsure.

Complete.

Beginning:

जन्मनोऽधितृतीये वर्षे चौळं पुनर्वस्वोर्ब्राह्मणानां भोजनमुपा(पन)यन-वत्सीमन्तवदग्नेरुपसमाधानादि । तत्र पुण्याहं वाचयित्वा, ग्रहमखं चाभ्युद-यिकं च कृत्वा, रात्रावङ्कुरार्पणं कृत्वा, अपरेद्युराचार्यकुमारौ मङ्गलस्नातौ भूत्वा, प्राणानायम्य ।

End:

संवत्सरं गोदानव्रतामित्येक उपदिशन्ति । एतावन्नाना सर्वान् केशान् वापयति । उदकोपस्पर्शनमिति छन्दोगाः । दक्षिणाप्रत्यक्प्रव-णम् ॥

Colophon:

इति चौलम् ॥

No. 3620. छान्दोग्योत्सर्जनप्रयोगः.

CHĀNDŌGYŌTSARJANAPRAYŌGAḤ.

Pages, 18. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 63.

Details regarding how to conclude a session intended for the learning of Sāma-vēda.

Complete

Beginning:

अथ नदीं महोदकं वा आचार्यश्शिष्यैस्सह गत्वा, आचार्यः पाणी पादौ प्रक्षाल्य, आचम्य, प्राणायामं कृत्वा इति सङ्कल्प्य, श्रीभगवदाज्ञया भगवत्कैङ्कर्यरूपमुत्सर्जनकर्माङ्गं पञ्चगव्यस्थापनं करिष्ये – इति सङ्कल्प्य, गोमयेनोपलिप्य. चतुरश्रं स्थण्डिलमुपलिप्य,

नवकृतपटमध्ये दुग्धमैन्द्रे दधि स्यात् ।

यमदिशि घृतम् . . . . .

End:

आपो हि ष्ठेत्यादि तरत्समन्दिस्नानवर्गः ; अबोध्यग्निसामानि अरिष्टवर्गः ; एतेषामेकमनेकं वा दीर्घायुः पुत्रान् लभते ; सर्वेषां सामगाचार्याणां गृहेषु गत्वा ।

Colophon:

उपाकर्मविधिस्समाप्तः ॥

वंशब्राह्मणं समाप्तम् ॥

अथोदकेन शान्तिस्स्यात्प्राणायानिमुनीरितः ।

श्रीकामश्शान्तिकामो वा आयुष्कामो विशेषतः ॥

* * *

भ्राजाभ्राजे शुक्रचन्द्रे रजनरौहिणे शुक्रं याद्येहा उस्वरता उ नि चत्वारसेतुच्छाम च इति पवित्रवर्गः ॥

No. 3621. जडाद्युपनयनम्.

JAḌĀDYUPANAYANAM.

Pages, 3. Lines, 7 on a page.

Begins on fol. 89*b* of the MS. described under No. 2840.

On how to conduct the ceremony of Upanayana, that is, the ceremony of investing a person with the sacred thread and initiating him into the life of the Vedic student, when that person happens to be idiotically dull, or dumb, or blind, or deaf.

Complete.

Beginning:

जडमूकान्धबधिरविप्राणां मौञ्जिबन्धनम् ।

शौनकोऽहं प्रवक्ष्यामि उक्ते काले तथैव च ॥

वृद्धिश्राद्धं तु पूर्वं स्यात्कौतुकं चाङ्कुरार्पणम् ।

सर्वं समन्त्रकं कुर्यात् उपवीताजिनादिकान् ॥

End:

दत्तक्रीतादयः पुत्रा मातृभेदसुता अपि ।

एतेषां चैव पुत्राणां न दोषः परिवेदने ॥

Colophon:

इति जडमूकाद्युपनयनविधिः ॥

No. 3622. जडोपनयनम्.

JAḌŌPANAYANAM.

Pages, 3. Lines, 15 on a page.

Begins on fol. 197*a* of the MS. described under No. 1197.

Similar to the above in character, but deals only with the idiotically dull person.

Complete.

Beginning:

अथ जडोपनयनं व्याख्यास्यामः—

मातुर्यथाकामी स्यात् पुण्ये नक्षत्रे ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा, केशानोप्य, स्नातं शुचिवाससं बद्धशिखं(खा) यज्ञोपवीतमप आचम्य, अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात् कृत्वा, याज्ञिकसमिध आज्येनात्वा(क्त्वा) तूष्णीमभ्याधापयति ।

End:

य एव विद्वानाचरति पुत्रवान् पशुमान् भवति सर्वपाप्मानं तरति ब्रह्महत्या(म)पमृत्युं जयतीत्याह भगवान् बोधायनः ॥

No. 3623. जयादिहोमप्रयोगः.

JAYĀDIHŌMAPRAYŌGAḤ.

Pages, 3. Lines, 4 on a page.

Begins on fol. 51*a* of the MS. described under No. 18.

Deals with certain auxiliary fire-offerings generally offered to secure prosperity and auspiciousness.

Incomplete.

Beginning:

जयादिरभ्याधा(ता)नं च राष्ट्रभृच्छुक्रमाहुनेत् ।

चित्तं च स्वाहा–चित्तायेदं न मम । चित्तिश्च स्वाहा–चित्त्याये(इ)दं न मम । आकूतं च स्वाहा–आकूतायेदं न मम । आकूतिश्च स्वाहा–अकूत्या ये(इ)दं न मम ।

End:

अग्निर्भूतानामधिपतिस्स मावत्वस्मिन् ब्रह्मन्नस्मिन् क्षत्रेऽस्यामाशिष्यस्यां पुरोधायामस्मिन् कर्मन्नस्यां देवहूत्याः स्वाहा–अग्नये भूतानामधिपतय इदं न मम । . . . पितरः पितामहाः परेऽवरे ततास्तु(स्त)तामहा इह मावत.

No. 3624. जयादिहोमः.

JAYĀDIHŌMAḤ.

Pages, 5. Lines, 21 on a page.

Begins on fol. 98*b* of the MS. described under No. 199.

(This work has been, through oversight, omitted to be noted under that number.)

Similar to the above.

Complete.

Beginning:

इध्ममादाय, आघारमाघारयति । दर्शपूर्णमासवत्तूष्णीं प्रजापतय इदम्, इन्द्रायेदम् । अथाज्यभागौ.

* * * *

एवं पूर्वेण यथोपदेशं प्रधानाहुतीर्हुत्वा, जयाभ्याता(ना)न् राष्ट्रभृतः प्राजापत्यां व्याहृतीर्विहृतास्सौविष्टकृदमित्युपजुहोति.

End:

वेदान्तवेद्यो विततप्रभावः विश्वस्य दाताब्जभो(भवो) विरिञ्चिः ।
लक्ष्मीः प्रसन्ना वरदा समेतः सदा कुमाराय शुभङ्करोति(तु) ॥
ऋतुर्वसन्तस्सुरभिस्सुधा च वायुस्तथा दक्षिणनामधेयः ।
पम्पासन(र)श्चैव समुद्रगामी(मि) सदा कुमाराय शुभङ्करोति(तु) ॥

No. 3625. जातकर्मनामकरणे.

JĀTAKARMANĀMAKARAṆĒ.

Pages, 7. Lines, 10 on a page.

Begins on fol. 9*b* of the MS. described under No. 3521.

Deals with the ceremonies to be conducted on the occasion of the birth of a child and on the occasion of naming the child.

Complete.

Beginning:

अथ जातकर्मोच्यते—

पुत्रे जाते पितुः (ता)स्नात्वाचम्य, इमं कृत्तिकानक्षत्रे जातं कुमारं जातकर्मणा संस्करिष्ये—इति संकल्प्य, दिवस्परि प्रथमं जज्ञे.

End:

तेन त्वायुषायुष्मन्तं करोमि—इति दक्षे(क्षिणे) कर्णे उपांशु जपेत् । सर्वस्मादात्मनस्संभूतासि । स(ा) जीव शरदश्शतम् इति कुमारीमनुमन्त्रयेत् ॥

Colophon:

इति नामकरणम् ॥

No. 3626. दत्तहोमप्रकारः.

DATTAHŌMAPRAKĀRAḤ.

Pages, 4. Lines, 21 on a page.

Begins on fol. 239*a* of the MS. described under No. 199.

Deals with the details of a Hōma or fire-offering to be conducted when a son is taken in adoption.

Complete.

Beginning:

ज्ञापइ(यि)त्वा अमुं विष्णुनामधेयं कुमारममुष्मै गोविन्दशर्मणे पुत्रत्वाय सम्प्रदास्यामीति तान् सम्यग्विज्ञाप्याथ दाता ज्योतिश्शास्त्रोक्तशुभदिने मातापितरौ कुमारेण सह मङ्गळस्नातौ भूत्वा, मङ्गळतूर्यवाद्यघोषैर्दाता गोमयेनोपलेपितरङ्गवल्लीविराचितदेशे तोरणाद्यैरलङ्कृत्योपविश्य, प्राणानायम्य, सङ्कल्प्य, शुभतिथौ ममैहिकामुष्मिकफलसिद्ध्यर्थं पुत्रदानङ्करिष्य इति सङ्कल्प्य ।

* * * *

कुमारप्रतिग्रहानन्तरं पुत्रत्व[ा]प्राप्त्यर्थं दत्तहोमं करिष्य इति सङ्कल्प्य, अग्नीन्धनाद्याज्यभागान्ते स्रु(स्रु)वेणाज्यमादाय, प्रातरग्निं प्रातरिन्द्रꣳहवामहे प्रातर्मित्रावरुणा प्राणम(तर)श्विना । प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातस्सोममुत रुद्रꣳ हुवेम स्वाहा.

End:

पञ्चामृतप्राशनं कारइ(यित्वा)स्वपितृनुद्दिश्य यथाशक्ति ब्राह्मणान् भोजयित्वा समापयेत् ॥

Colophon:

इति यजुर्वेदाम्नाये दत्तहोमप्रकरणं सम्पूर्णम् ॥

No. 3627. दध्यञ्जलिहोमः.

DADHYAÑJALIHŌMAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 896.

Relates to a ceremony the chief item wherein is the offering of sanctified curds to the fire.

Complete.

Beginning:

प्रातःकाले औपासनं कृत्वा, पत्न्यान्वारब्ध उपविश्य, एकाष्टकामध्याष्टकयोः स्थाने दध्नाञ्जलिना होष्यामीति सङ्कल्प्य, अग्निप्रतिष्ठां कृत्वा, पात्रसादने दर्वीभ्यां सह स्वकरौ च सादयित्वा.

End:

ओषधिवनस्पतिभ्यां स्वाहा, अन्तरिक्षाय स्वाहा, नमो रुद्राय पशुपतये स्वाहा ॥

पितृदासप्रेष्या एकं च ॥

No. 3628. दध्यञ्जलिहोमः.

DADHYAÑJALIHŌMAḤ.

Page, 1. Lines, 21 on a page.

Begins on fol. 97*a* of the MS. described under No. 199.

Similar to the above in character.

Complete.

Beginning:

अथैतदपरं दध्न एवाञ्जलिना जुहोति ।

प्रथमाष्टकयोः प्रत्याम्नायः । अष्टम्यां प्रातरौपासनं हुत्वा प्राणानायम्य, दध्यञ्जलिहोमङ्करिष्य इति सङ्कल्प्य, अग्नेरुपसमाधानाद्यग्निमुखान्ते, अञ्जलिदर्व्योस्संस्कारमन्यः कुर्यात् ।

End:

प्राचीनावीती, प्राणानायम्य, अष्टकाश्राद्धङ्करिष्यामीति सङ्कल्प्य सर्वं मासिश्राद्धवत् । श्वोऽन्वष्टकाश्राद्धं भविता तत्र भवद्भिः क्षण प्रसादनीयः—इति क्षणे विशेषः ॥

Colophon:

दध्यञ्जलिहोमस्समाप्तः ॥

No. 3629. दध्यञ्जलिहोमविधानम्.

DADHYAÑJALIHŌMAVIDHĀNAM.

Pages, 2. Lines, 5 on a page.

Begins on fol. 94*a* of the MS. described under No. 430.

Similar in character to the above: is in verse and gives greater details.

Complete.

Beginning:

आत्मारोपणमध्ये तु अग्निमध्ये तु जन्तवः ।
अनाज्ञातत्रयं हुत्वा गायत्रीं त्रिशतं जपेत् ॥
आग्रेयाग्रयणेशानमासिश्राद्धाष्टकासु च ।
दध्यञ्जलि(:) प्रतिपदि क्रियासु न जयादयः ॥
चरुप्रधानेष्वखिलेषु कर्मसु प्रधानकत्वा(त्) चरुणा मुखाहुतिः ।
उत्सर्जनोपाकरणव्रतेषु घृतेन कार्याग्निमुखाहुतिः स्यात् ॥

End:

ब्राह्मणान् भोजयेदन्ते वाचयेदाशिषस्तदा ।
गण्डूषकरणात्पूर्वं हस्तं प्रक्षालयेद् द्विजः ॥

No. 3630. दर्शपूर्णमासस्थालीपाकः.

DARŚAPŪRṆAMĀSASTHĀLĪPĀKAḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 92*b* of the MS. described under No. 430.

On the offering of the oblation of specially cooked food to the fire on the first day of the bright and dark fortnights.

Incomplete.

Beginning:

प्राणानायम्य, परमेश्वरप्रीत्यर्थं दर्शपूर्णमासस्थालीपाकाख्यं कर्म करिष्यमाणः तदङ्गत्वेनेत्यादिपुण्याहवाचनं कर्म करिष्य इति संकल्प्य, पुण्याहवाचनं कृत्वा, प्रातरौपासनं हुत्वा, पत्न्या सह प्राणानायम्य, सङ्कल्पं करोति—परमेश्वरप्रीत्यर्थं दर्शपूर्णमासस्थालीपाकावारप्स्ये ।

* * * *

पत्न्यवहन्ति चरुं श्रपयित्वेत्याज्यभागान्तं कृत्वा, दर्व्यामुपस्तीर्येत्याज्यावदानधर्मेणावदाय, अग्राविष्णुभ्यां स्वाहा—अग्राविष्णुभ्यामिदम् ।

End:

अग्नये भगिने स्वाहा—अग्नये भगिन इदम् ।

No. 3631. दर्शपूर्णमासेष्टिप्रयोगः.

DARŚAPŪRṆAMĀSĒṢṬIPRAYŌGAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 30a of the MS. described under No. 3546.

On the details of the Iṣṭi or sacrificial offering to be conducted on the new moon and the full moon days.

Complete.

Beginning:

अथातो दर्शपूर्णमासौ व्याख्यास्यामः—

प्रातरग्निहोत्रं हुत्वा, दर्भेष्वासीनो दर्भान् धारयमाणः पत्न्या सह प्राणानायम्य, सङ्कल्पं करोति; दर्शेन यक्ष्ये; पूर्णमासेन यक्ष्ये; तेन श्रीमन्नारायणं प्रीणयानि । विद्युदसि विद्य मे . सत्यमुपैमि ।

End:

अग्नय इदम्; भुवस्स्वाहा—वायव इदम्; सुवस्स्वाहा—सूर्यायेदम्; ओं भूर्भुवस्सुवस्स्वाहा—प्रजापतय इदम्; श्रीविष्णवे स्वाहा—श्रीविष्णवे परमात्मन इदम् ॥

No. 3632. दर्शश्राद्धप्रयोगः.

DARŚAŚRĀDDHAPRAYŌGAḤ.

Substance, palm-leaf. Size, 15½ × 1⅝ inches. Pages, 7. Lines, 5 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 22a. The other work herein is, Śrāddhaprayōga 1a.

On the details of the offering of sesamum seeds and water on new moon days to propitiate the manes of departed ancestors.

Complete.

Beginning:

श्रीशैलेशदयापात्रं श्री(धी)भक्त्यादिगुणार्णवम् ।
यतीन्द्रप्रणवं(वणं) वन्दे रम्यजामातरं मुनिम् ॥

श्रीमते रामानुजाय नमः । अस्मद्गुरुभ्यो नमः ।

आचम्य, प्राणानायम्य, सङ्कल्पं कृत्वा, पुण्यतिथौ श्रीभगवदाज्ञया भगवत्कैङ्कर्यरूपं, गोत्राणामस्मत्पितृपितामहप्रपितामहानां, मातामहगोत्राणां मातामहमातुःपितामहमातुःप्रपितामहानां वर्गद्वयपितृणामक्षय्यतृप्त्यर्थममावास्यापुण्यकाले दर्शश्राद्धं तिलतर्पणरूपेण करिष्ये.

End:

येषां न पिता न भ्राता न बन्धुर्नान्यगोत्रिणः ।
ते तृप्तिमखिला यान्तु मया त्यक्तैः कुशैस्तिलैः ॥

तृप्यत तृप्यत तृप्यत । दक्षिणमुखमासीनस्सव्यं जान्वाच्य तर्पणं कृत्वा ॥

द्व्यङ्गुलं मूलवलयं ग्रन्थिरेकाङ्गुलं क्रमात् ।
चतुरङ्गुलमग्रं तु पवित्रस्य प्रमाणतः ॥
अग्रं ब्रह्माधिदैवत्यं ग्रन्थिर्विष्णुस्तथैव च ।
ईश्वरं वलयं प्रोक्तं पवित्रस्याधिदैवताः ॥

No. 3633. दर्शश्राद्धानुष्ठानक्रमः.

DARŚAŚRĀDDHĀNUṢṬHĀNAKRAMAḤ.

Substance, palm-leaf. Size, 7⅝ × 1¼ inches. Pages, 10. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance old.

Begins on fol. 31a. The other work herein is, Śrāddhaprayōga 1a.

Similar in character to the above.

Complete.

Beginning:

आचम्य, प्राणानायम्य, एवं . . तिथौ प्रा . ती, अस्मत्पितृणामक्षय्यपुण्यलोकावाप्त्यर्थं दर्शश्राद्धं तिलतर्पणरूपेण करिष्ये—

सकृदाच्छिनं(न्नं) बर्हिरूर्णामृदु स्योनं पितृभ्यस्त्वा भराम्यहम् । अस्मिन्त्सीदन्तु मे पितरस्सोम्याः पितामहाः प्रपितामहाश्चानुगैस्सह । आच्छिनत्ति, अप उपस्पृश्य, आयात पितरस्सोम्या गम्भीरैः पथिभिः पूर्व्यैः । प्रजामस्मभ्यं ददतो रयिं च दीर्घायुत्वं च शतशारदं च ।

End:

उत्तिष्ठत पितरः प्रेतशूराः । यमस्य पन्थामनमे(वे)ता पुराणम् । धत्तादस्मासु द्रविणं यच्च भद्रम् । प्र णो ब्रू(ब्रू)ताद्भागधां देवतासु । आवाहितवर्गद्वयपितॄन् यथास्थानं प्रतिष्ठापयामि । परेत पितर इति प्रवाहण्यपितॄन् प्रवाहयति ॥

No. 3634. दर्शान्नश्राद्धप्रयोगः.

DARŚĀNNAŚRĀDDHAPRAYŌGAḤ.

Substance, palm-leaf. Size, $10\frac{7}{8} \times 1$ inches. Pages, 21. Lines, 5 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 32*a*. The other work herein is, Śrāddhaprayōga 1*a*.

On the details of the offering of food to certain Brahmins on the new moon day to propitiate the manes of departed ancestors.

Incomplete.

Beginning:

समस्तसंपत् . पादपांसवः ॥
आपद्धन . पादपांसवः ॥

* * * *

नमो ब्रह्मण्य . गोविन्दाय नमो नमः ॥

यजमानस्य पितुः अमावास्यान्नश्राद्धं कर्तुं मुख्यकालो भूत्वा(यात्) अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु ।

* * * *

यजमानस्य पितुः अमावास्यान्नश्राद्धमन्नेन हविषा सङ्कल्पविधानेन युष्मदनुज्ञया सदैवं श्राद्धमन्नादिद्रव्येणाद्य करिष्ये, कुरुष्व ।

End:

देवानाञ्च पितृणाञ्च समकाले तत्स(वै) ब्रह्मार्पणमस्तु । श्रद्धायां प्राणे निविष्टम(ष्टो)ऽमृतं जुहोमि शिवो मा विशाप्रदाहाय प्राणाय स्वाहा.

No. 3635. द्राह्यायणगृह्यप्रयोगकारिका.

DRĀHYĀYAṆAGṚHYAPRAYŌGAKĀRIKĀ.

Substance, paper. Size, $8\frac{1}{2} \times 5\frac{3}{4}$ inches. Pages, 3. Lines, 16 on a page. Character, Telugu. Condition, good. Appearance, old.

Begins on fol. 27*a*. The other works herein are:—

Navagrahayajña 1*a*, Drāhyāyaṇāparasūtra 17*a*, Navagrahasāma 25*a*, Drāhyāyaṇāyuṣyahōma 28*b*.

A compendium in verse containing the details regarding the performance of the various domestic sacramental rites in accordance with the Drāhyāyaṇa-sūtra of the Sāma-vedins.

Complete.

Beginning:

अथातः संप्रवक्ष्यामि ह्यायुर्होमस्य लक्षणम् ।
आयुष्ये सति मर्त्यानां पुरुषार्थफलं भवेत् ॥
षोडशोर्ध्वशतं वर्षं जीवतीति श्रुतौ विधिः ।
दानार्चनजपध्यानक्रियाहीनस्य हीयते ॥

* * * *

अलङ्कृत्य गृहं सर्वं गोमयेनोपलेपयेत् ।
दूर्वाकुशशमीपत्रैर्लाजपुष्पाक्षतैस्तथा ॥
श्रीपत्रैश्च विकीर्येत गृहं सर्वं च यत्नतः ।

End :

एवं सर्वप्रयत्नेन मासि मासि च कारयेत् ।
वत्सरे वत्सरे वा स्यात्पुत्रपौत्राभिवृद्धिदम् ॥
सर्वसम्पत्समृद्धिस्स्यादायुस्तस्य च वर्धते ।
सर्वलोकहितार्थाय कृतवान् गौतमो मुनिः ॥

No. 3636. द्राह्यायणपूर्वापरप्रयोगः.

DRĀHYĀYAṆAPŪRVĀPARAPRAYŌGAḤ.

Substance, paper. Size, $8\frac{1}{4} \times 13\frac{3}{4}$ inches. Pages, 182. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Similar in character to the above.

Deals with all the sacramental rites to be performed before and after death.

Complete.

Beginning :

सादेति साम जपित्वा सर्वेभ्यो ब्राह्मणेभ्यो नमः—

नमस्कारं कृत्वा, अशेषे हे परिषत् . . . . . . स्वीकृत्य, भारद्वाजगोत्रायाः लक्ष्मीनाम्न्याः पुंसवनसीमन्तोन्नयनकर्म क्रियते; तदारम्भमुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु । प्राणानायम्य, विघ्नेश्वरपूजां करिष्ये ।

* * * *

गृह्याग्नेरेकदेशं प्रणीय, पञ्चम्यां शुभतिथौ पुंसवनकर्मणः स्वकालातिक्रमप्रायश्चित्तार्थं परिचरणतन्त्रेण प्राजापत्यान्तपञ्चकं करिष्ये ।

* * * *

पुनः पूजां कृत्वा ऋषीनुद्वास्य, घटमलंकृत्य, गृहमानीय, पाणी पादौ प्रक्षाल्य, आचम्य ॥

Colophon :

उपाकर्म समाप्तम् ॥

पितृमेधप्रयोग उच्यते—

पञ्चगव्यं कृत्वा, प्राजापत्यकृच्छ्रं कृत्वा, तद्धिरण्यं ब्राह्मणेभ्यो दत्वा, प्रायश्चित्तार्थं वेदादिजपं करिष्ये । प्रायश्चित्तसामानि गीत्वा—

अग्न आयाहि, एष स्य धारया सुत इति वर्गद्वयेन वेदादिवेदान्तानि त्रीण्याज्यदोहान्यादित् प्रत्नस्य रेतस उद्वयं तमस उन्नयामीति श्रावयेत् । तवश्यावि(वी)यानि श्रावयेत् । स्मृतिश्रेषे तवश्यावि(वी)यं-(य)निवृत्तिः ।

End :

प्राजापत्यं वै वामदेव्यं प्रजापतावेव प्रतिष्ठायोत्तिष्ठन्ति; पशवो वै वामदेव्यं पशुष्वेव प्रतिष्ठायोत्तिष्ठन्ति; शान्तिर्वै वामदेव्यं शान्तावेव प्रतिष्ठायोत्तिष्ठन्ति ॥

ओं शान्तिश्शान्तिश्शान्तिः ॥

Colophon :

श्राद्धप्रयोगस्संपूर्णः ॥

No. 3637. द्राह्यायणापरसूत्रम्.

DRĀHYĀYAṆĀPARASŪTRAM.

Pages, 13. Lines, 16 on a page.

Begins on fol. 17*a* of the MS. described under No. 3635.

Similar to the above, but deals only with funeral ceremonies. Incomplete.

Beginning:

प्रयाणकाले प्राक् स्मृतिवियोगात्पितरं मातरं भ्रातरं गुरुमन्यं वा सुहृदं ब्राह्मणं तत्स्वर्गार्थेन निमित्तेन इमानि छन्दांसि संस्कर्ता श्रावयेत् । वेदादि वेदान्तानि त्रीण्याज्यदोहान्यादित्यव्रतस्य रेतसो(स उ)द्वयं तमस उन्नयामीति । . . . .

दक्षिणे कर्णे जपति । उत्क्रान्ते प्रजापतेर्हृदयं मनसा ध्यायेत् । अत ऊर्ध्वं स्नापयित्वा, शवं देशजातिकुलधर्मेणापचितिमलङ्कारेणालङ्कृत्य.

End:

क्षीरेण पायसेन वा ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा यथाशक्ति दक्षिणां दत्वा पूतो भवति पूतो भवति ॥

Colophon:

इति पितृमेधसूत्रे प्रथमः पटलः ॥

अथातः पुनर्दहनविधिं व्याख्यास्यामः—

यदि शरीरं नश्येत्; अस्थीन्याक्षीरोदकेन प्रक्षाल्य. . . .

तथैवाङ्गुलीरष्टामिशिश्नं द्वादशभिर्वृषणं तां(तावद्भिः)कुशैर्वेष्टयित्वा, तस्मिन्नेव पूर्ववद्दहेत्.

No. 3638. द्राह्यायणायुष्यहोमप्रयोगः

DRĀHYĀYAṆĀYUṢYAHŌMAPRAYŌGAḤ.

Pages, 3. Lines, 16 on a page.

Begins on fol. 28*b* of the MS. described under No. 3635.

On a ceremony to be conducted for securing long life: according to the Drāhyāyaṇa-sūtra.

Complete.

Beginning:

प्राणानायम्य, सङ्कल्प्य, कुमारस्य आयुष्याभिवृद्ध्यर्थमायुष्यहोमं करिष्ये—इति सङ्कल्प्य, कलशे अनादिपुरुषमावाहयामि, प्रणवेन षोडशपूजां च कृत्वा, ऋत्विग्भिर्व(ग्व)रणं कृत्वा, स्थण्डिलादि ब्रह्मासनान्तं कृत्वा, श्रपयित्वा, अभिघार्य प्राचीनमुदीचीनं वोद्वास्य.

* * * *

सत्यमित्था वृषे दासि वृषजूतिर्नोवित । वृषा ह्युग्र शृण्विषे परावति वृषो अर्वावतिश्रुत स्वाहेति ।

End:

उन्नयामीति च गीत्वा, वामदेव्यं तथा जपेत् । अनन्तरं कलशमुद्वास्य, कलशोदकेन कुमारमभिषेचयेत् । अनन्तरं जपफलस्वीकरणार्थं यथाशक्ति 'हिरण्यमाचार्याय ब्राह्मणाय दद्यात् ॥

No 3639. द्विभार्याग्निसन्धानम्.

DVIBHĀRYĀGNISANDHĀNAM.

Pages, 5. Lines, 5 on a page.

Begins on fol. 82*a* of the MS. described under No. 430.

On the details regarding the daily fire-worship by one who has two wives.

Complete.

Beginning:

अथ द्विभार्याग्निसंसर्गविधिं व्याख्यास्यामः—

लौकिकाग्नौ द्वितीयविवाहस्याद्विवाहप्रभृति नवाहमनग्निर्विधिवत्पृथगुपानीते तथैवैकादशाहे द्वादशाहे वा उभावग्नी पृथक् स्थापयित्वा, तयोर्मध्ये स्थण्डिलं कल्पयित्वा, औपासनाग्निद्वयसंसर्गं करिष्य इति

सङ्कल्प्य, ज्येष्ठाग्निं ज्येष्ठपत्न्यादाय, कनिष्ठाग्निं कनिष्ठपत्न्यादाय, पत्नी-भ्यामन्वारब्धो भवति ।

End :

घृतेन सीता . . . . . अभ्यावबृत्स्व स्वाहा—

अग्नय इदम् । स्विष्टकृद्धोमं समित्संह(न)नं जयादि प्रतिपद्यते । परिषेचनान्तं कृत्वा ब्रह्मणे वरं ददाति ॥

No. **3640.** धनिष्ठादिनक्षत्रशान्तिः.

DHANIṢṬHĀDINAKṢATRAŚĀNTIḤ.

Pages, 7. Lines, 4 on a page.

Begins on fol. 19*a* of the MS. described under No. 3302.

On the details of a ceremony intended to avert the evil consequences of a death occuring under Dhaniṣṭhā and some other inauspicious asterisms.

Complete.

Beginning :

वक्ष्ये शान्तिं श्रविष्ठादिपञ्चकस्य यथाविधि ।
कुम्भमीनस्थिते चन्द्रे मरणं यदि जायते ॥

मृतस्य सद्गतिप्राप्तिः अशुभं सततं भवेत् ।
तस्मात् सर्वप्रयत्नेन सद्यश्शान्तिं समाचरेत् ॥

तत्र प्रथमदिवसे संकल्प्य, धनिष्ठापञ्चकमृतस्य सद्गतिद्वारा अस्माकं सहकुटुम्बानामायुष्याभिवृद्ध्यर्थं धनिष्ठापञ्चकशान्तिं करिष्य इति संकल्प्य

End :

ब्राह्मणाय दद्यात् । दशदानं कुर्यात् । सर्वान् दोषान(न्वैर्दोषैः) प्रमुच्यते इत्याह भगवान् बोधायनः ॥

No. **3641.** धर्मशास्त्रवचनानि (प्रयोगविषयाणि).

DHARMAŚĀSTRAVACANĀNI (PRAYŌGAVIṢAYĀṆI).

Page, 1. Lines, 7 on a page.

Begins on fol. 3*a* of the MS. described under No. 1014.

Extracts from various Smṛtis and other such works ; relates to details connected with the performance of various household and other ceremonies.

Incomplete.

Beginning :

उदीरतामशुत्तस्व ये चेहेति तिलोऽसि च ।
यन्मे माता प्रमृत्येत मत्प्रेष्या मा हितास्स्मृताः ॥

* * * *

परिधिप्रहरणं कुर्यात् संस्रावं(वो) विधीयते ।
वास्तुहोमश्चाग्रयणे शान्तिहोमो वृषोत्सृजे ॥

End :

नान्दीश्राद्धे गयाश्राद्धे मातुः श्राद्धे च मासिके ।
सांवत्सरविमोके च न कुर्यात्तिलतर्पणम् ॥
वर्जे(यित्वाग्निकरणं) कुर्यात्पितरि जीवति ।
पाणौ होमं प्रशंसन्ति न त्वापस्तम्बशाखिनाम् ॥

No. **3642.** नक्षत्रशान्तिः.

NAKṢATRAŚĀNTIḤ.

Pages, 13. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 3342.

On the details of a pacificatory ceremony intended to avert the evil consequences of a girl attaining puberty under inauspicious asterisms.

Complete.

Beginning :

अश्विन्यां रजस्वलां(लायां) कन्या(या)महोरात्रौ(त्रं) निद्रा भवति शान्तिः—

अश्विनीदेवौ द्विभुजौ, श्वेतवर्णः, काककमण्डलुः, सदा कुब्जादध्याश्वावाहने(?) देवस्य त्वेति मन्त्रेण पूजां होमं च कारयेत् ॥

End :

चन्दनगन्धपद्मपुष्पघृतधूपघृतापूपनैवेद्यसमिदाज्यचरुहोमः । तिलव्रीहिभिर्होमः । रेवत्यन्वेति पन्था इत्यष्टौ(ष्ट)वाक्येन होमः । सर्वे पूर्ववत् ॥

Colophon :

इति रेवतीनक्षत्रशान्तिः ॥

No. 3643. नक्षत्राभिचारविधानम्.

NAKṢATRĀBHICĀRAVIDHĀNAM.

Pages, 2. Lines, 20 on a page.

Begins on fol. 10*a* of the MS. described under No. 3342.

On the details of black magic intended to injure enemies-these details being appropriately related to the 27 asterisms known to Indian astrology.

Complete.

Beginning :

अश्विनी—अश्वकीलं चतुरङ्गुलं सप्ताभिमन्त्रितं कृत्वा, शत्रूणां मध्यगृहे निखनेत् । तस्य कुला(लो)त्साध(द)नं भवति । मन्त्रः ओं फट् स्वाहा ।

End :

रेवती—

पिप्पलफलमयीं प्रतिकृतिं कृत्वा, तस्य करेण सप्ताभिमन्त्रितं तेन कारयेत् । पञ्चरात्रेण वश्यो भवति । . . .

सर्वेषामुद्धृते मोक्षः पुनश्चर्यासमष्टिना ।
जपेद्द्रव्यसहस्रन्तु भवेत्सिद्धिर्न संशयः ॥

No. 3644. नवग्रहजपादिः.

NAVAGRAHAJAPĀDIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 20*a* of the MS. described under No. 3533.

On the details of a ceremony, consisting mainly of the chanting of charms, to propitiate the nine planets of Hindu astrology.

Complete.

Beginning :

आदित्यादीनां नवानां ग्रहाणामानुकूल्यसिद्ध्यर्थं ये ये ग्रहा अरिष्टस्थानेषु स्थितास्तेषां ग्रहाणां शुभैकादशस्थानफलावाप्त्यर्थं,

* * * *

सूर्यस्य—आसत्येन, अग्निर्दूतम् ; चन्द्रस्य—आप्यायस्व, गौरी मिमाय ; अङ्गारकस्य—अग्निर्मूर्धा, क्षेत्रस्य पते ; . . . .

केतोः—केतुं कृण्वन् ; ब्रह्मा देवानाम्—

इति नवग्रहाणामेतैर्मन्त्रैर्जपङ्कुर्यात् ।

End :

गोधूमास्तण्डुलाः खल्वा मुद्राश्चणकबर्बुराः ।
तिलमाषकुलुत्थाश्च ग्रहधान्याः प्रकीर्तिताः ॥

No. 3645. नवग्रहमखः.

NAVAGRAHAMAKHAḤ.

Substance, palm-leaf. Size, $11\frac{5}{8} \times 1\frac{1}{4}$ inches. Pages, 35. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other works herein are :—Śāntikalpaprayōga 18*a*, Śrīsūktajapa 30*a*.

On the details of a sacrificial ceremony to propitiate the planets.
Complete.

Beginning:

यजमानः प्राणानायम्य, एवङ्गुणविशेषणविशिष्टायां शुभतिथौ, आदित्यादीनां नवानां ग्रहाणां, शुभैकादशस्थानफलावाप्त्यर्थं ये ये ग्रहाः शुभस्थानेषु स्थिताः तेषां ग्रहाणां शुभस्थानफलावाप्त्यर्थम्.

* * * *

आदित्यादिनवग्रहदेवता उद्दिश्य नवग्रहदेवताप्रीत्यर्थमेकाग्निना नवाध्वरविधानेन समिदाज्यचरुद्रव्य(प्रभृति)भिरन्योन्यसहायेन अष्टोत्तरशतसङ्ख्याकनवग्रहमखं ब्राह्मणद्वारा कारयिष्ये ।

End:

अच्छिद्रः प्रजया भूयासं मा परासिच मत्पयः । इति पत्न्या अञ्जलौ पूर्णपात्रे उदकं निनीय ब्रह्माणं विसृज(सर्ज)येत् ॥

No. **3646.** नवग्रहयज्ञः.

NAVAGRAHAYAJÑAḤ.

Pages, 31. Lines, 16 on a page.

Begins on fol. 1*a* of the MS. described under **No.** 3635.

Similar in character to the above.

Complete.

This ceremony is intended to be adopted by the followers of Drāhyāyaṇasūtra.

Beginning:

अस्यां पञ्चम्यां शुभतिथौ अस्माकं सकुटुम्बानां . वृद्ध्यर्थमिष्टकाम्यार्थसिद्ध्यर्थमश्विनीनक्षत्रे मेषराशौ जातस्य श्रीरामशर्मणः अस्य यजमानस्य जन्मलग्नापेक्षया चन्द्रलग्नापेक्षया च आदित्यादीनां नवानां ग्रहाणामानुकूल्यसिद्ध्यर्थं ये ये ग्रहाः शुभेतरस्थानेषु स्थिताः.

* * * *

गौतमोक्तप्रकारेण आदित्यादीन् नव ग्रहान् यक्ष्ये । तदङ्गं पुण्याहवाचनं करिष्ये – इति सङ्कल्प्य, आदित्यादिनवग्रहयज्ञकर्मणे स्वस्ति भवन्तो ब्रुवन्तु.

End:

जैमिनिगोत्रो राहुः ; पैङ्गगोत्रो(त्रः) केतुः ।

एवंप्रकाशं(रं) दत्वा(त्वा) ग्रहशान्ति(न्तिं) समाचरेत् ।
सर्वोपद्रवनाशं(शः) स्यात् सर्वैश्वर्यफलं भवेत् ॥

इत्याह भगवान् गौतमः ॥

पूर्वं पत्नीं मृतां चैव संस्कुर्यात् वपनं विना ।
सर्वत्र स्त्रीमृतौ मन्त्रान् कुर्यात् स्त्रीलिङ्गसंवृतान् ॥

* * * *

आब्दिके प्रथमे चैव न कुर्यात्तिलतर्पणम् ।
पुरूरवाणां प्रत्याब्दे सापिण्डे कालकामकौ ॥
यतिश्राद्धे क्रतुदक्षौ काम्ये तु धुरिलोचनौ ।
नान्दीश्राद्धे सत्यवसू विश्वे देवा दशापरां(रे) ॥

No. **3647.** नवग्रहविधानम्.

NAVAGRAHAVIDHĀNAM.

Pages, 28. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3491.

Similar in character to the above works relating to the propitiation of planets.

The 12th leaf is lost.

Complete.

Beginning:

(आ)चार्यं त्वामहं वृणे ब्रह्माणम् । ऋत्विगावरणम्, ग्रहदिक्पालकादिप्रार्थनं कुर्यात् । आचार्यादीनामलङ्कारान् दत्वाग्नेयादिकोणेषु धान्यरस्यो-

परि चतुष्कलशान् सजलान् (सं)स्थाप्य, ईशान्याग्नेययोर्मध्ये ब्रह्मकलशं (सं)स्थाप्य, शतच्छिद्रमुत्तरतः (सं)स्थाप्य, कलशमध्ये तण्डुलोपर्यष्टदलं लिखित्वा, तत्तत्प्रतिमां (सं)स्थाप्य, षोडशोपचारैरभ्यर्च्य, कलशार्चनं करिष्य इति सङ्कल्प्य.

* * * *

संभवद्भिरुपचारैस्सम्भवता नियमेन पूजां च आदित्यादिनवग्रहाणां मध्ये एकैकग्रहस्य अष्टोत्तरशतवारं जपं च.

End:

कृष्णधेनुं गजं छागं दद्यादेतान् ग्रहान् क्रमात् ।
सूर्याय पद्मरागन्तु दद्यात्सोमाय मौक्तिकम् ॥
दद्यात् प्रवालं भौमाय मणिं मरकतं बुधे ।
जीवाय पुष्यरागन्तु वज्रं शुक्राय चोदितम् ॥
इन्द्रनीलन्तु शनये राहोर्गोमेध(द)कं मणिम् ।
वैडूर्यं केतवे दद्यात् एता वै रत्नदेवताः ॥

No. 3648. नवग्रहशान्तिः.

NAVAGRAHAŚĀNTIḤ.

Pages, 13. Lines, 4 on a page.

Begins on fol. 44*b* of the MS. described under No. 18.

Similar to the above.

Complete.

Beginning:

अर्कसमिधमादित्याय, पलाशं सोमाय, खादिरमङ्गारकाय, अपामार्गं बुधाय, अश्वत्थं बृहस्पतये, उदुम्बरश्शु(रं शु)क्राय, शमीं शनैश्चराय, राहोर्दूर्वाः, केतोः कुशा इति । आ सत्येन रजसा वर्तमानो . . . पश्यन् स्वाहा—आदित्यायेदं न मम ।

End:

इन्द्रं वो विश्वतस्परीति शुक्राय । शं नो देवी, प्रजापते, इमं यमप्रस्तरामिति शनैश्चराय, कया नश्चित्रः, आयं गौः, यत्ते देवी निरृति(रिति)राहवे । केतुं कृण्वन्, ब्रह्मा देवानां, सचित्रचित्रमिति केतवे ॥

No. 3649. नवग्रहसाम.

NAVAGRAHASĀMA.

Page, 1. Lines, 17 on a page.

Begins on fol. 25*a* of the MS. described under No. 3635.

On certain Sāman psalms to be chanted for propitiating the planets.

Complete.

Beginning:

व्याहृतिसामानि गायत्र्यं गायत्रं च स्पष्टम् । उत दुत्यम् ओत हा इ । आकप्यायस्व समेतु तोम । ब्रकह्मा । ब्राकह्मा । आकस्य प्रत्नामनुद्युतोम् । बृकहस्पते परिदीया रथेनोम् । आपाग्निंमूध्वाँ (मूर्धा) दीवः ककुत् ।

End:

आरभि त्वा शूर नोनुमो वा । औं चे हों इ त्वाँमिद्धि हवाँमहा ए । हां च उ त्विः । आँ चि ज्यादोंहम् । त्रीणि सामानि । आशुश्शिशानोऽध्यायपाठः ॥

Colophon:

ग्रहसाम समाप्तम् ॥
ततोऽरिष्टस्य वर्गकम् ॥

No. 3650. नवग्रहहोमप्रयोगः.

NAVAGRAHAHŌMAPRAYŌGAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 42*a* of the MS. described under No. 3302.

Details of a fire-offering for propitiating the planets.

Incomplete.

Beginning:

आचम्य, अंशे(पे हे) . स्वीकृत्य, नक्षत्रे जातस्य कुमारजननकाललग्नापेक्षया आदित्यादि . ग्रहाणां शुभानुकूल्यफलावाप्त्यर्थं नवग्रहमखं कर्म . ण(:) सङ्कल्पं(कृत्वा) अस्माकं सह . वृध्द्यर्थं धर्मार्थकाममोक्षचतुर्विधफलपुरुषार्थसिद्ध्यर्थमिष्टकाम्यार्थसिद्ध्यर्थं मम कुमारस्य जनन . पेक्षया.

End:

इन्द्राणीमासु नारिषु सुपत्नीमहमश्रवम् । न ह्यस्या अपरं चन जरसा मरते पतिः.

No. 3651. नागप्रतिष्ठाप्रयोगः.

NĀGAPRATIṢṬHĀPRAYŌGAḤ.

Pages, 15. Lines, 5 on a page.

Begins on fol. 48*b* of the MS. described under No. 3302.

Copying is said to have been finished on Monday the 28 of Tai in the year Virōdhi.

On the details regarding the ceremony of installing the image of a serpent for the purpose of worshipping the same.

Beginning:

ततस्सङ्कल्प्य, अस्माकमित्यादिवृध्द्यर्थं, नागप्रतिष्ठाकल्पोक्तसंपूर्णसकलफलावाप्त्यर्थं मम धर्मपत्न्या सह मया मद्वंशजेन इह जन्मनि पूर्व-

जन्मनि कामक्रोधलोभ(मोह)मदमात्सर्यैः विश्लेषितबालकानामघजनितदोषनिवृत्त्यर्थं, मया वा मम धर्मपत्न्या वा कृतसर्पशुकशारिकामार्जालादिहिंसाजनितदोषनिवृत्त्यर्थं सर्पवि(वे)धजनितपुत्रप्रतिबन्धकदोषनिवृत्त्यर्थं शौनकोक्तप्रकारेण नागप्रतिष्ठापनं करिष्ये ; तदङ्गमाचार्यऋत्विग्वरणं करिष्ये.

End:

न तस्य सन्ततेर्हानिः सत्यमेतन्मयोदितम् ।
प्रतिबन्धयुताष्षण्डा वन्ध्या हिंसादिकर्मणः ॥
चतुर्वर्णकुलोद्भूताः स्त्रियश्च पुरुषा अपि ।
नागप्रतिष्ठां कुर्युश्चेन्मुच्यते(न्ते) सर्वकिल्बिषैः ॥

Colophon:

इति शौनकोक्तप्रकारेण नागप्रतिष्ठा सम्पूर्णा ॥

No. 3652. नागप्रतिष्ठा.

NĀGAPRATIṢṬHA.

Pages, 6. Lines, 3 on a page.

Begins on fol. 25*a* of the MS. described under No. 2973.

Similar in character to the above.

Complete.

Beginning:

वासिष्ठमतानुसारेण नागप्रतिष्ठां व्याख्यास्यामो(मः)—

दशपूर्वेषामित्यादिविष्णुसायुज्यासिद्ध्यर्थं (नागप्रतिष्ठासिद्ध्यर्थं) पुत्रपौत्राभिवृद्ध्यर्थं नागप्रतिष्ठां करिष्य इति संकल्प्य, पुण्याहं स्वस्ति मि(इ)ति ।

End:

नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु इत्यादि तेभ्यस्सर्पेभ्यो नम इत्यन्तं पठित्वा, पूर्वोक्तं सकलं कुर्यात् ॥

No. **3653.** नागबलिः.

NĀGABALIḤ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 230*a* of the MS. described under No. 2892.

Complete.

This gives details relating to a ceremony generally performed at the conclusion of a marriage.

Beginning:

विवाहव्रते पूर्णे . . . पूर्वरात्रौ नाक(ग)बलिं कुर्यात् । गृहमध्ये विस्तीर्णभूमावष्टदलसंख्याकरेखास्तिर्यगूर्ध्वं चालिख्य, तत्परित एकोनपञ्चाशत्कोष्ठानां मध्ये चतुर्दिक्षु कोणे षट् कोष्ठान्यथाक्रमं ब्रांह्म-(चालिख्य), तत्परिमृज्य, मध्ये त्रयोदश मार्जयेदवशिष्टद्वादशभिश्चतुर्भे-द्रारुयं सरो भवति । तन्मध्ये षट्कोणं रचयेत्; तन्मध्ये त्रिकोणं, तन्मध्ये सं(स)कर्णिकमष्टदलपद्मं, तत्परितः शि(सि)ताक्षतैर्भित्तिं कृत्वा.

End:

अहस्तु पुनराधेने(ये) हूयते प्रातराहुतिः ।
सायमारभ्य जुहुयादाहुतीनां चतुष्टयम् ॥

No. **3654.** नागबलिखण्डः.

NĀGABALIKHAṆḌAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 69*a* of the MS. described under No. 430.

Complete.

Similar to the above.

Beginning:

अथ नाक(ग)बलिं पञ्चवर्णतण्डुलैस्स्वास्तिकं लिखित्वा, तत्र हरिहराणि घटादि यथाक्रमं निधाय, तन्तुभिरावेष्ट्य, पुष्पादिभिरलंकृत्याथ वृद्धसुवा-

सिनी सम्वेष्टितजलघटमादाय, (व)र्तिं च धृत्वा, पुरस्तादुदकधारां स्रावयत्ये-कसुवासिनी दीपिकापात्रम्.

End:

दृषत्पुत्रग्रहणं कृत्वाशीर्वादाक्षतान् स्वीकृत्य, गृहं प्रवेशयेदित्याह भगवान् बोधायनः ॥

No **3655.** नारायणबलिः.

NĀRĀYAṆABALIḤ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 24*a* of the MS. described under No. 3007.

On the details of a ceremony called Nārāyaṇabali, which is to be performed on the 12th day after the death of certain specified kinds of persons.

The meaning of the ceremony is that the dead person's soul becomes thereby united to God.

Complete.

Beginning:

देवालये नदीतीरे वा विप्राग्रादभ्यू(भ्यनाह्)यानुज्ञाप्य, गोत्रस्य श्रीवै-कुण्ठप्राप्त्यर्थं नारायणबलिकर्म करिष्य इति संकल्प्य, केशवाद्यर्थे क्रमा(त्) द्वादश षड्वा विप्रान् वृत्वा, वृत्तकुण्डेषु विप्रपादान् प्रक्षाल्य, कुसरताम्बू-लान्(नि) दत्वाभ्यज्य ।

End:

परिषेचनान्तं कृत्वा, उपवीतं प्राचीनावीतं पार्वणवत् कुर्यात् । सम्यक् देवताराधनं कुर्यात् ॥

Colophon:

नारायणबलिस्समाप्तः ॥

No. **3656.** नारायणबलिः.

NĀRĀYAṆABALIḤ.

Substance, palm-leaf. Size, 11⅜ × 1¼ inches. Pages, 30. **Lines**, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 19*a*. The other works herein are:—**Śūdra-pañcasaṁskāraprayōga** 1*a*, Sudarśanahōmaḥ 36*a*.

Similar to the above.

Complete.

Beginning:

अथ नारायणबलिप्रयोगो वक्ष्यते—

मृतस्य षोडशे दिवसे कर्ता स्वाचार्यमुपसङ्गम्य,

"स्वामिन् गुरूत्तम प्रीत्या मम सर्वार्थदायक ।
पिता मम परेतोऽभूत्तस्य वैकुण्ठसिद्धये ॥
कृपया मयि कल्पोक्तनारायणबलिं कुरु ।"

इति सम्प्रार्थ्य, तत आचार्यः नद्यास्तीरे तटाकतीरे वा भूमिं संशोध्य, षड्विंशत्प(तिप)दमानविस्तारायामसंयुतं षोडशस्तम्भसंयुतं कदळीपूगस्तम्भचूतपत्रतोरणाद्यलङ्कृतं मण्डपं कृत्वा, तन्मध्ये वितस्तिद्वयविस्तारायाममेतावदुन्नतसहितं चतुरङ्गुलविस्तारायामोन्नतवेदित्रयपरिष्कृतं चतुरश्रं कुण्डं कल्पयित्वा,

End:

तत आवाहितान्देवान्यथाक्रमेण सम्पूज्य, उद्वास्य, प्रधानकलशोदकैश्शिष्यं तद्ज्ञातिभिस्सह प्रोक्षयेत् । ततः कर्ता ऋत्विग्भ्यो दक्षिणादिकं समर्प्य, स्वाचार्यमासने सन्निवेश्य, भूषणादिभिरलंकृत्य, सर्ववाद्यगीतनृत्तादिभिस्सह मण्डपसम्भारादिभिस्साकं गृहं प्रवेशयेत् ॥

Colophon:

इति नारायणबलिप्रयोगः ॥

No. **3657.** नारायणबलिः.

NĀRĀYAṆABALIḤ.

Pages, 7. **Lines**, 6 on a page.

Begins on fol. 65*a* of the MS. described under No. 2988.

Similar to the above.

Complete.

Beginning:

अनन्तरं द्वादशेऽहनि नारायणबलिं कुर्यात् ।

नारायणबलिश्चास्य कुर्वीत द्वादशेऽहनि ।
कुर्याद्विष्णोर्महापूजां पायसञ्च निवेदयेत् ॥

शौनकीये—

देशान्तरगतानान्तु हतानाञ्चान्यसाधनैः ।
जीवश्राद्धमृतानाञ्च नैष्ठिकानान्तथैव च ॥

* * * *

प्रयोगस्तु पुत्रो वान्यो वा कर्ता प्राणानायम्य, यज्ञोपवीतभूतं गुरुमुद्दिश्य नारायणबलिं करिष्य इति सङ्कल्प्य, उल्लेखनप्रभृति प्रणीतिसादनपर्यन्तङ्कृत्वा, अग्नेः पुरस्तात् श्रीभूमिसहितं विष्णुं पुरुषसूक्तेनाद्यया ऋचावदया(वाहये)त् ॥

End:

अपरपक्षे सङ्कर्षणादिनामभिराराधयेत् । नारायण . . . .
नञ्च सङ्कर्षणादिनामभिः कुर्यात् ॥

एवं यः कुरुते विद्वान् ब्रह्मलोके महीयते ॥

Colophon:

इति नारायणबलिः समाप्तः ॥

No. **3658.** नारायणबलिः.

NĀRĀYAṆABALIḤ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 8*b* of the MS. described under No. 3302.

Similar to the above.

Beginning :

अथ भगवत्परस्य सच्छूद्रस्य मृतस्य नारायणबलिः कर्तव्यः ।· तस्य प्रयोगः—

शास्त्रोक्तस्वाशौचान्त्यदिने मृतस्य पुत्रादिः कर्ता चतुर्भिः(रः) कलशान् चत्वारिंशद्वा. . . . .

पुण्यतिथौ नारायणबलिकर्माङ्गं मण्डपशुध्यर्थं सर्वोपकरणशुध्यर्थं शिष्याणां शरीरशुध्यर्थं पुण्याहवाचनं करिष्ये—इति सङ्कल्प्य.

End :

कुम्भोदकेन स्थापितं पाषाणं प्रोक्ष्य, अथ शिष्यः शिलां विसृज्य, ऋत्विग्भ्यो दक्षिणां दत्वा पूतो भवति ॥

Colophon :

नारायणबलिस्समाप्तम्(:) ॥

No. **3659.** नारायणबलिः.

NĀRĀYAṆABALIḤ.

Pages, 12. Lines, 7 on a page.

Begins on fol. 30*a* of the MS. described under No. 2951.

According to Bōdhāyana.

Complete.

Beginning :

बोधायनोक्तनारायणबलिप्रयोगो लिख्यते—

देवालये नदीतीरे गृहाङ्कणे वा विप्रो नारायणबलिं कुर्वन् ब्राह्मणैरनुज्ञातः पूर्वेद्युः केशवाद्यर्थं क्रमात् द्वादश षड्वा चतुरो वा विप्रान् वृत्वा, पूर्वेद्यू रात्रौ तैस्सह नियमेनोपोष्य.

End :

ब्रह्मोद्वासनम् । आचार्यं वस्त्रभूषणादिभिरलंकृत्य विसृजेत् । आचमनं कुर्यात् ॥

Colophon :

बोधायनोक्तनारायणबलिप्रयोगस्समाप्तः ॥

No. **3660.** नारायणबलिः.

NĀRĀYAṆABALIḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 51*a* of the MS. described under No. 3029.

Incomplete.

Beginning :

देवालये नद्यां तटाके वा जलसमीपे वा स्वगृहे वा ब्राह्मणसमीपे यथाशक्ति दक्षिणां दर्भांश्च गृहीत्वा, सभां समस्तसंपादिति त्रिः प्रदक्षिणीकृत्य, समस्तसम्पत् . . . . . . गोविन्दाय नमो नमः ॥

End :

पितुः गोत्रस्य शर्मणः प्रेतस्य दुर्मरणजनितपिशाचा(चत्वादि) निवृत्तिद्वारा प्रेतसंस्कारयोग्यतासिध्यर्थं नारायणबल्यङ्गब्राह्मणभोजनं कृत्वा.

No. **3661.** नारायणबलिः.

NĀRĀYAṆABALIḤ.

Substance, palm-leaf. Size, $16\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 7. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance, new.

Begins on fol. 19*a*. The other works herein are, Prapannanityakriyā 1*a*, Prapannabrahmamēdhavidhi 14*a*, Pārvaṇaśrāddhaprayōga 22*b*.

According to Hārīta.

Complete.

Beginning:

अथ हारीतोक्तनारायणबलिप्रयोगो लिख्यते—

पूर्वेद्युः कर्ता आ(चम्य), केशव - नारायण - माधव - गोविन्द . . . . उपेन्द्र - हरि - कृष्णान् चतुर्विंशतिमूर्तीन्(:) निमन्त्रयेत। तत्क्रम(शः) चतुर्विंशतिसङ्ख्याकान् श्रीवैष्णवानाहूय, पादौ प्रक्षालयित्वा, आसनेषूपवेशयित्वा, प्रणम्य, अञ्जलिं बद्ध्वा, गोत्रस्य शर्मणः मम पितुः मरणादित्रये(यो)दशदिने श्वः नारायणबलिर्भाविष्यति(ता) तत्र केशवाद्यर्थे भवद्भिः प्रसादः करणीयः ।

End:

हस्तप्रक्षालनार्थं तीर्थं दत्वा, ताम्बूलादिकं समर्प्य विसर्जयेत् । कर्ता हविष्यान्नं सकृद्भुक्त्वा, भूमौ कुशौत्त(शास्त)रे स्वप्यात् ॥

अथ नारायणबलिर्मुनिभिस्संप्रकीर्तितः ।
स्वर्गतानां च सर्वेषां कर्तव्यो वैष्णवोत्तमैः ॥

* * * *

तस्मिन् संपूजिते विप्रे दु(तु)ष्यन्त्येव न संशयः ।
इत्याह भगवान् हारीतः ॥

No. **3662.** नारायणबलिप्रयोगः.

NĀRĀYAṆABALIPRAYŌGAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 175*a* of the MS. described under No. 2745.

Incomplete

Beginning:

गृह्यपरिशिष्टोक्तनारायणबलिप्रयोगः कथ्यते—

दुर्मृतानां त्वर्वाक् संवत्सरमध्ये शुक्लैकादश्यां प्रातश्शुचिर्भूत्वा, दशपिण्डार्थं पिष्टघृतगुडवस्त्रतुलसीचन्दनताम्बूलाहिरण्यगोमिथुनतण्डुलताम्रपात्राणि संपाद्य, कृष्णादिपुण्यनदीतीरं गत्वा, स्नात्वाचम्य, प्राणानायम्य, संकल्प्य, दुर्मृतस्याप्यायनार्थं पुण्यलोकावाप्त्यर्थं चित्रगुप्तब्रह्मविष्णुमहेश्वरधर्मराजप्रीत्यर्थं नारायणबलिं करिष्य इति संकल्प्य.

End:

गोदानादिदशदानानि कृत्वा, उत्तरसंकल्पान्ते गङ्गायां पिण्डानि निक्षिप्य, ब्राह्मणेभ्यः दक्षिणाताम्बूलादिकं दत्वा, ब्राह्मणैस्सह भोजनं कुर्यात् । य(सर्वे)स्मिन् कर्मण्यपि गङ्गाविष्णुस्मरणा कर्तव्या ॥

No. **3663.** नाल्वेष्टनशान्तिः.

NĀLAVĒṢṬANAŚĀNTIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 3533.

Regarding certain ceremonies performed to avert the evil consequences of a child being born with the umbilical cord twined round the body.

Complete.

Beginning:

अथातो नाळवेष्टनशान्तिविधिं व्याख्यास्यामः—

शिशोर्मातापित्रोर्मातुर्मातुलस्य गण्डदोषा(दि)निवृत्त्यर्थं शान्तिं प्रकुर्वीत ।

नाळनाळेन संवेष्ट्य यस्य पुत्रः प्रजायते ।
तस्य मृत्युं विजानीयात् षण्मासाद(भ्य)न्तरं(रे) भवेत् ॥
पादपूर्वन्तु जातश्च सदन्तश्च विशेषतः ।
गण्डनक्षत्रजातश्च दोषकृत्सर्वदा भवेत् ॥

* * * *

एकनाळं पित्तृं हन्ति(हन्त्येकनालं पितरं) वेष्टने मातरन्तथा ।
उत्ति(त्तरी)योपवीतश्च मातुलं भ्रातरन्तथा ॥
शिरो(रे) वा कटिमूले वा सगोत्रधननाशनम् ।
शान्तिश्च पुष्कला कार्ये(र्या) तत्तद्दोषानुप(पनु)त्तये ॥

End:

ब्राह्मणं संपूज्य, सुवर्णप्रतिमामाज्यश्च दद्यात् । आचार्यायर्त्विग्भ्यो दक्षिणान्दद्यात् । ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा सर्वपापैः प्रमुच्यते । अक्षय्यफलमाप्नो(ती)त्याह भगवान् बोधायनः ॥

No. **3664.** पञ्चगव्यप्रयोगः.

PAÑCAGAVYAPRAYŌGAḤ.

Substance, palm-leaf. Size, 13 × 1¼ inches. Pages, 3. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 47*a*. The other works herein are:—

Mahānyāsapūrvakapūjāvidhi 1*a*, Viṣṇusahasranāmastōtra 32*a*, Tryambakakalpa 49*a*.

Gives the details of an expiatory ceremony in which the five products of the cow are used.

Complete.

Beginning:

गोमूत्रं गोमयं क्षीरं दधि सर्पि(:) कुशोदकम् ।
पञ्चगव्यं तु निर्दिष्टं पवित्रं कायशोधनम् ॥
नीलवर्णं तु गोमूत्रं कृष्णागोमयमुच्यते ।
ताम्रवर्णैः(र्णा)पयश्चैव श्वेताया दधि चोच्यते ॥

* * * *

अनन्तरमग्निमुखं कृत्वा, परिसमूहादिपर्युक्षणान्तं कृत्वा, पञ्चगव्येनाघारावाज्यभागं कुर्यात् ।

End:

आलोड्य प्रणवेनैव निर्मन्थ्य प्रणवेन तु ।
उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु ॥
यत्त्वगस्थिगतं पापं देहे तिष्ठति मामकम् ।
प्राशनात्(नं) पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥
यन्मन्त्रं प्रणवं ही(वेनो)नं तन्मन्त्रं प्राणनाशनम् ।
सर्वेषामेव मन्त्राणां प्रणवं(वः) प्राण मु(उ)च्यते ॥

No. **3665.** पञ्चगव्यहोमः.

PAÑCAGAVYAHŌMAḤ.

Pages, 2. Lines, 13 on a page.

Begins on fol. 1*a* of the MS. described under No. 3562.

A fire-offering to be conducted in connection with the above ceremony.

Incomplete.

Beginning:

एवंगुणेत्यादिशुभतिथौ श्रीविष्णुप्रीत्यर्थं सर्वेषां महाजनानां तत्तद्गोत्राणां तत्तन्नामधेयानामभक्ष्यभक्षणदोषपरिहारार्थं शरीरशुद्ध्यर्थं ब्रह्मकूर्चविधानेन पञ्चहव्यहोमाख्यं कर्म कर्तुं तदङ्गस्थण्डिलोल्लेखनाद्यग्निप्रतिष्ठापनं करिष्ये ।

* * * *

एतैस्संप्रोक्ष्य पञ्चगव्यहोमे अन्वाधानं करिष्ये । तत्र देवतेत्यादि अग्निन्दूतमाप्यायस्व ।

End:

समस्ताभिर्हुत्वा होमशेषं समापयेत् । प्रणवेनालोड्य प्रणवेन.

No. **3666.** **पञ्चयज्ञप्रयोगः.**

PAÑCAYAJÑAPRAYŌGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 25*b* of the MS. described under No. 2821.

Gives details regarding the process of performing the five courses of daily worship prescribed in the Smṛtis.

Complete.

Beginning:

पञ्चमहायज्ञप्रकार उच्यते ।

देवयज्ञेन यक्ष्ये । विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि । देवेभ्यस्स्वाहा । देव सवितः प्रासावीरित्यनुपर्युक्षणम् । वृष्टिरसि वृश्च मे पाप्मानमृतात्सत्यमुपागाम् । वामदेव्यगानम् ।

End:

ब्रह्मयज्ञेन यक्ष्ये । विद्युदसि विद्य मे । देव सवितस्स्वाहा । इत्यमौ होमः । देव सवित(ः) प्रासावीरित्यनुपर्युक्षणम् । वामवेव्यगानम् ।

Colophon:

इति पञ्चमहायज्ञस्समाप्तः ॥

No. **3667.** **पञ्चसंस्कारविधिः.**

PAÑCASAṀSKĀRAVIDHIḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 3533.

Deals with the five essential ceremonies prescribed for all Śrī-Vaiṣṇavas.

Incomplete.

Beginning:

अथातः पञ्चसंस्कारविधिं व्याख्यास्यामः—

तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः ।
अमी परमसंस्काराः प(ा)रमैकान्ति(न्त्य)हेतवः ॥
वसन्ते दीक्षयेद्विप्रान् ग्रीष्मे राजन्यमेव च ।
शरदस्समये वैश्यान् हेमन्ते शूद्रमेव च ॥
स्त्रियाश्च वार्षिके काले दीक्षयेत यथाविधि ।
मन्त्रारम्भे सदा वर्ज्यं पितृमासचतुष्टयम् ॥

End:

ततोऽन्ये शुभदा मासा इति केचित्प्रचक्षते ।
दीक्षाकाले ग्रहास्सर्वे रन्ध्रस्थाने विनाशदाः ॥

No. **3668.** **पञ्चसंस्कारधारणप्रयोगः.**

PAÑCASAṀSKĀRADHĀRAṆAPRAYŌGAḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 4*a* of the MS. described under No. 3517.

Similar to the above.

Complete.

Beginning:

श्रीमान् वैदिकसार्वभौमस्सदाचार्यः स्वस्य शिष्यस्य च समुचिते पुण्ये दिने लग्ने पादौ प्रक्षाल्याचम्य, पवित्रपाणिर्गृहीतदक्षिणाताम्बूलो वैदिकगोष्ठीमध्ये तिष्ठन् नमस्सदस इति वैदिकमन्त्रमनुसन्धाय, अये सर्वे सदस्या महान्तः मदीयामिमां विज्ञापनां समाकर्ण्य, मया यथाशक्ति समर्पितामिमां दक्षिणां यथोक्तदक्षिणामिवाङ्गीकृत्य, एतेषां ब्रह्मवंशप्रसूतानाममुकगोत्रसूत्राणां स्त्रीपुं(स)भेदेन भिन्नानां चेतनानां तापादिपञ्चसंस्कारधारणार्थं योग्यतासिद्धिरस्त्विति भवन्तोऽनुगृह्णन्तु ।

End :

समं पूर्वेण । ओं भूर्भुवस्सुवस्स्वाहा ।
एवमाज्यभागान्तम् अग्नये स्वाहेत्यग्निमुखान्तम् ॥

No. **3669.** पञ्चसंस्कारप्रयोगः.

PAÑCASAṀSKĀRAPRAYŌGAḤ.

Pages, 19. Lines, 7 on a page.

Begins on fol. 14*a* of the MS. described under No. 133.

Similar to the above.

Complete.

Beginning :

समन्त्रकं शुभे दिने शुभनक्षत्रे परीक्षितं शिष्यमाचार्यः पञ्चसंस्कारकर्मणा संस्करिष्यामीति सङ्कल्प्य, आचार्यः शिष्येण साकं तीर्थस्नानं कृत्वा, कृतनित्यकर्मा भगवदाराधनं कृत्वा, तत्र पूर्वेद्युः प्रातः अमुकगोत्रस्य अमुकशर्मणः पञ्चसंस्काराङ्गभूतमङ्कुरार्पणं कृत्वा, अपरेद्युः प्रतिसरबन्धनं कृत्वा, अथ शिष्यः प्राङ्मुखमासीनः प्राणानायम्य, होमसङ्कल्पं कृत्वा, अस्य नारायणशर्मणः नारायणदास्यसिद्ध्यर्थं दृष्टादृष्टपूर्वकभगवत्प्रसादसिद्ध्यर्थं पञ्चसंस्कारकर्मणा संस्करिष्यामीति सङ्कल्प्य, प्राग्भागे देवं पश्चान्मुखमाराध्य, कलशे तीर्थं सम्पूर्य, तस्योपरि कूर्चं निधाय, वरुणमावाह्य, गन्धपुष्पधूपदीपादिभिः अभ्यर्च्य, नैवेद्यं कृत्वा, तत उदग्भागे पञ्च कलशान् तण्डुलोपरि निक्षिप्य, पञ्चत्वचं पञ्च पल्लवान्निक्षिप्य, पञ्च रत्नानि निक्षिप्य, नूतनवस्त्रैरलङ्कृत्य, ।

चन्दनागरुकर्पूरजाजीफलकरेणवः ।

इति पञ्च त्वचः । अश्वत्थचूताशोकक्रमुकनारिकेळाः पञ्च पल्लवाः निक्षिप्य.

End :

पद्मनाभाय मन्त्रेण पृष्ठे वै धारयेत्क्रमात् ।
दामोदराय मन्त्रेण धारयेत्पश्चिमे गळे ॥

द्वादशाक्षरमुच्चार्य शेषं शीर्षे तु धारयेत् ।
ललाटे कण्ठदेशे च स्कन्धयोश्च त्रिके तथा ॥

चतुरङ्गुळमानानि पञ्च पुण्ड्राणि धारयेत् ।
हृदये चोदरे चैव पार्श्वयोः पृष्ठ एव च ॥

बाह्वोर्मध्ये च सप्त स्युः पुण्ड्राण्यष्टाङ्गुलानि वै ।
द्व्यङ्गुलं विस्तृतं रम्यं चतुरङ्गुळमायतम् ॥

प्रथमव्यूह एव स्यात् पञ्चपुण्ड्रस्य लक्षणम् ।
त्र्यङ्गुलं विस्तृतं रम्यमष्टाङ्गुलकमायतम् ॥

द्वितीयव्यूह एवं स्यात् सप्तपुण्ड्रस्य लक्षणम् ।

भरद्वाजः—

ऊर्ध्वपुण्ड्रविधौ मोक्षमङ्गुष्ठं तर्जनी श्रियम् ।
मध्यमः पशुपुत्रादि मोक्षैश्वर्यमनामिका ॥

वश्यं कनिष्ठिका कुर्यात् नचान्येन विधीयते ।
यथाकामं न वर्याभिः(वर्त्यांद्यैः) न नखैरिति केचन ॥

चतुरङ्गुलमूर्ध्वाग्रं द्व्यङ्गुलं विस्तृतं तथा ।
द्विजः पुण्ड्रमृजुं कुर्यात् सान्तराळं तु धारयेत् ॥

ऊर्ध्वपुण्ड्रस्य मध्ये तु विशाले सुमनोहरे ।
श्रिया सार्धं समासीनो रमेऽहं तत्र निर्वृतः ॥

इति ऊर्ध्वपुण्ड्रविधिः ॥

No. 3670. पञ्चसंस्कारप्रयोगः.

PAÑCASAMSKĀRAPRAYŌGAḤ.

Pages, 6. Lines, 7 on a page.

Begins on fol. 15a of the MS. described under No. 305.

Similar to the above.

Complete.

Beginning:

सुप्रक्षाळितपाणिपादः स्वाचान्त आचार्यः प्रातरौपासनं कृत्वा, शिष्येण सह श्रीमन्नारायणं प्रणम्य, (आ)चार्यैरनुज्ञातस्सन् श्रीवैष्णवाननुज्ञाप्य, दर्भेष्वासीनः दर्भान् धारयमाणः पवित्रपाणिः प्राणानायम्य, गोत्रस्य शर्मणः शिष्यस्य भगवत्कैङ्कर्ययोग्यतासिद्ध्यर्थं शिष्यं तापादिभिः पञ्चभिस्संस्कारैः संस्करिष्यामीति सङ्कल्प्य, सात्त्विकत्यागं कृत्वा, शिष्यात्मशुद्ध्यर्थं पञ्चगव्यसंयोजनं कृत्वा, पञ्चसंस्कारकर्माङ्गं प्रतिसरबद्ध(न्ध)कर्म द्वि[ति]जातेः स्वगृह्योक्तविधिना कुर्यात् । स्त्रीशूद्रादीनां तान्त्रिकेनैव विधिना कुर्यात् । ततः स्वगृह्योक्तविधिनाग्न्युपसमाधानाद्यग्निमुखान्तं कृत्वा, अग्नेरुदीच्यां प्राच्यां वा तण्डुलं चतुरश्रं कृत्वा, तस्मिन् षोडश कोष्ठान्विलिख्य तेषु प्रतिकोष्ठं कलशं यथासम्भवं कूर्चं वा निधाय, तेषु देवताना(मा)वाहनार्थं शुद्धोदकमापूर्य.

End:

मन्त्रानुपदिश्य वृत्तिमुपदिशेत् विहितानुष्ठानं निषिद्धवर्जनञ्च । ततः प्रत्यादेशं प्रणवेन शिष्यः स्वीकृत्य, बहुशः प्रणम्यात्मानं गुरवे निवेदयेत् । गुरुर्जयादिपरिषेचनान्तं कृत्वा, आवाहितदेवतोद्वासनं ब्रह्मोद्वासनं परिधिप्रहरणादितन्त्रशेषं समाप्य, आशिषो वाचयित्वा, तत्तत्काले अभिगमनादिकान् धर्मानुपदिशेत् । शिष्यो गुरवे वरं दत्वा, भागवतान् दक्षिणादिभिस्समाराध्य, सततमाचार्यं परं ब्रह्म मन्वानः तन्नामोच्चारयन् सुखं वर्तेते । तन्मूर्तिं मनसा ध्यायन् नाम दासान्तं दक्षिणकर्णे जपेत् । नामदेवतानां पुनः पूजा(ः) कुर्यात् ॥

No. 3671. पञ्चसौदर्शनीप्रायश्चित्तप्रयोगः.

PAÑCASAUDARŚANĪPRĀYAŚCITTAPRAYŌGAḤ.

Pages, 9. Lines, 8 on a page.

Begins on fol. 33a of the MS. described under No. 2631.

Treats of such of the Prāyaścittas or expiatory ceremonies as have to be performed to extricate one from the effects of the sins and as extend over periods varying from a year to twenty years.

Complete.

Beginning:

अथातस्सौदर्शिनी नाम प्रायश्चित्तप्रयोगो लिख्यते—

हेमाद्रिवैद्यनाथाद्यैः अतिद्रव्यसाध्यप्रायश्चित्तं कर्तुं मनुष्याणामशक्यत्वेन तदनिर्धृ(तपापा)नां वर्षादूर्ध्वं न निष्कृतिरिति स्मृतिवचनात् वर्षादूर्ध्वं प्रायश्चित्तं नोक्तम् । यदि द्रव्यमस्ति; तद्व्ययेन ब्राह्मण्यादिकं सम्पादितुमप्यास्था यदि; तेषां नारायणादिस्मृत्युक्तप्रायश्चित्तमस्त्येव; तदेकवर्षादिविंशतिवर्षपर्यन्तम् । तच्च वक्ष्यते—

प्रथमं प्रायश्चित्तारम्भपूर्वदिने सायाह्ने पूर्वो(क्त)क्रमात् क्षौरं, दन्तधावनं, प्रायश्चित्तारम्भदिने नित्यकर्मावसाने प्राच्याङ्गगोदानं, यजमादा(ना)नुवादकविधायकसंवादः, परिषत्संमेलनम् ।

* * * *

आहत्य सर्वकलशाः द्विशतं भवन्ति । पूर्वोक्तद्विशतकलशस्थापनेन साक्षात्सुदर्शनाकारो भवति । अत एव सौदर्शिनीति तन्नाम भवति । पञ्चसौदर्शिनीनां स्थापनक्रमश्च ।

End:

विरजाहोमश्च जुहुयात् । तदशक्तौ शतं शतं वा जुहुयात् । देवस्य त्वेति मन्त्रेण अवरोहणक्रमेण सहस्रकलशोदकैरभिषेचयेत् । अन्यत्सर्वमेकसौदार्शिनीवत् कुर्यात् पञ्चसौदर्शिन्याम् ।

द्वितीयाब्दं समारभ्य यावद्विंशतिवत्सरम् ।

दिनसङ्ख्यया चान्द्रायणद्वयं कार्यम् । तदशक्तौ षड्गुणितषडब्दं वा कृच्छ्राचरणं कार्यमित्ययं विशेषः ॥

Colophon :

इति पञ्चसौदर्शिनीप्रायश्चित्तप्रयोगः ॥

कौण्डिन्यस्मृतिप्रोक्तपञ्चसौदर्शिनीप्रयोगे तु होमक्रमः—

गणहोमशतं, कूश्माण्डहोमशतं, पाहित्रयोदशहोमशतं, प्राणा(यामः), पञ्चमन्त्रहोमाष्टोत्तरशतं, गायत्र्या शतसाहस्रहोमः, पञ्चवारुणमन्त्राष्टोत्तरशतहोमः । अनिर्वाणप्रदि(दी)पं संहितापठनं चाधिकम् । अन्यत्सर्वं नारायणस्मृत्युक्तवत् ॥

No. 3672. परमसंस्कारप्रयोगः.

PARAMASAṀSKĀRAPRAYŌGAḤ.

Substance, palm-leaf. Size, 16¾ × 1¼ inches. Pages, 8. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 47*a*. The other works herein are—Śrāddhaprayōga 1*a*, Śrāddhavamanādiprāyaścitta 15 and 22*a*, Śiśupālavadham 27*a*, Śabdamañjarī 44*a*.

Deals with the five supremely purificatory ceremonies of the Śrī-Vaiṣṇavas, ordinarily known as Pañca-saṁskāras.

Complete.

Beginning :

अथातः परमसंस्कार(विधिं)व्याख्यास्यामः—

तापः पुण्ड्रस्तथा नाम मन्त्रो यागश्च पञ्चमः ।
अमी परमसंस्काराः प(ा)रमे(मै)कान्ति(न्त्य)हेतवः ॥

तत्र चक्रादिधारणमनुकूलदिनेषु पृथक् पृथक् कुर्यात् । सर्वानेकस्मिन्दिने वा कुर्यात् पूर्वापरविधिब्राह्मणविधिना । अथ सदसद्विवेका-

दसतो निर्विद्य विरक्तं घटकद्वारेणागतं शिष्यमाचार्यः विविधोपायैस्सम्यक् परीक्ष्य तापादिभिस्संस्कुर्यात् । तस्य प्रयोगः—

* * * *

तापादिहोमं करिष्य इति सङ्कल्प्य, अन्वारब्धे शिष्ये मूलमन्त्रेण षोडशाहुतीर्हुत्वा, प्रत्यक्षरं पुनर्मूलमन्त्रेण देवीमन्त्रैः प्रत्येकं षोडश ।

End :

एवं सम्बोधितशिष्यस्तदशक्तौ स्वयं वा गुरुपरम्परापूर्वकं द्वयमर्थवदुच्चार्य आत्मानं भगवत्पादारविन्दयोः न्यसेत् । तत्प्रकारश्चाहं मद्रक्षणभर इत्याद्युक्तम् । एवमात्मसमर्पणं कृत्वा(कुर्यात्) ॥

No. 3673. पर्जन्यशान्तिः.

PARJANYAŚĀNTIḤ.

Pages, 5. Lines, 4 on a page.

Begins on fol. 133*a* of the MS. described under No. 2973.

Regarding certain ceremonies performed with a view to remove drought.

Complete.

Beginning :

अथातः पर्जन्यशान्तिविधिं व्याख्यास्यामः—

यस्मिन् देशे अनावृष्टिः स्यात्; तस्मिन् देशे सुवृष्टिसिद्ध्यर्थं सर्वतटाकपरिपूर्तिसिद्ध्यर्थं पर्जन्यशान्तिं करिष्यमाणः तदङ्गपुण्याहवाचनं कृत्वा, सङ्कल्प्यैवं(कं) विधा(ना)यकपूजार्थं नियम्य, पर्जन्यसूक्तजपार्थं द्वादश ब्राह्मणान्नियम्य.

End :

पुरोवातो वर्षम्(न्)—इति मन्त्रेण हुताय पर्जन्यायेत्युद्देशत्यागं होमान्ते पश्चिमाभिमुखो भूत्वा, पीवोऽन्नामित्यनुवाकं जपेद्ब्राह्मणान् भोजयेत्— इत्याह भगवान् बोधायनः ॥

No. 3674. पर्जन्यहोमः.

PARJANYAHŌMAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 89*a* of the MS. described under No. 430.

A fire offering to propitiate the god of rain.

Complete.

Beginning:

अथातः पर्जन्यविधिं व्याख्यास्यामः—

आचार्यस्य(श्च)शुचिर्भूत्वा, वारुणकलशं स्थापयित्वा, वरुणप्रार्थनं कुर्यात् । इन्द्रं वो विश्वतस्परि—इतीन्द्रप्रार्थनम्; त्रातारमिन्द्रमित्याद्यष्टदिक्पालकान् पूजयेत्; ऋत्विग्वरणं कुर्यात्; मृत्तिकास्नानं कुर्यात्; प्राणायामपूर्वकं देशकालादिसङ्कीर्तनानन्तरं यजमानस्य राष्ट्रस्य सर्वे(षां) तटाकाः(नां)सर्वदा नद्य(ा)श्च परिपूर्णजलसिद्ध्यर्थं महावृष्टिप्राप्त्यर्थं नाभिप्रदेशमानम्.

End:

ततो जयादि(भि)र्जुहुयात् । पूर्णाहुत्यनन्तरं शान्तिपठनं कुर्यात् । यावद्दीक्षा तावत्पर्यन्तं ब्रह्मचर्यं चरेत् । ऋत्विग्भ्यो दक्षिणां दद्यात् । ब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ॥

No. 3675. पापपुरुषदहनम्.

PĀPAPURUṢADAHANAM.

Pages, 4. Lines, 5 on a page.

Begins on fol. 72*a* of the MS. described under No. 29.

Deals with the cremation of the dead body of sinful persons.

Complete.

Beginning:

अद्य पूर्वोक्तैवङ्गुणविशेषणविशिष्टायां शुभतिथौ भूतशुद्धिः(द्ध्यै) पूर्वं मनोवाक्कायकर्मजनितपापपुरुषशरीरं शोषणदहनप्लवनदग्धादिव्यानि(व्यं) करिष्ये । हृदये हस्तं निधाय, ओमिति षोडशवारं जपित्वा, सोऽहमिति षोडशवारं जपन्, यमिति षोडशवारं जपन्, हंसस्सोऽहमिति षोडशवारं जपन्, कुक्षौ नाभेरधस्तु वामपार्श्वे हस्तं निधाय ।

End:

मूर्धादिपादपर्यन्तान्यङ्गानि संस्पृशेत् । तत आचम्य, ह्रामित्याकाशबीजं जपन्, तत्पापपुरुषशरीरं दिव्यं करिष्यामीति सङ्कल्प्य, हमिति द्वादशवारं जपन्, पूर्ववत्पूर्व(र)ककुम्भकरेचकानि कुर्यात् ॥

Colophon:

इति पापपुरुषदहनं सम्पूर्णम् ॥

No. 3676. पार्वणश्राद्धप्रयोगः.

PĀRVAṆAŚRĀDDHAPRAYŌGAḤ.

Pages, 11. Lines, 7 on a page.

Begins on fol. 22*b* of the MS. described under No. 3661.

Gives details of the annual Śrāddha ceremony as conducted elaborately.

Complete.

Beginning:

अथ पार्वणश्राद्धप्रयोगो लिख्यते—

पितुः प्रत्याब्दिकात् पूर्वस्मिन् दिने कृतसायमौपासनः निमन्त्रयिष्यमाणभागवतगृहं गत्वा, त्रीन् भागवतान् प्राङ्मुखानासनेषूपवेश्य, तेषां हृदयेषु श्रिया सहितं भगवन्तं मू(ल)मन्त्रेण ओं नमो ब्रह्मणे . . नमः—इति प्रणम्य, उदङ्मुखः प्राञ्जलिः श्वश्श्राद्धं भविता तत्र भवद्भिः प्रसादः करणीयः—इति निमन्त्र्य, तथैवास्त्वविघ्नेनं रजनीति तैः प्रत्युक्ते प्रणमेत्—इति पूर्वदिनकृत्यम् ।

प्रातर्नित्यकर्मान्ते सर्वतो गृहं(हे) गोमयोपलिप्ते रङ्गवल्ल्याद्यल-ङ्कृते पुण्याहजे(जले)न प्रोक्ष्य, सर्वतस्तिलान् प्रकीर्य,

End:

उत्तरप्रस्तरे मूलादिक्रमात् पद्मेषु प्रद्युम्नादीनावाह्य, तेषां वक्षोभ्यः दक्षिणप्रस्तरे प्रतिशान्तिश्रियोऽवतीर्णा ध्यात्वा नित्यान् मुक्तांश्च भग-वत्परिवारान् ध्यात्वा ॥

*   *   *   *

Colophon:

इति पार्वणश्राद्धप्रयोगः ॥

No. 3677. पार्वणश्राद्धप्रयोगः.

PĀRVAṆAŚRĀDDHAPRAYŌGAḤ.

Pages, 3. Lines, 8 on a page.

Begins on fol. 6*b* of the MS. described under No. 2902.

Similar to the above.

Incomplete.

Beginning:

अथ यज्ञाः—

सिद्धिदिनादारभ्यैकादशेऽहनि पार्वणश्राद्धं कर्तव्यम् । सर्वं पार्व-णश्राद्धवदेव कुर्यात् । आदौ सूक्तपठनं, समस्तसंपद्ब्रह्मदण्डः, अधि-कारसंपत् । संकल्प्य, एवं विशेषः—एवङ्गुणविशेषणविशिष्टायां तिथौ अस्मत्पितुः ब्रह्मीभूतस्य सिद्धिं गतस्य भिक्षोरमुकनामभगवत्पूज्यपा-दस्य सिद्धिदिनादारभ्यैकादशेऽहनि पितृतुष्ट्यर्थं कर्तव्ये पार्वणश्राद्धे.

सपिण्डीकरणं तेषां न कर्तव्यं सुतादिभिः ।
नारायणबलिं तत्र कुर्याद्वै द्वादशेऽहनि ॥
आमावास्यादिकं कुर्यात् ॥

Colophon:

इति पार्वणश्राद्धविधिः ॥

सिद्धिदिनादारभ्य द्वादशेऽहनि नारायणबल्याख्याराधनं कार्यम् ।

End:

ब्राह्मणेषु विश्वरूपधरं विष्णुं ध्यात्वा, केशवादिमूर्तिं ध्यात्वा, पुरुष-सूक्तेन षोडशोपचारान् कृत्वा, वस्त्रालंकारादि दत्वा, नामा(अन्ना)दिकं परि-वेष्य, [अन्नत्यागं] तत्तन्मूर्त्युदे(द्दे)शेन अन्नत्यागं च कृत्वा, भोजनान्ते उच्छिष्टसन्निधौ चतुरश्रमण्डलं चतुरः पुष्पा.

No. 3678. पालाशहोमः.

PĀLĀŚAHŌMAḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 64*a* of the MS. described under No. 430.

An offering under a Palāśa tree to the sacred fire, with a view to secure the growth of intelligence in a young boy who has just begun to be a student.

Complete.

Beginning:

वासश्चतुर्थीमुत्तरया धत्तेऽन्यत्परिधाप्य,
मौञ्जच(ञ्जीम)जिनदण्डांश्च पालाशाग्रे विनिक्षिपेत् ।
तद्वासो ब्रा(ब्र)ह्मणे दद्याद्वटुरन्यत्तु(त्तु)धारयेत् ॥ यस्य ते . .

. . . . . बहवस्सुजातम् । आपस्तम्बमत्यैतदन्तमुपनयनम् . केचित्पालाशं कर्म कुर्वन्ति । त्रीण्यहानि प्रत्यहमामभैक्षमाचरेत् । चतु-र्थेऽहनि अन्नसंस्कारेण संस्कृत्य.

*   *   *   *

कुमारस्य मेधाजननसिद्ध्यर्थं पालाशं कर्म करिष्ये—
पलाशमूलमलङ्कृत्य.

End :

कङ्कणं मोचयिष्यामि रक्षांसीव कदाचन ।
मयि रक्षां स्थिरां बद्ध्वा देव त्वं गच्छ कङ्कण ॥

No **3679.** पालाशहोमः.

PĀLĀŚAHŌMAḤ

Pages, 3. Lines, 6 on a page.

Begins on fol. 5*b* of the MS. described under No. 3533.

Similar to the above.

Complete.

Beginning :

पालाशं कर्म कुर्वन् ग्रामात्प्राच्यु(चीमु)दीचीं वा दिश(मु)पनिष्क्रम्य, अस्य कुमारस्य मेधाजननसिद्ध्यर्थं पालाशं कर्म करिष्य इति सङ्कल्प्य, पलाशस्याधस्तात् स्थण्डिलं कल्पयित्वा, तत्रोपनयनाग्निं प्रतिष्ठाप्य ।

* * * *

पूर्वधृतानि उपवीतं विना मेखलाजिनदण्डानि पलाशाग्रे त्यक्त्वा, तत्तन्मन्त्रेणान्यानि नवानि धृत्वा, चतुर्थेऽहनि पूर्वधृतं वस्त्रं विसृस्य अन्यत्परिधाय.

End :

प्रायश्चित्तं, प्राणायामं, परिषेचनं, प्रणीतावो(प्रो)क्षणं, ब्रह्मोद्वासनम्, अग्न्युपस्थानञ्च कुर्यात् । ब्राह्मणेभ्यो दक्षिणान्दद्यात् ॥

No. **3680.** पितृमेधप्रयोगः.

PITṚMĒDHAPRAYŌGAḤ.

Substance, palm-leaf. Size, 11⅗ × 1⅗ inches. Pages, 25. Lines, 8 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Begins on fol. 77*a*. The other works herein are :—

Prayōgasārapīyūṣa 1*a*, Prayōgasāra 54*a*, Vaiśvadēvaprayōga 66*a*, Brahmakūrcaprayōga 67 and 93*a*, Prathamamāsikādividhāna

69*a*, Hastāmalakastōtra 73*a*, Jyōtiṣmatīkalpa 75*a*, Pañcākṣarīmantravidhāna 90*a*, Sahasrabhōjanavidhi 92*a*, Śrāddhīyapiṇḍanikṣēpakramakārikā 94*a*, Viṣṇupañjaram 99*a*.

Gives details of the various funeral ceremonies.

Adhyayas 1 to 8 complete 9th incomplete.

Beginning :

श्रीबोधायनपितृमेधप्रयोग उच्यते ।

अनाहिताग्नेः प्रेतौपासनविधिः—

अथ गृहस्थस्य विच्छिन्नौपासनाग्नेः प्रेतस्याग्निमुपसमाधाय, प्राणानायम्य, प्रेतस्य नष्टमग्निं पुनस्सन्धास्ये । तत्राग्न्यादयो देवताः, आज्यं हविः, आग्निहोत्रिकं तन्त्रं, सद्यो यक्ष्य इति सङ्कल्प्य(ल्पः).

* * * *

इति शिरोदेशे औपासनेन पूर्वमृतं गृहिणं पत्नीं वा दहेत्; पश्चान्मृतं निर्मन्थ्येनोत्तपनीयेन वा । निर्मन्थ्येन कुमारांश्च स्त्रियश्चोत्तपनीयेन वा ततोऽन्यानि(ति) व्यवस्था ॥

Colophon :

इति विष्णुभट्टीये पैतृमेधिककाण्डे प्रेतसंस्कारः प्रथमोऽध्यायः ॥

End :

गृहशुद्धिं विधाय, पुण्याहं वाचयित्वा, बन्धुभिस्सह भुञ्जीत, श्वोभूते पायसश्राद्धं सदैवमामेन कृत्वा धृतं वस्त्रखण्डं पित्र्यब्राह्मणाय दद्यात् ॥

इति सपिण्डीकरणविधिरष्टमः ॥

* * * *

चतुर्थे मासि मृतदिने कुर्यात्, भूरिकर्मण्युपस्थिते न कालनियमः । देशे वा प्रसिद्धममावा.

No. 3681. पितृमेधप्रयोगः.

PITṚMĒDHAPRAYŌGAḤ.

Pages, 57. Lines, 7 on a page.

Begins on fol. 60*a* of the MS. described under No. 2902.

Similar to the above.

Complete.

Beginning:

अथ गृहस्थस्य प्रेतस्य पितृत्वप्राप्त्यर्थं पितृमेधप्रयोगो वक्ष्यते—

तत्रोदगयने शुक्लपक्षे दिवामरणं प्रशस्तम् । यदि रात्रौ म्रियेत; तदा तत्प्रातराहुत्या दिवामरणं सम्पदा(म्पाद)नीयम् । कृष्णपक्षान्ते दर्श-पर्यन्तं सायं प्रातर्होमेन दर्शेष्ट्या च शुक्लपक्षे दिवसश्च संपादनीयः । दक्षिणायने तु माघमासस्य अमावास्यापर्यन्तं सर्वत्र दशाहोपरि होमद्रव्य-मिष्टिद्रव्यञ्च श्रोत्रियाय दत्वा, उत्तरायणशुक्लपक्षे दिवसानि(न्) संपादयेत् ।

* * * *

Colophon:

इति पितृमेधकाण्डे प्रेतसंस्कारः प्रथमः ॥

* * * *

नवमोऽध्यायः ॥

End:

उत्तरेणाग्निं समिधि समारोप्य, दक्षिणेनाग्निं मृतपत्नीं पैतृमेधिककर्म प्रतिपद्यत इत्याह भगवान् बोधायनः ॥

उ(दू)रे पिता (सा)ग्निचितेश्च माता मृता यदि स्यात्सुत औरसे च ।
सन्धाय वह्निं विदधीत सर्वमन्तेष्टिनात्मानमिति श्रुतेहि(र्हि) ॥

No. 3682. पितृमेधसारसङ्ग्रहः.

PITṚMĒDHASĀRASAṄGRAHAḤ.

Pages, 50. Lines, 21 on a page.

Begins on fol. 203*b* of the MS. described under No. 199.

Similar to the above.

Complete.

Beginning:

मृतस्याप्युत्तिद(क्तिर)स्त्येवमात्मन्यारोप्य चेन्मृतः ।
प्रेतस्य दक्षिणे पाणौ लौकिकाग्निं निधाय कः (च) ॥

प्रेताधानम् ।

पुत्रः कनिष्ठभ्राता च ज्येष्ठभ्राता पिता तथा ।
एतेषामप्यभावेन भर्ता भार्या परस्परम् ॥

* * * *

यदि साग्निकः पितुर(न्तिक)स्थः गृहे माता मृता, अथवा मातृ-समीपेऽग्निः स्थितः अस्यप्र(न्यत्र)पिता मृतः, तत औरसपुत्र(ा)समी-पने(गः)पिता(त)दागमनपर्यन्तं तयोरू(रौ)र्ध्वदेहिकं न कुर्यात् ।

End:

वृक्षारोहे मृगोत्पाते दिव्यभस्त्रानिपातके ।
नखैर्दन्तावि(न्तैर्वि)षजलं(लैः)स्तेषां श्राद्धञ्चतुर्दशी ॥

वपनन्तिलोदकं वर्जमेकभुक्तन्तु वर्जयेत् ।
विवाहादौ चतुर्थान्ते सूतदोषो न विद्यते ॥

Colophon:

इति भारद्वाजसूत्रे पितृमेधसारसङ्ग्रहे(हः) सम्पूर्णं(र्णः) ॥

No. 3683. पुंसवनम्.

PUṂSAVANAM.

Pages, 3. Lines, 6 on a page.

Begins on fol. 77*a* of the MS. described under No. 3237.

Gives details of a ceremony performed with a view to make a woman, who is pregnant for the first time, bring forth a male child.

Complete.

Beginning:

अथ पुंसुवनम्—

पूर्वेद्युः स्वस्तिवाचनं, नान्दीम् आभ्युदि(दयि)कं ग्रह(र)क्षापुरस्सरं (कृत्वा)स्नात्वा, दक्षिणे(न) पत्नीमुपविश्य, प्राणानायम्य, धर्मपत्न्याः प्रथमगर्भसंस्कारद्वारा सर्वगर्भसंस्कारार्थं पुंसुवनाख्यं (कर्म) करिष्यद(न्न)ग्निं प्रतिष्ठाप्य, नित्यौपासनं कृत्वा, अन्वाधानचरुषि(णा)आज्येन प्रजापति. . .

यवञ्च गोधूमं वा तयोर्मध्ये निक्षिप्य, किं पिबसि किं पिबसि इति पत्नीं त्रिः पृच्छेत् । सा पुंसुवनमिति प्रत्युक्त्वा, शेषं प्राश्य, हस्तं प्रक्षाल्य.

End:

स्विष्टकृता(दा)दि होमशेषं समाप्य समित्समारोपयेत् ॥

No. **3684.** पुंसवनम्.

PUMSAVANAM.

Pages, 2. Lines, 9 on a page.

Begins on fol. 9*a* of the MS. described under No. 3521.

Similar to the above.

Complete.

Beginning:

अथ पुंसवनमुच्यते—

पुंसवनं व्यक्ते गर्भे तिष्येण न्यग्रोधस्य या प्राच्युदीची वा शाखा ततः सद्यः पर्णाङ्कुरमाहृत्य, कृतप्राणायामः मम धर्मपत्न्याः प्रथमगर्भसंस्कारद्वारा सर्वगर्भसंस्कारार्थं पुंसवनाख्येन कर्मणा संस्करिष्ये—इति सङ्कल्प्य, अग्नेरुपसमाधानादिपात्रप्रयो(गान्ते) ।

End:

इति यजुषा अङ्गुष्ठेन दक्षिणे नासिकाच्छिद्रे रसं विनयति । सा तया गर्भाद्गिरति; पुमाꣳसं जनयति । ततो ब्राह्मणान् भोजयित्वाशिषो वाचयेत् ॥

Colophon:

इति पुंसवनम् ॥

No. **3685.** पुंसवनसीमन्तप्रयोगः.

PUMSAVANASĪMANTAPRAYŌGAḤ.

Pages, 7. Lines, 5 on a page.

Begins on fol. 85*a* of the MS. described under No. 430.

Similar to the above; but deals also with another associated ceremony commonly known as Sīmanta.

Complete.

Beginning:

एवंगुणविशेषणविशिष्टायामस्यां शुभतिथौ अस्माकं सहकुटुम्बानां क्षेमस्थैर्यायुरारोग्यैश्वर्याभिवृद्ध्यर्थं . . . महाजनैस्सह स्वस्तिवाचनं करिष्ये । आदौ निर्विघ्नपरिसमाप्त्यर्थं गणाधिपतिपूजां करिष्ये । पुण्याहवाचनं कृत्वा ।

* * * *

एवङ्गुणशुभतिथौ मम धर्मपत्न्याः क्षेत्रसंस्कारद्वारा सकलगर्भसंस्कारार्थं मम धर्मपत्नीं पुंसवनेन कर्मणा संस्करिष्य इति सङ्कल्प्य.

End:

यवान् विरूढानाबध्य वाचं यच्छत आ नक्षत्रेभ्यः । उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य, वत्समन्वारभ्य, व्याहृतीश्च जपित्वा, वाचं विसृजेत् ॥

No. 3686. पुण्ड्रधारणमन्त्रक्रमः.

PUṆḌRADHĀRAṆAMANTRAKRAMAḤ.

Substance, palm-leaf. Size, 17⅞ × 1⅜ inches. Pages, 8. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 41*a*. The other works herein are.—Prayōgacandrikā 1*a*, Sōmōtpatti 12*a*, Prāyaścittaprayōga 15*a*, Strīdharmanirūpaṇa 19*a*, Lakṣmīmantra 26*a*, Vapanavidhāna 26*b*, Vāzitirunāmam (வாழித்திருநாமம்) 29*a*, Gōpikāgītā 36*a*, Guruparamparā 39*a*.

Gives in proper order the various Mantras to be recited by Śrī-Vaiṣṇavas when putting on the sacred mark on the face.

Beginning:

कुण्डलीकृतशेषस्थहरिपादाकृतिं न्यसेत् ।
अन्यथा रौरवं घोरं याति नास्त्यत्र संशयः ॥
हरिपादाकृतिं पुण्ड्रं ललाटादिषु धारयेत् ।
स्त्रीणान्तथैव कर्तव्यमन्यथा नरकं व्रजेत् ॥

* * * *

पञ्चेतराणां पुण्ड्राणां विस्तारं व्यङ्गुळं भवेत् ।
व्यवस्थानञ्च पुण्ड्राणामायतञ्चतुरङ्गुलम् ॥
चतुश्चक्रन्नमस्यामि केशवं कनकप्रभम् ।
नारायणं घनश्यामं चतुश्शङ्खं नमाम्यहम् ॥

* * * *

श्रियै नमः, अमृतोद्भवायै नमः, कमलायै नमः, लोकसुन्दरी(र्यै)नमः.

* * * *

ओं नमो नारायणाय नमः, श्रीमन्नारायणाय नमः, श्रीमते नारायणाय नमः.

सर्वधर्मान्परित्यज्ये(ज्य)मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

End:

कवाटे(ट) भुजपाषाणे आ(ष्वा)द्रेवस्त्रञ्च(न्न) निक्षिपेत् ।
निक्षिपेद्यदि मूढात्मा रौरवं नरकं व्रजेत् ॥
रौरवेऽपुण्यनिलये पद्मार्बुदनिवासिनाम् ।
अर्थिनामुदकन्दत्तमक्षय्यमुपतिष्ठतु ॥

No. 3687. पुत्रपरिग्रहप्रयोगः.

PUTRAPARIGRAHAPRAYŌGAḤ.

Pages, 2. Lines, 8 on a page.

Begins on fol. 20*a* of the MS. described under No. 1791.

Deals with the ceremony of adopting a son.

Complete.

Beginning:

अथातः पुत्रपरिग्रहविधिं व्याख्यास्यामः—

पितृकुलान्मातृकुलाद्वा मातृपितृव(म)न्तं पुत्रं प्रतिगृह्णीयात्; न त्वेकं पुत्रं दद्यात्, प्रतिगृह्णीयाद्वा । न तु स्त्री पुत्रं दद्यात्, प्रतिगृह्णीयादन्यत्रानुज्ञाया भर्तुः । पुत्रं प्रतिग्रहीष्यन्नुपकल्पयते द्वे वाससी, द्वे कुण्डले, अङ्गुलीयकं चाचार्यं च वेदपारगं, कुशमयं बर्हिः, पर्णमयमिध्ममिति । बन्धूनाहूय, राज्ञे निवेद्य, वर्ष(र्षासु)दिवागारमध्ये ब्राह्मणानन्नेन परितोष्य.

End:

तस्मिन् काले स्वस्तिसूक्तं पठेत् । कुमारं कुण्डलद्वयम् । अनन्तरं स्वगृह्योक्तविधानेन मुखान्तं कृत्वा, जयादिप्रभृति सिद्धमा धेनुवरप्रदानात् ॥

Colophon:

(इति)पुत्रस्वीकारविधिः ॥

No. **3688.** पुत्रसङ्ग्रहः.

PUTRASAṄGRAHAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 7*a* of the MS. described under No. 3533.

On how to adopt a son.

Beginning :

शौनकोऽहं प्रवक्ष्यामि पुत्रसङ्ग्रह मु(उ)च्यते ।
शुचिर्भूत्वा ततो(दो)त्थाय स्ना[नि]तो निय(त)मानसः ॥
बन्धूंश्चैव तु संभोज्य ब्राह्मणान्वेदपारगान् ।

वरस्ततस्समीपं गत्वा दम्पत्योर्वस्त्रभूषणादिभिस्सम्पूज्य, सत्सन्ताना-भिवृद्ध्यर्थं पुत्रं देहीति याचयेत् । दाता दास्यामीत्युक्त्वा पुत्रदानङ्क-रिष्य इति सङ्कल्प्य ।

*   *   *   *

दाता हरिद्राजलं प्रतिग्रहीतारौ दम्पत्यौ(ती) प्राशयित्वा आशी-र्वादं कुर्यात् । तदादौ विष्वक्सेनं संपूज्यानन्तरं क्रियारम्भः । इति पुरुषपुराणे एवमिति शौनकः । व्यासश्च प्रयोगान्तरं सिद्धान्तपुराणे उक्तमि(वानि)त्याह ॥

Colophon :

पुत्रस्वीकारविधिः ॥

व्यासश्च सिद्धान्तपुराणे एवमित्याह—नमस्सदसे . . . .

*   *   *   *

तदर्थमभ्युदयं पुण्याहञ्च कृत्वा, गोत्रस्य शर्मणः मम गोत्रात् पुत्रं मह्यं वृणीध्वमिति(ब्रुव)ते गोत्राय शर्मणे यजमानाय गोत्रस्य शर्मणः गोत्रं शर्माणं कुमारं दातुस्समीपं गत्वा पुत्रं मे देहीति याचयेत् ।

*   *   *   *

औपासनाग्निश्चेदात्मसमारोपणं लौकिकाग्निश्चेदात्मसमारोपणवर्जमभ्यु-दयपुण्याहञ्च कुर्यादाशीर्वाद(ञ्च)कुर्यात् ॥

Colophon :

पुत्रस्वीकारस्समाप्तः ॥

सन्तानसिद्ध्यर्थं पुत्रपौत्राभिवृद्ध्यर्थं वंशाभिवृद्ध्यर्थं . . .

*   *   *   *

राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहा राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्त इति पुन-स्तिसृभिः ऋग्भिः . . . . । . . . .

End :

परिषदनुज्ञां कृत्वा, नमस्कृत्य, व्यासस्सिद्धान्तपुराणे एवमित्याह । शौनकः पुरुषपुराणे एवमित्याह ॥

No. **3689.** पुत्रस्वीकारप्रयोगः.

PUTRASVĪKĀRAPRAYŌGAḤ.

Pages, 5. Lines, 7 on a page.

Begins on fol. 59*a* of the MS. described under No. 3302.

Similar to the above.

Complete.

Beginning :

. . . . . दास्यामि ब्रह्मसारूप्यकाङ्क्ष्या ।

अस्मै ब्राह्मणाय विष्णुस्वरूपाय विष्णुप्रीत्यर्थममुकगोत्रममुकनाम-धेयममुं कुमारममुकगोत्रनामधेयोऽहं ब्रह्मसारूप्यं कामयमानस्तुभ्यमहं संप्रददे न ममेति कुमारं हरिद्राक्षतोदकहिरण्यपूर्वकं ब्राह्मणस्य करे दद्यात्.

End :

ब्राह्मणान् भोजयेत् । एतदसगोत्रदत्तविषयम् । सगोत्रदत्तश्चेम(त्) साक्षतदानमात्रेणैवालम् । असावेव अस्य ऐहिकामुष्मिककर्म(सु) और-सपुत्राद्विशिष्यते ॥

Colophon :

इति विष्णुधर्मोत्तरोक्तदत्तहोमविधिस्समाप्तः ॥

No. 3690. पुनर्विवाहादिप्रयोगः.

PUNARVIVĀHĀDIPRAYŌGAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 3533.

Details regarding the re-marriage of a man.

Incomplete.

Beginning:

पित्र्ये

स्वसूत्रोक्तं विजानीयादन्यथा त्वकृतं भवेत् ।
शुभवारे शुभे लग्ने पुनर्वैवाहिकश्चरेत् ॥
आहूय श्रोत्रियान्विप्रानभ्यर्च्य प्रणमेत्ततः ।

*　　*　　*　　*

शठमर्षणगोत्रस्य प्रवरः—आङ्गिरसपौरुकुत्स्यत्रासदस्य(व)त्र्यार्षेयप्रवरान्वित ।

भारद्वाजगोत्रस्य प्रवरः—आङ्गिरसबार्हस्पत्यभारद्वाजत्र्यार्षेयप्रवरान्वित ।

आत्रेयगोत्रस्य प्रवरः—आत्रेयार्चनानसश्यावाश्वत्र्यार्षेयप्रवरान्वित ।

End:

ध्रुवन्ते राजा वरुणो ध्रुवन्देवो बृहस्पतिः ।
ध्रुवन्त इन्द्रश्चाग्निश्च राष्ट्रन्धारयतान्ध्रुवम् ॥
दर्वीप्रणीतीलाजानां दृषदग्नेः प्रदक्षिणम् ।
एतान्यभ्यन्तरं कुर्यात् ब्रह्माप्येको बहिर्भवेत् ॥

No. 3691. पुनस्सन्धानप्रयोगः.

PUNASSANDHĀNAPRAYŌGAḤ.

Substance, palm-leaf. Size, 7½ × 1½ inches. Pages, 23. Lines, 5 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are, Māsiśrāddha 13*a*, Śivarātripūjā 55*a*, Tripurasundarīmantra 56*a*.

Gives details regarding how the daily worship of the sacred fire may be re-started.

Beginning:

विच्छिन्नाग्निसन्धानविधानम्—

दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य, देशकालौ सङ्कीर्त्य, मम पत्न्या सह विच्छिन्नौपासनाग्निसन्धानं करिष्य इति सङ्कल्प्य, तिस्रस्तिस्रो रेखाः लिखित्वाद्भिरवोक्ष्य, अग्निमुपसमिध्यात् ।

End:

सूर्याय स्वाहा—सूर्यायेदम् । अदितेऽन्वमꣳस्थाः इति उत्तरपरिषेचनम् ।

अग्नये स्विष्टकृते स्वाहा—अग्नये स्विष्टकृत इदम् । अग्नि(ग्ने)रु(प)स्थानम् ॥

No. 3692. पुनस्सन्धानम्.

PUNASSANDHĀNAM.

Pages, 19. Lines, 6 on a page.

Begins on fol. 57*a* of the MS. described under No. 3237.

Similar to the above.

Complete.

Beginning:

विच्छिन्नस्यौपासनाग्नेः पुनस्सन्धानहोमस्य(माख्यं)कर्म करिष्य(न्)
तदङ्गस्थण्डिलोल्लेखनाद्यग्निप्रतिष्ठापनं करिष्ये ।

उल्लिखेदुदगायामां तस्मादुभ(य)था[ता]परे ।
पूर्वांथ ते उदक्संस्थे द(अ)संपृष्टे च पूर्वथा ॥

*　　*　　*　　*

दु(जु)ष्टो दमूना अतिथिर्दुरोणे । इमं नो यज्ञमुपयाहि विद्वान् ।
विश्वा अग्नेऽभियुजो वि(ह) त्य । शत्रयतामाभरा भोजनानि ।

भूर्भुवस्सुवरोम् । अग्निं प्रतिष्ठाप्य, औपासनविच्छिन्नदोषप्रायश्चित्तार्थं कृच्छ्रत्रयं करिष्ये ।

End:

शान्तिरस्तु (द्विः) इत्यादि । परिस्तरणं विसृज्य, अग्न्याद्यलङ्करणं कृत्वा यज्ञपु(रु)षाचार्यो(य) श्रीपरश(शु)रामाय नमः । ध्याना[म]वाहनादिषोडशोपचारपूजां समर्पयामि । यस्य स्मृत्या च श्रीपरशुरामः प्रीयताम् । बृहत्स(ा)म क्षत्रभृत् । प्रदक्षिणनमस्कारः ।

No. **3693**. **पुनस्संस्कारानुक्रमणिका.**

PUNASSAṀSKĀRĀNUKRAMAṆIKĀ.

Pages, 2. Lines, 10 on a page.

Begins on fol. 2*b* of the MS. described under No. 1014.

On the performance of the domestic religious ceremonies over again, as required under certain circumstances.

Complete.

Beginning:

सभासन्निधौ स्वपापं प्रकटीकृत्य, सभायामनुज्ञातः वपनपूर्वकं मृत्तिकास्नानं कृत्वा, सायंकाले सर्वप्रायश्चित्तं च कृत्वा, महानद्यां सहस्रस्नानादि कृत्वा, तद्दिने वु(उ)पोष्य, प्रभाते शौचाचमनादिकं कृत्वा, मनसा विष्णुं ध्यात्वा, देशकालौ सङ्कीर्त्य ।

End:

आहिताग्निश्चेत्सर्वप्रायश्चित्तादि पुनस्संस्कारान्तं कृत्वा, पत्न्या सह विवाहादिकं कृत्वा, पुनराधानं कु(र्यात्) । . . . . स्त्रीपुरुषयोर्जीवे मृतशब्दं श्रुत्वा, पुनस्संस्कारादिविवाहान्तं कृत्वा, पुनराधानं कुर्यात् । व्रात्येन पशुना यजेत । सोमसंस्थानि कुर्यात् । तेषां प्रायश्चित्तानां ब्राह्मणैस्स(ह) . . . . कृत्वा पूतो भवति ॥

Colophon:

पुनस्संस्कारानुक्रमणिका समाप्ता ॥

No. **3694**. **पूर्व(गृह्यसंग्रह)कारिकाश्लोकाः.**

PŪRVA(GṚHYASAṄGRAHA)KĀRIKĀŚLŌKĀḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 22*a* of the MS. described under No. 3511.

The Prayōga belongs to Drāhyāyaṇasūtra.

Deals with the conduct of such domestic religious ceremonies as have to be performed by one while alive.

Incomplete.

Beginning:

जाते पुरस्तात्तत्रं च नातिराज्याहुतिद्वयम् ।
तत्रान्त इयमेधाचान्ते पुण्याहवाचनम् ॥

जातकर्मसंग्रहः—

पुत्रं जातं पिता श्रुत्वा स्नात्वा स्वर्णादि शक्तितः ।
प्रदाय द्विजमुख्येभ्यः स्नापयित्वा च तं शिशुम् ॥

End:

होमान्ते पूर्ववच्छाखाशललीचरुसाधनम् ।
विकल्पः पश्चिमस्थानं स्थितिरत्रापि तत्र च ॥
अयमूर्जादिराकादिमन्त्रौ शाखाशलल्ययोः ।
किं पश्यसीति तत्प्रश्नमुत्तरं तत्र पूरणम् ॥

इति सीमन्तसंग्रहः ॥

No. **3695**. **पूर्वप्रयोगः (आपस्तम्बीयः).**

PŪRVAPRAYŌGAḤ (ĀPASTAMBĪYAḤ).

Pages, 29. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 85.

Similar to the above.

According to Āpastamba.

Incomplete.

Beginning:

जातं कुमारं जातकर्मणा संस्करिष्ये, जातं वात्सप्रेणाभिमृश्य, . .

जिघ्रामि एताभ्यां मूर्धन्यवघ्राणम् । अङ्गादङ्गात् . भिजिघ्रामि एताभ्यां दक्षिणे कर्णे जापो नक्षत्रनाम च निर्दिशति तद्रहस्यं भवति.

रोरेर(म)मृज्येति(चि)षु वृद्धिरादौ
छाप्ये(त्पे) च वान्त्यश्रवशाश्वयुक्षु ।
. ' शेषेषु नाक्तो(म्वो): कपरस्स्वरोऽन्त्यः
स्वापो(प्वो)रदीर्घस्सविसर्ग इष्टः ॥

End:

इमं नारायणशर्माणं माणवकमाग्नेयव्रतोत्सर्जनं चारयिष्ये, वरः (आ)चरिष्यामि । वप(नं) स्नानं कृत्वा, तर्पणम्---अग्निं काण्डऋषिं तर्पयामि.

No. 3696. पूर्वप्रयोगः.

PŪRVAPRAYŌGAḤ.

Substance, palm-leaf. Size, 17 × 1¼ inches. Pages, 42. Lines, 6 on a page. Character, Telugu. Condition, slightly injured. Appearance, old.

Begins on fol. 13*a*. The other works herein are:—Prayōga viṣaya 1*a*, Jaganmōhanādimantra 35*a*, Nāradaparivrājakōpaniṣaochēṣa 38*a*.

Similar in character to the above.

Incomplete.

Beginning:

श्रीमान् वेङ्कटनाथार्यः . . . . . सन्निधत्तां सदा हृदि ॥

ओं नमस्सदसे . सर्वेभ्यः श्रीवैष्णवेभ्यो नमः । अनुग्रहः—

जातकर्मनामकरणान्नप्राशनचौलोपनयनकर्मारम्भमुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु. . . .

* * * *

अस्यां शुभतिथौ श्रीवत्सगोत्रस्य नारायणशर्मणो वरस्य वधूलगोत्रायाः लक्ष्मीनामधेयायाः कन्यायाश्च उभयोरुद्वाहकर्माङ्गमङ्कुरार्पणकर्म करिष्ये.

End:

ताम्बूलचर्वणं कृत्वाशिषो वाचयित्वा, सन्ध्यावन्दनप्रातरौपासनानन्तरं यथाशक्ति दक्षिणां दत्वा, आत्मारोपणं कुर्यात् ॥

Colophon:

उद्वाहप्रयोगस्समाप्तः ॥

ओं नमस्सदसे । सर्वेभ्यश्श्रीवैष्णवेभ्यो नमः । पुंसुवनसीमन्तोन्नयनकर्मारम्भमुहूर्तस्सुमुहूर्तोऽस्त्विति भवन्तो महान्तोऽनुगृह्णन्तु ।

* * * *

फलद्वयेन संयुतं वटाङ्कुरौ दृषत्सुतौ
सुपावनाय वस्त्रकं क्षिपेत्सहैव पुंसीदि(सुवि) ।
अन्वारब्धायामुत्तराहुतीर्हुत्वा.

No. 3697. पूर्वप्रयोगः.

PŪRVAPRAYŌGAḤ.

Substance, palm-leaf. Size, 16⅝ × 1¼ inches. Pages, 30. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Taittirīyāraṇyaka 21*a*.

Similar to the above.

Beginning:

नमस्सदसे . नमः ।

अशेषे हे परिषत् . स्वीकृत्य ।

गोत्रस्य शर्मणः वरस्य मम गोत्रायाः नामधेयायाः कन्यायाश्च आवयोरुद्वाहकर्म कर्तुं योग्यतासिद्धिमनुगृहाण, तथास्तु ; योग्यतासिद्धिरस्त्विति प्रत्युक्ते.

* * * *

श्रीभगवदाज्ञया भगवत्प्रीत्यर्थं गोत्रस्य शर्मणः वरस्य मम गोत्राया नामधेयायाः कन्यायाश्च आवयोरुद्वाहकर्माङ्गं प्रतिसरबन्धकर्म करिष्ये ।

End:

अग्नये चैव सोमाय शन्नो देवी त्रियम्बकम् ।
इरावती इदं विष्णुर्मा न स्तोके प्रजापते ॥
सावित्र्या व्याहृतीभिश्च महाव्याहृतयस्तथा ।
होताभिश्चैव होतव्यं हुतशेषन्तु पुण्यदम् ॥

No. **3698.** पूर्वप्रयोगः.

PŪRVAPRAYŌGAḤ.

Pages, 79. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 2818.

This is the Prayōga of Kātyāyanasūtra.

Similar to the above.

Incomplete.

Beginning:

अथातो गृह्यस्थालीपाकानां स्वकर्म . परिसमूह्योपलिप्योल्लिख्योद्धृत्याभ्युक्ष्याग्निमुपसमाधाय, दक्षिणतो ब्रह्मासनमास्तीर्य, प्रणीय, परिस्तीर्यार्थवदासाद्य, पवित्रे कृत्वा, प्रोक्षणीस्संस्कृत्य . अर्थवत् प्रोक्ष्य निरुप्याज्यमधिश्रित्य.

End:

उभा का(गा)वी युवानौ धर्मः पराव(प)तत् परिसंख्यानि धर्मिणो विसंख्या . . . महा इति त्रिरात्रं सहोष्य विप्रतिष्ठेरत्(न्) ॥

No. **3699.** पूर्वप्रयोगः.

PŪRVAPRAYŌGAḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 80*a* of the MS. described under No. 3237.

Similar to the above.

Beginning:

अथ पुंसुवनम्—

गर्भे व्यक्ते चतुर्थे मासि षष्ठेऽष्टमे वा मासि सीमन्तेन सह पुंसुवनं कुर्यात् । तथा चोक्तम्—

व्यक्ते गर्भे द्विजातीनां कुर्यात्पुंसुवनक्रियाम् ।
पुण्ये दिने शुभे लग्ने सीमन्तेन सहापि वा ॥
कृत्वा पुंसवनं कार्यं पश्चात्सीमन्तमाचरेत् ।

तस्माच्छुभे लग्ने दम्पति(ती) . मङ्गळस्नातो(तौ) . भूत्वा, भर्ता प्राणानायम्य, पुंसवनाख्यं कर्म करिष्य इति संकल्प्य, कङ्कणं धृत्वा ।

End:

अथ नामकरणउ(मु)च्यते—

एकादशे द्वादशे वा मङ्गळस्नानं कृत्वा, प्राणानायम्य, पुत्रस्य नामकर्म करिष्य इति संकल्प्य, मार्गशीर्षादि.

कृष्णोऽनन्तोऽच्युतश्चक्री वैकुण्ठोऽथ जनार्दनः ।

उपेन्द्रो यज्ञपुरुषो वासुदेवस्तथा हरिः ॥
योगीशः पुण्डरीकाक्षो मासनामान्यनुक्रमात् ।

No. 3700. पूर्वप्रयोगसारः.

PŪRVAPRAYŌGASĀRAḤ.

Pages, 30. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 147.

Similar to the above.

Incomplete.

Beginning:

गर्भाधानं पुंसुवनं सीमन्तो जातकर्म च ।
नामान्नप्राशने चौलं मौञ्जीव्रतचतुष्टयम् ॥
गोदानाख्यं स्नातकश्च विवाहः पैतृमेधिकः ।

* * * *

तथा कारिका—

संस्कारकस्तु सर्वत्र तिष्ठेदुत्त(रत)स्सदा ।
संस्कार्यः पुरो(रुषो)वापि स्त्री वा दक्षिणतस्सदा ॥
इयं व्यवस्था निर्णीता कपर्दिप्रमुखैरिह ।
स्मार्तकर्मसु सर्वत्र तस्मादेवं हि कारयेत् ॥

तस्मादेवं कृत्वा विष्णुर्योनिङ्कल्पयत्वित्यादिमन्त्रैः पत्नीमभिमन्त्रयेत् ।

End:

इत्युक्त्वा स्वप्रवरमुक्त्वाग्निं नमस्कुर्यात् । ततो गुरुं मातरमन्यांश्च वृद्धान्नमस्कृत्य भिक्षां याचयेत् । कथम्? भवान् भिक्षां ददातु, इति पुरुषम्, भवति भिक्षां देहि इति स्त्रियम् । तत आचार्यः ब्रह्मचार्यसीति ब्रूयात्, कुमारः अस्मीति वदेत् । आचार्यः अपोऽशान, कुमारः अश्नामि; आचार्यः कर्म कुरु, कुमारः करोमि; आचार्यः मा सुषुप्थाः(स्वपः) कुमारः दिवा न स्वपामि; भिक्षाचर्यं चर, कुमारः चरामि; आचार्यः आचार्याधीनो भव, कुमा(रः भवामि) ॥

No. 3701. पूर्वापरप्रयोगः.

PŪRVĀPARAPRAYŌGAḤ.

Substance, palm-leaf. Size, 14 × 1¼ inches. Pages, 102. Lines, 5 on a page. Character, Telugu and Grantha. Condition, injured. Appearance, old.

Sāmavēdaprayōga.

Details regarding the conduct of domestic religious rites—such as are carried out before as well as after a man dies.

Incomplete.

Beginning:

उपनयनम्—

वसन्ते अग्निं प्रतिष्ठाप्य, कौपीनाच्छन्नं कृतशौचं कुमारं दक्षिणत उपवेश्य, इमं कुमारमुपनेष्य इति संकल्प्य, ब्राह्मणान् भोजयित्वा, यज्ञोपवीतमिति मन्त्रेण यज्ञोपवीतं निधायाचम्य, कुमारं भोजयेदुष्णेन वायविति यजुषा अप उष्णाश्शीतास्वानीय.

End:

आचार्यस्य समीपनयनमुपनयनम् ।

अथोपरिष्टात्तन्त्रं समाप्य, ब्रह्मणे यथाशक्ति (दक्षिणां) दत्वा, माणवकं पादे पादे वा सामसावित्रीमध्याप्य,

* * * *

यथासम्भवं परिषद्दक्षिणां स्वीकृत्य, मम(कुमारम्) एनमनुगृह्णन्तु भवन्तः.

Beginning of अपरप्रयोगः

पतिपत्न्योः कपालाग्निः तुषाग्निर्बालकन्ययोः ।

विधवाविधुरादीनामग्निमु(रु)त्तपनं(नः) स्मृतम्(ः) ॥

पतिपत्न्योस्सङ्कल्पः – अमुकगोत्रस्य अमुकशर्मणः प्रेतस्य कपालाग्निना संस्कर्तुं कपालाग्निसन्धानं करिष्ये ।

End of अपरप्रयोगः

आद्यमासिकैकोद्दिष्टश्राद्धे वृताय ब्राह्मणाय . . . . . आस्यशुद्ध्यर्थमिदं ताम्बूलम्; अभ्यञ्जनार्थमिदं तै(लाभ्यञ्जनम्) ।

* * * *

No. 3702. पैतृमेधिकविधिः.

PAITṚMĒDHIKAVIDHIḤ.

Pages, 50. Lines, 6 on a page.

Begins on fol. 17*a* of the MS. described under No. 3491.

On the ceremonies to be conducted when a man dies.

Incomplete.

Beginning:

अथ पैतृमेधिककर्मोच्यते—

यस्य कस्यचित्पुरुषस्य मरणसंशयेऽद्भिः स्नात्वा, शक्तिश्चेद्यथोक्तसर्वप्रायश्चित्तं कृत्वा, गोमयेनोपलिप्तकुशास्तृतभूमौ दक्षिणतश्शिरसं निधाय, प्राणानायम्य, सङ्कल्प्य, एवंगुणविशेषणविशिष्टायां पुण्यतिथौ पितुः गोत्रस्य शर्मणः सुखेन प्राणोत्क्रमणसिद्ध्यर्थमुत्क्रान्तिसंज्ञिकगोदानं करिष्य इति सङ्कल्प्य.

* * * *

यथाशक्ति दक्षिणां गृहीत्वा,

समस्तसम्पत्समवाप्तिहेतवः समुत्थितापत्कुलधूमकेतवः ।

अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।

जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

इति त्रिः प्रदक्षिणं कृत्वा, पितुः गोत्रस्य शर्मणः प्रेतस्यौर्ध्वदेहिकक्रियाकर्म कर्तुमधिकारसम्पदस्त्विति भवन्तो ब्रुवन्तु ।

End:

पूर्वोक्तेन प्रकारेण तद्रूपं संस्कारं(कुर्वी)त ; (य)दा पाला(श)विध्युपायो नास्ति, तदा नष्टेष्वस्थिषु सर्वेषु पिण्डेषु नश्यति शोधकः.

पालाशविधिना कार्यं पाथेयं न च कर्मसु ।

पालाशे त्वस्थिदाहे च सद्यस्सञ्चयनं भवेत् ॥

इति विशेषः । ततः प्रकृतम् ॥

Colophon:

इति पालाशविधिः ॥

No. 3703. प्रतिष्ठाकालविधिः.

PRATIṢṬHĀKĀLAVIDHIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 52*a* of the MS. described under No. 3533.

On the time suited for the sanctification of the image of a deity for worshipping in temples.

Beginning:

आवाहिनि - स्थापिनि - सन्निधायिनि - सन्निरोधिनि - संमोहीकरणि अवकुण्ठन - पाश - अङ्कुश - सुरभि - लिङ्ग - धेनु - योनिमुद्रां प्रदर्शयित्वा ।

अथ ते चोत्तमं प्रोक्तमुत्तरायणमत्र तु ।

जङ्गमस्थापने चैव दक्षिणायनमेव च ॥

प्रायश्चित्तनिमित्तादीन् सर्वकालं प्रकल्पयेत् ।

चैत्रमासे जयः प्रोक्तो वैशाखे सस्यवर्धनी(नम्) ।
ज्येष्ठे जननवृद्धिस्स्यादाषाढे रोगनाशनम् ॥

* * * *

स्थिरलग्ने स्थिरं बिम्बं स्थापयेत्तु प्रयत्नतः ।
चरलग्ने चरं बिम्बं स्थापयेत्कौतुकादिकम् ॥

End:

सम्पत्तौ सर्वभोगानां प्रतिष्ठोत्सवमाचरेत् ॥
प्रतिष्ठादिवसात्पूर्वं पञ्चमे सप्तमेऽह्नि वा ।
स्वसूत्रोक्तविधानेन कारयेदङ्कुरार्पणम् ॥

Colophon:

इति प्रतिष्ठाकालविधिः ॥

No. **3704.** प्रतिष्ठाक्रमः.

PRATIṢṬHĀKRAMAḤ.

Pages, 8. Lines, 6 on a page.

Begins on fol. 54*a* of the MS. described under No. 3533.

On the process of sanctifying the image of a deity for the purpose of worshipping in a temple.

Incomplete.

Beginning:

प्रतिष्ठादिवसात्पूर्वं पञ्चमे सप्तमेऽह्नि वा ।
स्वसूत्रोक्तविधानेन कारयेदङ्कुरार्पणम् ॥
प्रक्षाल्य पञ्चगव्येन प्रणवेनाभिमृश्य च ।
अश्वक्रान्तेति तद्बिम्बं मृद्भिरद्भिर्विमृश्य च ॥
नमस्तेऽर्चे सुरेशानि प्रकृती(ते) विश्वक(कर्म)णः ।
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः ॥

प्रतिष्ठां सङ्कल्प्य . . .

बद्ध्वा प्रतिसरं हस्ते देवदेवस्य दक्षिणे ।
स्पृशेत्कौतुकवद्भूयः पुण्डरीकाक्षविद्यया ॥

* * * *

धान्ये संस्थापयेत्कुम्भं कलशानान्तु पश्चिमे ॥
एवं संस्थाप्य कलशान् ऋत्विग्भिस्सह देशिकैः ।
तीर्थदेशं समासाद्य देवदेवं प्रबोधयेत् ॥

End:

कलशे कलशे दद्याच्छुद्धाम्भश्चार्घ्यदारि च ।
हरिद्राचूर्णकलशं स्व(र्ण)चूर्णविमृ(मि)श्रितम् ॥
तुलसीदलसंयुक्तं मूलमन्त्रेण सेचयेत् ।
अभिषिञ्चेत्ततो देवं नाळिकेरोदकेन च ॥

No. **3705.** प्रतिष्ठातिलकः.

PRATIṢṬHĀTILAKAḤ.

Substance, palm-leaf (Śrītāla). Size, 9⅞ × 1⅞ inches. Pages, 96. Lines, 9 on a page. Character, Kanarese. Condition, fair. Appearance, old.

The first 28 leaves are wanting.

Deals with the Pūrvaprayōga or marital and other propitious domestic rites of the followers of Jina.

Contains Parvas 2 to 4, complete; and 5th incomplete.

Beginning:

. . . . ।
. . . . . . गन्धपुष्पाक्षतान् क्षिपेत् ॥

युग्मकन्याधनुर्मीनवृषमेषेषु राशिषु ।
पिता तिलशरावादीन् विन्यसेत्पुरतः शिशोः ॥
जनन्यङ्कनिविष्टस्य पुत्रस्य पुरतः स्थिते ।
पात्रे तु(तू)दङ्मुखः सिञ्चेच्छीतोष्णे युगपज्जले ॥

* * * *

इति चौलम् ॥

अथ पञ्चमवर्षेऽर्हादुपाध्यायाच्छिशोर्भृशम् ।
अक्षराणां तु योऽभ्यासः सोऽक्षराभ्यास उच्यते ॥
विद्याभ्यासोचितर्क्षे तं[ता]न्स्नातं पुत्र(त्रं)विभूषयेत् ।
उपलेपादि होमान्तं सर्वं कुर्यात्तदग्रतः ॥

* * * *

Colophon:

इति श्रीजिनसंहितासारोद्धारे प्रतिष्ठातिलकनाम्नि त्रैवर्णिकाचारसङ्ग्रहे आचारसूत्रस्थानीयं नाम द्वितीयः(यं) पर्व[:] ॥

* * * *

एवं बहिश्शुद्धिमुपेत्य धीमानन्तर्विशुद्धिं च समेत्य भव्यः ।
भक्त्या परब्रह्म निषेवमाणो लोकद्वयं वै सफलीकरोति ॥

Colophon:

इति श्रीजिनसंहितासारो[ग्रहो]द्धारे प्रतिष्ठातिलकनाम्नि त्रैवर्णिकाचारसङ्ग्रहे सन्ध्योपासनप्रयोगस्थानीयं नाम चतुर्थ[:]पर्व[:] ॥

End:

तदनन्तरं होमदानादिकं कुर्यात् । ततः प्रागुक्तप्रान्त(त)रुत्थानादिसदाचारविधेयं चतुर्थदिने पूर्ववत् स्नानपुण्याहजिनार्चनहोमं विदा-(धा)य, शोभया वसतिं गत्वा, त्रिः परीत्य, जिनान् गुरून् समभ्यर्च्य, वन्दित्वा च अश्वत्थभूरुहं गत्वा, तत्र यथाविधि होमं कृत्वा, स्वगृहे विद्दच्छिष्ट.

No. 3706. प्रत्याब्दिकश्राद्धप्रयोगः.

PRATYĀBDIKAŚRĀDDHAPRAYŌGAḤ.

Pages, 27. Lines, 6 on a page.

Begins on fol. 8*b* of the MS. described under No. 3511.

On how to conduct the annual Śrāddha ceremony.

Complete.

Beginning:

अथ प्रत्याब्दिकश्राद्धप्रयोग उच्यते—

तिलतण्डुलं गृहीत्वा, प्राचीनावीती भूत्वा, समस्तसंपदिति वदन् प्रदक्षिणं कृत्वा, तिलतण्डुलैर्ब्राह्मणानभ्यर्च्य, नमस्कारं कृत्वा, अञ्जलिबन्धं कृत्वा, स्वामिनः अस्मिन् दिवसे अस्मत्पितरमुद्दिश्य, प्रत्याब्दिकश्राद्धं कर्तुमिच्छामि ; देशकालपात्रद्रव्यादयह(ः)

End:

प्रविश्य गृहं गत्वा, वामदेव्यं गीत्वा, शान्तिं जपेत् । कूर्चपवित्रग्रन्थिं विस्रस्याचमनं कृत्वा, शेषस्य ग्रासं वरार्थं प्राश्नीयात् । पूतो भवति ॥

No. 3707. प्रत्याब्दिकश्राद्धप्रयोगः.

PRATYĀBDIKAŚRĀDDHAPRAYŌGAḤ.

Pages, 25. Lines, 7 on a page.

Begins on fol. 180*a* of the MS. described under No. 2938.

Similar to the above.

Complete.

This is taken from Prakriyākalpamañjarī.

Beginning:

अहितविहितदक्षैर्बाहुभिर्व्यूहभेदैर्निगमनिजमतैश्च व्यक्तभूमा चतुर्भिः ।
प्रथमयुगसमग्रं धर्ममभ्यस्यमानान् प्रशमितकलुषो वः पातु वैकुण्ठनाथः ॥

आपस्तम्बसूत्रनिष्ठानां परमैकान्तिनां तत्सूत्रभाष्यवृत्तिस्मृतिचन्द्रिकादिबहुनिबन्धनानि परिशील्य श्रीसारशास्त्राद्यनुगृहीतभगवच्छास्त्राद्यनुगृहीतभगवच्छास्त्रादिविहितविशेषधर्मपरिष्कृतः प्रत्याब्दिकश्राद्धप्रयोगो दर्शयिष्यते । कर्ता श्राद्धदिनात्पूर्वं त्रिंशत्पञ्चदशदिनानि क्षौरं तावद्दिनानि त्रिदिनं वा परान्नं च वर्जयित्वा, तत्पूर्वेद्युः कृतप्रातस्स्नानादिनित्यकर्मा स्वयं स्वीयैर्वा स्नातैः श्राद्धपाकहोमभोजनार्थं यथायोगं स्थानानि परिकल्प्य, गोमयेनोपलिप्य, वस्त्रादिकं संशोष्य, प्रातरौपासनं कृत्वा, द्विराचम्य, गुरुपरम्पराप्रपदनपूर्वकं स्वाराध्यं भगवन्तं प्रणम्य.

End :

परिवारतर्पणादि प्रतिदिनवत् कृत्वा, यथाशक्ति ब्राह्मणान्भोजयेत्—इति परेऽहनि कृत्यम् ॥

ससूत्रभगवच्छास्त्रधर्मचर्या श्रियःपतेः ।
ससूत्रकल्पकुसुममालेवातिमनोहरा ॥

Colophon :

इति सत्क्रियाकल्पमञ्जर्यां प्रत्याब्दिकश्राद्धप्रयोगः ॥

No. **3708.** प्रथममासिकादिविधानम्.

PRATHAMAMĀSIKĀDIVIDHĀNAM.

Pages, 8. Lines, 8 on a page.

Begins on fol. 69*a* of the MS. described under No. 3680.

On the conduct of the first monthly ceremony after one dies.

Incomplete.

Beginning :

अथ यदि आद्य(मा)सि(कै)कोद्दिष्टश्राद्धे भोक्ता न विद्यते ; तदन्नं पुरुषभोज(न)पर्याप्तं सर्वमण्टकादिविशेषसहितं पत्रं गृहीत्वा, प्रभूतमाज्यं

गृहीत्वा, ग्रामान्निष्क्रम्य, शुचौ देशे लौकिकाग्निं प्रतिष्ठाप्योपसमाधाय, प्राणानायम्य, आद्यमासि . . . . . एकाहहोमङ्करिष्ये ।

End :

दश दानानि यो दद्यात्स्वर्णदक्षिणया सह ।
तदर्धेन तदर्धाद्वा विष्णुलोकं स गच्छति ॥

अत्र स्वर्णशब्दस्य हिरण्यवाचित्वाद्यथाशक्त्यनुष्ठानं वा कार्यम् ।

No. **3709.** प्रथमोपाकर्मशान्तिहोमः.

PRATHAMŌPĀKARMAŚĀNTIHŌMAḤ.

Substance, palm-leaf. Size, 19¼ × 1½ inches. Pages, 10. Lines, 4 on a page. Character, Telugu. Condition, injured. Appearance, old.

Begins on fol. 51*a*. The other works herein are :—

Bōdhāyanapūrvaprayōga 1*a*, Taittirīyabrāhmaṇam 40*a*, Prāyaścittahōma 45*a*, Śāntikhaṇḍprayōga 56*a*, Maṅgalāṣṭaka 60*a*, Mahāsṅkalpa 61*a*.

On a fire-offering to be conducted on the occasion when a boy first begins to learn the Vēdas in the prescribed manner.

Complete.

Beginning :

आचारनवनीते—

शान्तिं कृत्वा तयोर्वापि शुक्रदेवेन्द्रमन्त्रिणोः ।
होमैर्दानी(नै)र्जपैर्वापि तयोरुदितमन्त्रकैः ॥
कर्तव्यं श्रावणं विप्रैरिति जीवेन भाषितम् ।
शान्तिमन्त्राश्च गुरुशुक्रयोर्ग्रहयज्ञमन्त्रैर्होमः ।

* * * *

आप्यायस्वेति, सोमो धेनुमिति, स्री(श्री)धरपद्धतावभिहितं कृत्वा प्रथमोपाकर्म कुर्यात् ।

End :

आचम्य, तिलान् जुहोमीति पञ्चविंशतिमन्त्रैस्सकृद्धोमं जुहुयात्, समित्सन्नहनं जयादि ब्रह्मविसर्जनान्तं कृत्वा, एवमेवोत्सर्जनम् ॥

No. **3710.** प्रपन्नब्रह्ममेधविधिः.

PRAPANNABRAHMAMĒDHAVIDHIḤ.

Pages, 12. Lines, 6 on a page.

Begins on fol. 14*a* of the MS. described under No. 3661.

On the conduct of the funeral ceremonies of a Prapanna, that is, of one who has surrendered himself wholly to God.

Complete.

Beginning :

अथातो ह(हा)रीतोक्तप्रपन्नब्रह्ममेधप्रयोगो लिख्यते—

प्रपन्नमातापित्रादिर्मृतश्चेत्पुत्रादिः कर्ता चतुर्भिर्भागवतैस्सह नदीं तटाकं वा गत्वा, स्नात्वा, धृतशुष्कवस्त्रोत्तरीयः श्रीचूर्णसहितद्वादशोर्ध्व-पुण्ड्रान्धृत्वा, सपवित्रपाणिस्समाचम्य, तथाविधैश्चतुर्भिः श्रीवै(ष्णवै)स्सह नाळिकेराम्रपल्लवाद्यैरलङ्कृतैश्चतुर्भिः कुम्भैर्जलमानीय, उपनिषद्घोषैस्सह गृहं गत्वा, गोमयालिप्ते गृहे च(तु)रश्ररङ्गवल्ल्याद्यलङ्कृते कचिद्देशे विन-(न्य)स्य.

End :

ओम् । अदितेऽन्वमꣳस्थाः । ओं नमो नारायणाय . प्रासावीः ओं नमो नारायणाय इत्यग्निं परिषिच्य, ब्रह्मोद्वासनं कृत्वा, पुंसूक्तेन वा विष्णुसूक्तेन वा मूलमन्त्रेण वा अग्निमुपस्थाय, सात्त्विकत्यागं कृत्वा भगवति समर्पयेत् ॥

ब्रह्ममेधमिति प्रोक्तं मुनिभिर्ब्रह्मतत्परैः ।
महाभागवतानां तु कर्त(व्य)मिदमुत्तमम् ॥

केशवार्पितसर्वाङ्गं शरीरं मङ्गळाह्वयम् ।
न वृथा दाहयेद्विद्वान् ब्रह्ममेधविधिं विना ॥
इत्याह भगवान् हारितः ॥

No. **3711.** प्रयोगकारिका.

PRAYŌGAKĀRIKĀ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 55*a* of the MS. described under No. 430.

On the conduct of domestic religious ceremonies.

In verse.

Incomplete.

Beginning :

जातके नामके चैव अन्नप्राशनचौळके ।
उपनयनादिसर्वत्र पत्नी दक्षिणतो दिशि ॥
यावद्ब्रह्मोपदेशस्तु तावद्दक्षिणतो वधूः ।
औपनायनिके शेषे कर्मण्युत्तरतो वधूः ॥

End :

प्रेताहुति(ते)स्तु तच्छेषं भोक्तृपात्रे न निक्षिपेत् ॥
यदि कुर्वीत मूढात्मा रौरवं नरकं व्रजेत् ।
आज्यभागौ(गे) च सर्वत्र स्रुचा होमः कपर्दिना ॥
प्रायश्चित्तेषु होमेषु चतुष्पात्रं तथैव च ।
सम्भारश्चक्षुषि(षी) चैव इध्मतन्त्रं विनाकृतम् ॥

No. **3712.** प्रयोगकारिका.

PRAYŌGAKĀRIKĀ.

Pages, 6. Lines, 5 on a page.

Begins on fol. 43*a* of the MS. described under No. 430.

Similar to the above.

Incomplete.

Beginning:

प्रातर्द्वादश नाड्यस्तु सायं तु नव नाडिकाः ।
होमकालस्तु विज्ञेयो वसिष्ठो वाक्यमब्रवीत् ॥
ऊर्ध्वाङ्गुष्ठेन हस्तेन कुर्यादन्नं प्रदक्षिणम् ।
आरभ्य दक्षिणे भागे नो चेद्भागो महान् भवेत् ॥
परिषेचनमारभ्य प्रादक्षिण्यक्रमेण तु ।
अप्रदक्षिणचित्रान्नममेध्यं मनुरब्रवीत् ॥

End:

अग्नये च तथेन्द्राय सोमाया(य)स्विष्टकृत्पुनः ।
हावयेदिध्मतन्त्रेण विभ्रज्येष्टिं जयादिकम् ॥

No. **3713.** प्रयोगचन्द्रिका.

PRAYŌGACANDRIKĀ.

Pages, 70. Lines, 6 on a page.

Begins on fol. 6*a* of the MS. described under No. 1211.

Similar in subject-matter to the above.

Complete.

Beginning:

श्रीनिवासगुरुं नत्वा सीतारामञ्च सानुजम् ।
प्रयोगचन्द्रिकां तेषां करोमि कृपयाऽधुना ॥

श्रियः पतिं श्रीभूमिनीळासमेतं सम्यक् प्रणम्य, गर्भाधानपुंसवनसीमन्तजातकर्मनामकरणान्नप्राशनचौळोपनयनव्रतसमावर्तनोद्वाहगृहप्रवेशानां तत्रतत्रोपयोगिनामन्येषामुदकशान्त्यादीनाञ्च प्रयोगं(गो) वक्ष्यते ।

* * * *

पुंसवनसीमन्ताकरणे स्त्रियां प्रसूतायां पूर्वोक्तप्रायश्चित्तं कृत्वा, पत्न्या अङ्के शिशुं निधाय, पुंसवनं सीमन्तञ्च कुर्यात् ।

* * * *

प्रवासादागतः पिता अङ्गादिङ्गाभ्यां पुत्रमभिमन्त्र्य, ताभ्यामेव मूर्ध्न्यवघ्रायाग्निरायुष्मानिति पञ्च मन्त्रान् दक्षिणे कर्णे जपेत् ।

End:

अत्र प्रतिपादितेष्वर्थेषु प्रमाणभूतानि सम्मातिवचनानि जिज्ञासुभिः बोधायनापस्तम्बतात्पर्यदर्शनस्मृतिरत्नाकरदशनिर्णयसुधीविलोचनकण्ठभूषण-जैमिनिसूत्रपञ्चाग्निकारिकावामनकारिकाजयन्तकारिकाकपर्दिकारिकासुन्दरराजीय(यादौ) तत्र तत्र क्वचित्क्वचित् दृष्या(द्रष्ट) व्या [पि]नि । तानि विस्तरभयान्मया (न) लिखितानि । अनेन प्रीणातु भगवान् सीतारामस्सीतारामः ॥

Colophon:

इति प्रयोगचन्द्रिकायामष्टादशः खण्डः ॥

श्रियःपतिमथोदकशान्तितथाङ्कुरार्पणं शुचौ देशे अथाभ्युदयश्राद्धं यत्राग्निप्रतिष्ठापना

* * * *

वरस्य कन्या वा गृहप्रारम्भमाणोष्टादश । श्रियःपतिं शुचौ देशे अथ-जयैरथोपनयनं स्नातकर्म दर्शपूर्णमासस्थालीपाकौ षट् ॥

स्तोभास्ते नभसि श्रेयः कन्याप्येषु मयाधुना ।
प्रयोगचन्द्रिकाऽकारि सचतारस(सीतारामस्य)तुष्टये ॥ इति ।

प्रयोगचन्द्रिकामापस्तम्बगृह्यानुसारिणीम् ।
वीक्ष्य न्यूनातिरिक्तानि क्षन्तुमर्हथ सज्जनाः ॥

No. 3714. प्रयोगचन्द्रिका.

PRAYŌGACANDRIKĀ.

Pages, 22. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 3686.

Only fifth Khaṇḍa complete.

Same work as the above.

No. 3715. प्रयोगचन्द्रिका.

PRAYŌGACANDRIKĀ.

Substance, palm-leaf. Size, $17\frac{1}{4} \times 1\frac{5}{8}$ inches. Pages, 52. Lines, 5 on a page. Character, Grantha. Condition, injured. Appearance, old.

Begins on fol. 1*a*. The other work herein is, Sṛṅgārabhūṣaṇa-27*a*. 1 to 11 Khaṇḍas complete, 12th incomplete.

Same work as the above.

No. 3716. प्रयोगचन्द्रिका.

PRAYŌGACANDRIKĀ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{5}{8}$ inches. Pages, 40. Lines, 9 on a page. Character, Grantha. Condition, injured. Appearance, old

Begins on fol. 1*a*. The other works herein are, Prayōgadarpaṇa 21*a*, Bhagavadārādhanakrama 67*a*, Brahmakūrcavidhi 72*a*.

Khaṇḍas 1 to 16 complete. 17th incomplete.

Same work as the above.

No. 3717. प्रयोगचन्द्रिका.

PRAYŌGACANDRIKĀ.

Substance, palm-leaf. Size, $11\frac{5}{8} \times 1$ inches. Pages, 103. Lines, 6 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Wants beginning and end.

Same work as the above.

No. 3718. प्रयोगचन्द्रिका.

PRAYŌGACANDRIKĀ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 1 of the MS. described under No. 3533.

Complete.

Same work as the above.

No. 3719. प्रयोगदर्पणम्.

PRAYŌGADARPAṆAM.

Pages, 93. Lines, 7 on a page.

Begins on fol. 21*a* of the MS. described under No. 3716.

Deals with certain funeral rites.

Complete.

Khaṇḍas 1 to17.

Beginning:

श्रीधराद्यस्सदाचार्यपर्यन्तान् प्रण(थ)मान् गुरून् ।
प्रयोगदर्पणं कुर्ये(र्वे) दृश्यते येन सस्फुटम् ॥

श्रीवैकुण्ठं गमिष्यन्तं मुमूर्षुं पित्रादिं पि(पु)त्रादिश्शन्नो देवीरापो वा इदं द्रुपदादिवापो हि ष्ठा मयो भुव ऋतञ्चेत्येतैर्मन्त्रैस्सुस्नाप्य, . . .

पुत्राणां बहुत्वे शीलवृत्तादिगुणवान् कुर्यात्; सर्वेषां गुणसाम्ये पितुः प्रियः कुर्यात्; सर्वेषां पितुः प्रियत्वे ज्येष्ठः कुर्यात्; सर्वेषां पितुरप्रियत्वे अन्यः कुर्यात् ।

End:

तीर्थश्राद्धे हिरण्यश्राद्धे च श्राद्धात्परं महालयेऽपरेद्युः एवं ब्रह्ममेधादीनां प्रयोगो यथामति सीतारामप्रेरणया कृतस्तस्मादितं(दं) प्रयोगदर्पणं सम्यग्वीक्ष्यात्रानुक्तदुरुक्तादीन् धर्मशास्त्रप्रवणास्सन्तश्शोधयन्तु । अनेन भगवान् प्रीयतां सीतारामस्सीता(रा)मः ।

* * * *

इति प्रयोगदर्पणे सप्तदशः खण्डः ।

* * * *

सीतारामसुदे ताभ्यां प्रेरितेन मयाधुना ।
प्रयोगदर्पणाभिख्यो लिखितस्स्मृतिसङ्ग्रहः ॥

Colophon:

प्रयोगदर्पणं सम्पूर्णम् ॥

No. **3720.** प्रयोगपद्धतिः.

PRAYŌGAPADDHATIḤ.

Substance, paper. Size, 13 × 8 inches. Pages, 175. Lines, 21 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 80*a*. The other works herein are, Vāmanakārikā 1*a*, Kaṇvaśākhāpadalakṣaṇam 168*a*.

Deals with domestic religious rites.

1st Kāṇḍa complete and 2nd Kāṇḍa incomplete.

Beginning:

इष्टापूर्तेः क्रियासिद्धिहेतुं यज्ञभुजां मुखम् ।
अग्निं त्रयीवचस्सारं वन्देऽहं परदैवतम् ॥

पारस्कारकृतिं गृह्यसूत्रव्याख्यानपूर्विकाम् ।
प्रयोगपद्धतिं कुर्वे वासुदेवादिसम्मताम् ॥

अथातो गृह्यस्थालीपाकानां कर्म—

अथ श्रौतकर्मविधानानन्तरं यतः श्रौतानि कर्माणि विहितानि, स्मार्तानि विधेयानि ।

* * * *

यदि दीर्घायु(ष्टृ)त्वन्तदा तु कषाया मांसं, यदि ब्रह्मवर्चसन्तदा आद्यामांसं, यदि सर्वकामः तदा सर्वमांसानि क्रमेण प्राशयेत् । एकीकृत्वा(त्य) वा अस्य कर्मणः समृद्ध्यर्थं ब्राह्मणमेकं भोजयिष्य इति सङ्कल्प्य, ब्राह्मणं भोजयेत् ॥

इत्यन्नप्राशनं समाप्तम् ॥

Colophon:

इत्यग्निहोत्रिहरिहरविरचितायां पारस्क(र)गृह्यसूत्रव्याख्यानपूर्विकायां प्रयोगपद्धतौ प्रथमकाण्डं समाप्तम् ॥.

अथ चूडाकरणकेशान्ते तन्त्रेण सूत्रयति । सांवत्सरिकस्य चूडाकरणं तृतीये वाप्रतिहते । संवत्सरमब्दमतिक्रान्तं यस्य स सांवत्सरिकः । तस्य कुमारस्य चूडाकरणं चूडाकर्म कुर्यात् तृतीये वा संवत्सरे

End:

अत्र छन्दसामुत्सर्गोपदेशादङ्गाध्ययनमनुज्ञायते । अथेमामृचं जपेत्— उभा कवि(गावी)युवा इति । आचार्येण सह शिष्याः उभा क(गा)वी युवाना यो नो धर्मः परापतत् । परिसंख्यस्य धर्मिणो विसंख्यानि विसृजामहा इति एतामृचं जपति । त्रिरात्रं सहोष्य विप्रतिषे(ष्ठे)रन्, एकत्र उषित्वा विप्रतिषे(ष्ठे)रन् । विप्रवासं कुर्युः विशेषेण प्रवासं कुर्युरिति सूत्रार्थः ॥

No. **3721.** प्रयोगपारिजातः.

PRAYŌGAPĀRIJĀTAḤ.

Substance, palm-leaf. Size, 18⅜ × 1½ inches. Pages, 322. Lines, 8 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Complete.

A work by Nṛsiṁha treating of the 16 kinds of domestic rituals, with index.

Beginning:

त्रयीयुवतिमस्तकस्फुरदुदारमुक्तामणिं
त्रिलोकपरिरक्षणक्रमधुरीणरक्षामणिम् ।
प्रपन्नजनमानसप्रियवितीर्णचिन्तामणिं
नृसिंहमहमाश्रये निखिलदेवचूडामणिम् ॥

अथेदानीमुद्देशक्रमप्राप्तचूडाकरणविधिरभिधीयते—

द्वितीये वा तृतीये वा कर्तव्यं श्रुतिचोदनात् ।

कारिका—

तृतीये वत्सरे चौलं कुर्वीतास्योत्तरायणे ।
शुक्लपक्षे शुभर्क्षे तु कृत्वाभ्युदयिकं तथा ॥

* * * *

एकस्मिन्नुक्तकालेऽपि सिंहस्थे गुरौ चौळकर्म (न) कार्यमित्याह गर्गः—

न गुरौ सिंहराशिस्थे सिंहांशकगतेऽपि वा ।
क्षौरमन्नं न कुर्वीत विवाहं गृहकर्म वा ॥

तदेतन्नर्मदोत्तरविषयमित्याहुः । उक्तञ्च ग्रन्थान्तरे—

नर्मदोत्तरदेशे तु सिंहस्थे देवमन्त्रिणि ।
शुभकर्म न कुर्वीत निषेधो नास्ति दक्षिणे । इति ॥

End:

अथ प्रयोगः—

वरो वध्वा सह पञ्चमदिवसे अभ्यज्य, स्नात्वा, देशकालौ संकीर्त्य, आवयोरायुरारोग्यादिसर्वकामावाप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं स्तम्भबल्युत्साख्यं कर्म करिष्य इति संकल्प्य. . . .

इन्द्रादिलोकपालांश्च प्रस्तरादि चतुर्थ्यन्तनमोक(ङ्क)नाममन्त्रैस्सम्प्रार्थ्य, ब्राह्मणैर्बन्धुभिस्सह तज्जलमभिषिच्य, सर्वं स्तम्भबलिं ब्राह्मणेभ्यो दत्वा, यथाशक्ति दक्षिणां दत्वा बन्धुभिस्सह भुञ्जीत ॥

Colophon:

इति श्रीनृसिंहीये प्रयोगपारिजाते षोडशकर्मकाण्डे स्तम्भबलिप्रकरणम् ॥

इत्थं षोडशकर्मकाण्ड इह संस्कारा निषेका(दि)काः
पुंसोऽष्टादश वर्णितास्तदुचिता ज्योतिर्विदामुक्तयः ।
सर्वेऽत्रान्वयिवह्निसाध्यविधयो नान्दीमुखाद्या अपि
श्रीमन् दिव्यनृकेसरिन् तव पदाम्भोजस्मृतेः प्राभवात् ॥

इति श्रीनृसिंही(ये) प्रयोगपारिजाते षोडशकर्मकाण्डस्समाप्तः ॥

अथेदानीं पाकयज्ञकाण्ड आरभ्यते ॥

No. 3722. प्रयोगपारिजातः.

PRAYŌGAPĀRIJĀTAḤ.

Substance, palm-leaf. Size, $15\frac{5}{8} \times 1\frac{5}{8}$ inches. Pages, 706. Lines, 6 on a page. Character, Nandināgarī. Condition, fair. Appearance, old.

To the end of Anupanītaprakaraṇa.

Same work as the above.

Begins on fol. 1*a*. The other works herein are, Brahmayajñavidhi 354*a*, Paścimaraṅgamāhātmya 357.

Beginning:

पद्दल(फलद)मुदधिता(जा)तपस्तरूणां परिमलमागममौलिमांगमांनांम् ।
अमृतरसमुपासकामर(।)णामतिजगदाकृतिमाश्रये नृसिंहम् ॥

ओङ्कारकिङ्किणीनादमधुरश्रुतिबृंहितम् ।
चित्ते शृङ्खलितं भक्त्या चिन्तयेच्चिन्मयं गजम् ॥

कलये हृदि कल्याणीं कलां कामपि वाङ्मयीम् ।
कविताकलशाम्भोधिकल्लोलोल्ल(।)सकौमुदीम् ॥
यदेकवशवर्तिनी विपरिवर्तलोकत्रयी
यदाप्तवचसां फलं विधितदर्थवादात्मनाम् ।
यतश्च परमाप्यते सुखमयं पचं(दं) तत्परै-
रिदं विजयतेतरां किमपि वस्तु कर्माभिधम् ॥
भगवन्तमुपैमि शौनकं मुनिमाचार्यमथाश्वलायनम् ।
बहिरन्तरपास्य यौ तमो जयतः पुष्पवतोरिय(व)श्रियम् ॥
विद्यन्ते विविधा ग्रन्थाः श्रौतस्मार्तार्थबोधकाः ।
सूत्रतद्वृत्तिभाष्यं च तद्व्याख्याकारिकादयः ॥
तदर्थतत्त्वनिष्कर्षप्रयासालसचेतसाम् ।
बह्वृचानां किगा(क्रिया)तत्त्वसुखसंविदमिच्छताम् ॥
प्रमोदाय समोदाय सर्वमेकत्र सर्वतः ।
प्रयोगस्य प्रकारोऽयमिह सङ्गृह्य कथ्यते ॥

* * * *

अहो निबन्धनस्यास्य सौभाग्यं किमु वर्ण्यते ।
यतः श्रीनरसिंहोऽयमस्य कारयिता स्वयम् ॥
फलमत्र परत्रापि पश्यतां प्रतिपादयन् ।
प्रयोगपारिजातोऽयं प्रथते पृथिवीतले ॥
अमूलमनपेक्ष्यं वा न च किञ्चिदिहोच्यते ।
यावदाकाङ्क्षितं यावदुपयुक्तं विलिख्यते ॥

तत्र तावच्छ्रौतस्मार्तकर्मणोः प्रति(पि)पादयिषितयोः श्रौतस्य प्रत्यक्षश्रुतिमूलत्वेनाभ्यर्हितत्वात्प्रथमभावित्वेऽपि तदनुष्ठानस्य स्मार्तगर्भाधानादिसंस्कारानुष्ठानानन्तरभावित्वात् प्रथमतः स्मार्तं कर्म निरूप्यते । तस्य कर्मणो धर्मशास्त्रप्रमाणकत्वात्तत्कर्तारोऽभिधीयन्ते—

"मनुर्बृहस्पतिर्दक्षो गौतमोऽथ यमोऽङ्गिराः ।

* * * *

पारस्करश्चश्यशृङ्गो बैजावापस्तथैव च ॥
ए(ये) त्वन्ये स्मृतिकर्तार एकविंशतिरीरिताः ।
एतैर्यानि प्रणीतानि धर्मशास्त्राणि वै पुरा ॥" इति ॥

एतदना(दरे)दोषमाह—

तान्येतानि प्रवीणैस्तु न हन्तव्यानि हेतुभिः ।
यस्तानि हेतुभिर्हन्यात्सोऽन्धे तमसि मज्जति ॥

End:

गौतमोऽपि—

यथोपपादमूत्रपुरीषो भवति । . . . .

न कल्पो विद्यते तस्योदङ्मुखो दिवा च रात्रौ दक्षिणामुख इति नियमा इति ॥

अस्पृश्यस्पर्शे आपस्तम्ब आह—

अन्नप्राशन(।)व्ययता भवन्तीत्ययसं

No. **3723.** प्रयोगविषयः.

PRAYŌGAVIṢAYAḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3696.

On accessories to funeral rites.

Incomplete.

Beginning:

ततः पत्नी स्नात्वाचम्य, दर्भेष्वासीनो(ना)दर्भान् धारयमाणः(णा)देश-कालौ संकीर्त्य, प्रेतमन्वारभ्य सङ्कल्पः—

भर्तुः गोत्रस्य शर्मणः प्रेतस्य पैतृमेधिककर्मार्थं विच्छिन्नाग्नीन् प्रेताधानविधिना सन्धास्य इति सङ्कल्प्य, पत्न्या (अ)भावे पुत्रादिरेव प्राणानायम्य.

* * * *

अग्निसन्निधौ मृतस्य पात्रनयनं नियतम् । देशान्तरे मृते प्रेते कृ(त)दाहे च चयनदानयोर्विकल्पः । ततः प्रेते मात्या इत्यादि समानम् । अथ प्रयोगः पठ्यते ---

परिषेचनान्तं कृत्वा, ब्रह्मोद्वासनम् ।

End:

व्रतपते काण्डऋषिभ्यः । प्राजापत्यव्रतमचारिषम् । तदशकं तन्मे राधि । व्रतानां व्रतपते काण्डऋषिभ्यः । प्राजापत्यव्रतमचारिषम्.

No. **3724.** प्रयोगसारः.

PRAYŌGASĀRAḤ.

Pages, 24. Lines, 8 on a page.

Begins on fol. 54*a* of the MS. described under No. 3680.

On the conduct of funeral ceremonies.

Complete.

Adhyāyas 15.

Beginning:

अथैतस्य गृहस्थस्य मृतस्य त्वौर्ध्वदेहिकम् ।
पुत्रादिकस्सपिण्डैस्तु पितृमधं समाचरेत् ॥

पित्र्यास्तु तत्र धर्मास्स्युस्सर्वत्राचमनादृते ।
दक्षिणाशिरसं प्रेतं निदध्युस्तत्रतत्र तु ॥
कनिष्ठप्रथमास्सर्वे कुर्युश्च बहुकर्तृके ।
लोकानुरोधात्कुर्वीरन् सर्वे स्त्रीधर्ममादरात् ॥

इति प्रयोगसारे पितृमेधकाण्डे प्रेतनिर्हरणं नाम प्रथमोऽध्यायः ॥

End:

प्रसन्ना वा गुरुर्यस्य यो वा दद्यादलं धनम् ।
घोरेऽवसादे सञ्जाते तस्मै दद्यात्सुखोदयम् ॥

Colophon:

इति प्रयोगसारे पितृमेधकाण्डे प्रायश्चित्तविधिः पञ्चदशोऽध्यायः ॥

यतो बोधायनाचार्यप्रणीताद्ग्रन्थसागरात् ।
प्रयोगसारो रचितस्तस्मै वेदविदे नमः ॥

मुखशास्त्रप्रभाभिर्यो भुवनाम्भोजमण्डलम् ।
बोधयामास तं वन्दे बोधायनदिवाकरम् ॥

Colophon:

इति प्रयोगसारस्समाप्तः ॥

No. **3725.** प्रयोगसारपीयूषम्.

PRAYŌGASĀRAPĪYŪṢAM.

Pages, 106. Lines, 9 on a page.

Begins on fol. 1*a* of the MS. described under No. 3680.

On the conduct of domestic religious rites according to Bōdhāyana.

Complete.

Contains Saṁskārakāṇḍa, Paribhāṣākāṇḍa, Āhnikakāṇḍa and Prāyaścittakāṇḍa by Kumāraswāmi Viṣṇu.

Beginning:

बोधायनीयस्मार्ताब्धेः कुमारस्वामिविष्णुना ।
प्रयोगसारपीयूषं भूदेवेभ्यो धरिष्यते ॥

ऋतुसंवेशनादीनां पितृमेधान्त्यकर्मणाम् ।
क्रियाक्रमेण गृह्याणां प्रयोग उपदिश्यते ॥

* * * *

इति प्रयोगसारे(रपीयूषे) परिभाषाकाण्डे प्रकीर्णकः ॥

नान्दीमुखञ्च पूर्वेद्युः कर्तव्यं शुभकर्मसु ।
नामग्रहे न कर्तव्यं कुर्याच्चेद्दशमेऽहनि ॥

अशुचित्वान(न्न)पूर्वेद्युः सद्यो न प्रतिषेधतः ।
गर्भपुंसवसीमन्तमौञ्जीपाणिग्रहेषु च ॥

हविर्यज्ञेषु संस्थासु काम्ये प्रतिसरं(रो) भवेत् ।

* * * *

Colophon:

इति कुमारस्वामिविष्णुकृतबोधायनीयस्मार्तप्रयोगसारपीयूषे परिभाषाकाण्डः प्रथमः ॥

* * * *

इति कुमारस्वामि . . . . संस्कारकाण्डो द्वितीयः ॥

* * * *

इति बोधायनीयप्रयोगसारपीयूषे आह्निकं काण्डम् ॥

* * * *

गोवधादिक्रिया नित्याः कलौ त्यक्ता मनीषिभिः ।
नादृतास्तत्प्रयोगास्तदनुकल्पस्समीरितः ॥

बोधायनीयस्मार्ताब्धेः कुमारस्वामिविष्णुना ।
प्रयोगसारपीयूषं भूदेवेभ्यस्समुद्धृतम् ॥

Beginning of Tacchēṣa :

अथ नैमित्तिकं काम्यं समाहृत्य कचित्कचित् ।
बोधायनमतं वीक्ष्य कार्यन्तच्छेषमुच्यते ॥

End:

प्रियेषु स्वेषु कुशलमप्रियेषु च दुष्कृतम् ।
विसृज्य ध्यानयोगेन निस्पृहश्च सुषुम्नया ॥

अर्चिरादिभिराविश्य मार्गैस्तु रविमण्डलम् ।
तच्च भित्त्वा निराबाधः केवलामृतमश्नुते ॥

Colophon:

इति बोधायनीयस्मार्तप्रयोगसारपीयूषे तच्छेषकाण्डस्समाप्तः ॥

No. **3726.** प्रयोगादर्शः.

PRAYŌGĀDARŚAḤ.

Pages, 174. Lines, 18 on a page.

Begins on fol. 95*a* of the MS. described under No. 1904.

This is a commentary on the Kārikāmañjarī by Kanakasabhāpati, son of Vaidyanātha of Maudgala-Gōtra. The commentary is by the same author. This treatise is according to Bōdhāyana.

Deals with funeral ceremonies.

Incomplete.

Beginning:

सर्वान् देवान् प्रणम्याथ प्रणम्य निजदेशिकान् ।
बोधायनमृषिं नत्वा दृष्ट्वा सूत्रादिकं ततः ॥

अशुभानां प्रयोगन्तु प्रयोगाणां क्रमेण च ।
बालादिकानां स्पष्टाय प्रवक्ष्यामि विशेषतः ॥

इति बोधायनसूत्रम् ॥

तत्प्रयोगांश्च नानास्मृतिवचनानि तत्तत्कर्मयोग्यानि समेत्य, मौद्गलेन वैद्यनाथतनयेन कनकसभापतिकृतकारिकामञ्जरीक्रमेण पूर्वकारिकां समेत्य, तेनैव प्रयोगादर्शाख्यं व्याख्यानं वक्ष्यते ।

अथ यद्याहिताग्निर्नि(र्ज्यानि)मारं गच्छत्युपतापजरया ज्यानिर्मारं मरणसंशयं गच्छतीत्यर्थः । उपतपता ज्वरेणेत्यर्थः इति सूत्रोक्तम् ।

किञ्च अथातो द्विजातीनां दहनकल्पं व्याख्यास्यामः—जातस्य वै मनुष्यस्य ध्रुवं मरणमिति विजानीयात् ।

End:

अयं वा इत्यादि । ऋचां प्राचीमित्येतमनुवाकं जपेत् इतिहासादिकं च । अन्ते मधुत्रयं जपेत् । अथ तीर्थप्रसादहस्तः तृप्तास्स्थ इति वदेत्, तृप्ताः स्थः(स्मः).

No 3727. प्रायश्चित्तप्रयोगकारिका.

PRĀYAŚCITTAPRAYŌGAKĀRIKA.

Pages, 4. Lines, 8 on a page.

Begins on fol. 36*a* of the MS. described under No. 3546.

On expiatory ceremonies and how to conduct them.

Incomplete.

Beginning:

विस्रस्य मेखलादीनि ब्रह्मसूत्रं विना वटुः ।
सर्वं पलाशे निक्षिप्य नवान्यन्यानि धारयेत् ॥

औपासनाग्निं विधिवदुखायामेव धारयेत् ।
न भूमौ स्थापयेद्ब्राह्मं(द्ब्राह्मे) तत्र वै श्रुतिचोदनात् ॥

श्रौताग्निं स्थापयेद्भूमौ न तु स्मार्तं कदाचन ।
स्मार्ताग्निं स्थापयेद्भूमौ लौकिकस्स्यान्न संशयः ॥

End:

पक्षं मासिकभोक्तारं तदर्धञ्च पितुर्दिने ।
महाळये तु [च]भोक्तारं त्रिदिनं न निमन्त्रयेत् ॥

सुहृदन्नं गुरोरन्नं यदन्नं मातुलस्य च ।
स्वसृश्वशु(र)योरन्नं परान्नं न विदुर्बुधाः ॥

No. 3728. प्रायश्चित्तप्रयोगः.

PRĀYAŚCITTAPRAYŌGAḤ.

Pages, 34. Lines, 8 on a page.

Begins on fol. 33*a* of the MS. described under No. 3529.

Similar to the above.

Incomplete.

Beginning:

प्राणानायम्य, सङ्कल्प्य, विशेषणविशिष्टायां तिथौ प्रारिप्सितस्य कर्मणः सुमुखश्चैकदन्तश्च ध्यायामि, आवाहयामि, उद्वासयामि, सर्वेषु कालेषु.

* * * *

अस्माकं समस्तपापक्षयार्थं ज्ञानाज्ञानकृतदोषप्रायश्चित्तार्थम् अभक्ष्यभक्षणदोषपरिहारार्थं शरीरशुद्ध्यर्थं पञ्चगव्यप्राशननिमित्तं पञ्चगव्यहोमाख्यं कर्म करिष्ये.

End:

उत्तरे सोमरुद्राय; ईशान्यां नक्षत्राणि गृहेभ्यो नमः; मध्ये ब्रह्मणे सिद्ध्यै नमः; वृद्ध्यै श्रियै कीर्तये नमः; प्रदक्षिणं निष्क्रम्य, गृहाभिवेशनान्ते सुचाण्डाला श्वानौ द्वौ शान्ता पृथिवी ।

No. 3729. प्रायश्चित्तप्रयोगः.

PRĀYAŚCITTAPRAYŌGAḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 15*a* of the MS. described under No. 3686.

Similar to the above.

Beginning:

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु ।
न्यूनं सम्पूर्णतामेति सद्यो वन्दे तमच्युतम् ॥
इति विद्यातपोयोनिरयोनिर्विष्णुरीडितः ।
वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः ॥

श्रीजनार्दनः प्रीयताम् ।

* * * *

आचम्य, स्वामिनः भवत्पादमूले मया समर्पितां . स्वीकृत्य, आवयोरथवा मम जन्मप्रभृति एतत्क्षणपर्यन्तं मध्ये संभावितानां पापानामपनोदनार्थम् ।

End:

इति दशतर्पणं कृत्वा, आचम्य, देवऋषिन्त(र्षींस्त)र्पयेयुः ।
आचम्य.

पिप्पलादिक(ग)णं कण्वं कृतान्तं जीविके(ते)श्वरम् ।
मन्युश्च कालरात्रश्च विद्याश्चाहर्गणेश्वरम् ॥

No 3730. प्रायश्चित्तविधिः.

PRĀYAŚCITTAVIDHIḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 9. **Lines, 7 on a page.** Character, Telugu. Condition, good. **Appearance, new.**

Similar to the above.

Incomplete.

Beginning:

एवंगुणविशेषणविशिष्टायां पुण्यतिथौ गोत्रस्य नामधेयस्य मम जन्माभ्यासाज्जन्मप्रभृति एतत्क्षणपर्यन्तं मया कृतानां प्रकाशकृतमहापातकव्यतिरिक्तानां महापातकातिदिष्टरूपमहापातकव्रतातिदेशिकरूपाणामतिपातकानां महापातकसमरूपपातकानामुपपातकानां सङ्करीकरणानां मलिनीकरणानामपात्रीकरणानां जातिभ्रंशकराणां प्रकीर्णकानां महापातकानाम्.

End:

समस्तपापनिवृत्तिरस्तु । सुखेन प्राणोत्क्रमणसिद्ध्यर्थं श्रीविष्णुलोकप्राप्त्यर्थं गोदानं करिष्ये इति सङ्कल्पं(ल्प्य), श्रीमहाविष्णुस्वरूपाय ।

अत्युत्क्रान्तौ प्रवृत्तस्य सुखोत्क्रमणसिद्धये ।
तुभ्यं(तां)सम्प्र[द]दास्यामि धेनुमुत्क्रान्तिसंज्ञिकाम् ॥

श्रीमहाविष्णुप्रीतये न मम । तिलपात्रहिरण्यवासांसि दद्यात् । तदनन्तरं दशदानं कृत्वा, दक्षिणकर्णे श्रीमन्नारायणमन्त्रं [वदन्] जपित्वा.

No. 3731. प्रायश्चित्तविषयः.

PRĀYAŚCITTAVIṢAYAḤ.

Pages, 34. Lines, 8 on a page.

Begins on fol. 1*a* of the MS. described under No. 2833.

Incomplete.

Regarding expiatory ceremonies.

Beginning:

निष्पीड्य, वामप्रकोष्ठे निक्षिप्य द्विराचम्य शुचिर्भवेत् ।

इति । मनुः—

"वस्त्रं चतुर्गुणीकृत्य कूले निष्पीडनं तथा ।
वामप्रकोष्ठे निक्षिप्य द्विराचम्य शुचिर्भवेत् ॥"

इत्यघमर्षणं कृत्वा, प्रायश्चित्तार्थमागतां परिषदं गत्वा, नारायणं मनसि संस्मरन् कृतं पापं मनसि निधाय, पुण्ड्रादिकं धृत्वा, सपुत्रपत्नी परिवेष्टितः परिषदं गच्छेत् । प्रायश्चित्ती इतस्तु नित्यकर्मादिकं कृत्वा दोषबुद्धिं नाचरेत् ।

इत्यघमर्षणविधिः ॥

End:

अनर्थितैरनाहूतैरपृष्टैश्चैव संसदि ।
प्रायश्चित्तं न दातव्यं जानद्भिरपि सर्वदा ॥
यत्पुण्यमुद्धृते विप्रे म्रियमाणे जलादिषु ।
तत्पुण्यं तारितः पापात् प्रायश्चित्तैस्तु मानवैः ॥
प्रायश्चित्तविधानेन दुष्कृतान्मोचयेन्नरम् ।
इहामुत्र सुखं विन्देत् विद्वानायुर्यशो बलम् ॥ इति.

No. 3732. प्रायश्चित्तविधिः.

PRĀYAŚCITTAVIDHIḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 124 of the MS. described under No. 115.
On the conduct of expiatory ceremonies.
Incomplete.

Beginning:

एवं शान्तिं (प्र)कुर्वीत धर्मशास्त्रोक्तमार्गतः ।
भूमिशुद्धिं पुरा कृत्वा गोमयालेपनादिकैः ॥
विकीर्य सर्षपतिलान् पुण्याहं वाचयेदथ ।

* * * *

स्रुवेणाज्यमादाय, शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे । शतं यो श(नश्श)रदो अजीतानिन्द्रो नेषदति दुरितानि विश्वा स्वाहा इन्द्रायेदम् ।

End:

भर्तृवचनाकरणसदामलिनत्वसदानृत[त्व]भाषणसदानिष्ठुरभाषणउरस्ता-डनादीनां सर्वेषां पापानाम्.

No. 3733. प्रायश्चित्तसङ्ग्रहः.

PRĀYAŚCITTASAṄGRAHAḤ.

Substance, palm-leaf. Size, 17 × 1½ inches. Pages, 317. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, new.

On certain expiatory rites.

Incomplete.

The codex contains at the beginning an index consisting of 6 leaves.

Beginning:

श्रीवैकुण्ठं गमिष्यतो मुमूर्षून् पित्रादीन् पुत्रादिः शन्नो देवीरापो वा इदं, द्रुपदादिव, आपो हि ष्ठा मयो भुवः, ऋतञ्चेत्येतैस्संस्नाप्य, शुद्धवस्त्रोर्ध्वपुण्ड्रपद्माक्षतुलसीमाला धारयित्वा, महदवलोकनं कारयित्वा, तत्पादोदकं सालग्रामतीर्थञ्च प्राशयित्वा, शिरसि च प्रोक्ष्य, तुलसीं कर्णयोर्धारयित्वा, तत्पापानुगुणं द्वादशाब्दकृच्छ्रं षडब्दकृच्छ्रं त्र्यब्द-कृच्छ्रमब्दकृच्छ्रमिति क्रमेण षड्डुत्तरशतत्रयम्, अशीत्यधिकशतम्, नवतिस्त्रिंशदित्येतेषां प्रतिनिधिं प्रतिकृच्छ्रं गोदानम्; तन्मूल्यं विंशति-माषपरिमाणस्वर्णदानम् ।

End:

महाळये व(स)र्णश्राद्धे श्राद्धं कृत्वा तिलोदकम् ॥
कुर्यात्तीर्थोपरागादौ श्राद्धं कृत्वा तिलोदकम् ।

आदिशब्दात् देशविप्लवादिविहितामश्राद्धसङ्ग्रहः ।

द्रव्यब्राह्मणसम्पत्तौ प्रतिश्राद्धानुमासिके ।
संवत्सरविमोके च न कुर्यात्तिलतर्पणम् ॥

संवत्सरविमोकस्सपिण्डीकरणम् । (अ)त्रानुमासिकं षोडशश्राद्धानि । उक्तार्थसङ्ग्रहमाह—

स्वधा नमस्तर्पयामीत्येकैकं त्रिस्तिलोदकैः ।
पितॄन् मातामहान् स्वात्वा सस्त्रीकान् तर्पयेत्क्रमात् ॥ इति.

No. 3734. प्रायश्चित्तहोमः.

PRĀYAŚCITTAHŌMAḤ.

Pages, 16. Lines, 4 on a page.

Begins on fol. 45*a* of the MS. described under No. 3709.

On an expiatory fire-offering.

Incomplete.

Beginning:

विवाहाग्निं(ग्नौ)शान्तिमुपगते सति तद्दोषपरिहारार्थं पुनः विवाहाग्नि-(ग्न्यु)त्पत्तिङ्करिष्ये, एवङ्गुणविशेषण . . . . . .

अग्निर्होता । अश्विनाध्वर्यू । मित्र उपवक्ता । सोमस्सोमस्य पुरोगाः । शुक्रश्शुक्रस्य पुरोगाः । स्वा(श्रा)तास्त इन्द्रसोमाः । वातापेर्हवनश्रुतस्स्वाहा—अग्नये पञ्चहोत्र इदम् । ब्राह्मण एकहोता । स यज्ञः । स मे ददातु प्रजां पशून् पुष्टिं यशः । य(ज्ञ)श्च मे भूयात् स्वाहा—ब्राह्मण(णाय) एकहोत्र इदम् । अग्निर्द्विहोता । स बलान(भर्ता) । स मे ददातु प्रजां पशून् पुष्टिं यशः ।

End:

चन्द्रमसे नक्षत्रेभ्यो दिग्भ्यो महत इदम् । अदितेऽन्वमꣳस्थाः . . . वीः । होमान्ते श्रीयज्ञपुरुषं ध्यायामि—यस्य स्मृत्या । अनेन पाहित्रयोदशहोमेन . . तु । उक्तकालकर्म.

*   *   *   *

विश्वे देवा यजमानस्य(श्च)सीदत ।

No. 3735. प्रायश्चित्तानुक्रमणिका.

PRĀYAŚCITTĀNUKRAMAṆIKĀ.

Substance, palm-leaf. Size, $16\frac{1}{5} \times 1\frac{1}{3}$ inches. Pages, 54. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, new.

Complete.

A work giving an ordered account of certain expiatory rites and formulas; according to Vaidyanāthadīkṣita.

Beginning:

सर्वसारं समुद्धृत्य प्रायश्चित्तस्य कर्मणः ।
इतिकर्तव्यतामाह वैद्यनाथाख्यदीक्षितः ॥

अस्मिन् प्रयोगसारे तु प्रायश्चित्तस्य कर्मणः ।
इतिकर्तव्यतासारसङ्ग्रहोऽत्र प्रपञ्चितः ॥

प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।
तपोनिश्चयसंयुक्तं प्रायश्चित्तमिहोच्यते ॥

प्रायश्चित्ताख्यशब्दार्थमङ्गिरा मुनिरब्रवीत् ।
विहितस्याननुष्ठानात् निन्दितस्य च सेवनात् ॥

प्रायश्चित्तं यत्क्रियते तन्नैमित्तिकमुच्यते ।
इति नैमित्तिकत्वं हि गुरुः प्राहास्य कर्मणः ॥

विज्ञानेश्वरयोगी च तथैवाहास्य कर्मणः ।
अकुर्वन् विहितं कर्म निन्दितञ्च समाचरन् ॥

प्रसक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नरः ।
इति तस्याधिकारी तु मनुना समुदीरितः ॥

*   *   *   *

Colophon:

इति वैद्यनाथदीक्षितविरचिते प्रायश्चित्ते पुनरुपनयनपुनर्विवाहप्रयोगस्सम्पूर्णः ॥

End:

यथेष्टं गम्यतामित्युक्त्वा, पर्वताग्रं रविं सौमङ्गल्यस्त्रियः ब्राह्मणांश्च दृष्ट्वा, नदीं तटाकं वा गत्वा, आमलकस्नानं मृत्तिकास्नानञ्च कृत्वा, सालग्रामजलेन स्नात्वा, पुण्याहं वाचयित्वा, कलशोदकैः स्नात्वा गन्धमाल्यदक्षिणादिभिः ब्राह्मणान् पूजयेत् । ततो नारायणबलिक्रमात् ब्राह्मणान् भोजयेत् । आमेन हेम्ना वा नारायणबलिं कुर्यात् ॥

इति दुश्चरितविधवादिघटस्फोटनानुक्रमणिका.

अथ तत्प्रायश्चित्तानुक्रमणिका—

प्रथमं मन्त्रपूर्वकं क्षौरं कृत्वा, अनुवादसंवादौ कृत्वा, महासङ्कल्पं परिषत्पूर्वकं कृत्वा.

* * * *

दशदानं भूरिदानञ्च कृत्वा पञ्चगव्यं पिबेत् । तत उपवासः, पञ्चसंस्का(र)श्च । पूतो भवति ॥

इति जातिसाङ्कर्यप्रायश्चित्तानुक्रमणिका ॥

कूश्माण्डमन्त्राः--

ओं तत्सवितुर्वरेणीयम् . . धियो यो नः प्रचोदयात् ।

यद्देवा देवहेळनम् . . मामित[ः] ।

* * * *

सङ्गरो देवतासु . . त्वं हि वेत्थ यथातथम् ॥

इति कूश्माण्डमन्त्रः ॥

गणमन्त्राः—

तत्सवितुः . . . . प्रचोदयात् ॥

अग्ने नय . . . . विधेम ॥

वैश्वानरो यतते सूर्येण ॥

इति गणमन्त्राः ॥

क्षौरम्—

क्षुरप्र सर्वपापघ्न नमस्ते शि(शी)घ्रकृन्तक ।
केशाश्रितानि पा(पा)नि नाशयाशु ममानघ ॥

* * * *

ततो गङ्गास्नानं ततस्सेतुस्नानं वा कारयेत् ॥

कलशस्थापनक्रमः ॥

No. 3736. बीजदानसङ्कल्पः.

BĪJADĀNASAṄKALPAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 3533.

Regarding the ceremonial gift of seed paddy on the birth of a child.

Complete.

Beginning:

नमस्सदसे . पासताम् ।

स्वामिनः भवत्पादमूले . स्वी(कृ)त्य मम पुत्रजननमुहूर्ते . न्तु । विष्वक्सेनं सम्पूज्य, प्राणानायम्य, अस्यां शुभतिथौ मम पुत्रजननलग्नापेक्षया लग्नात् स्थाने ग्रहस्थित्या यो दोषस्समजनि तद्दोषपरिहारार्थं यत्किञ्चिद्धिरण्यदानङ्करिष्ये इति सङ्कल्प्य ।

End:

आदित्यादिनवग्रहप्रीत्यर्थं पुत्रपौत्राभिवृद्ध्यर्थं बीजदानङ्करिष्य इति सङ्कल्प्य, ब्राह्मणेभ्यो गन्धाक्षताशीर्वादङ्कृत्वा ॥

Colophon:

बीजदानम् ॥

No. 3737. बोधायनपूर्वप्रयोगः.

BŌDHĀYANAPŪRVAPRAYŌGAḤ.

Pages, 78. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 3709.

Deals with such domestic ceremonies as have to be conducted in relation to living persons from their birth onwards: according to Bōdhāyana.

Complete.

Beginning:

(एवङ्गुण)विशेषणविशिष्टायां शुभतिथौ मम धर्मपत्न्या सह विच्छिन्नौपासनाग्नेः पुनस्सन्धानाख्यं कर्म करिष्ये ; पुनस्सन्धानयोग्यतासिद्ध्य(र्थं)कृच्छ्रत्रयाण्याचरिष्ये । प्रथमगर्भसंस्कारार्थं मम धर्मपत्न्या रात्रौ गर्भाधानं करिष्ये । तदङ्गफलप्रदानं कुर्यात् । याः फलिनीर्या अफला(अ)पुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः । फलप्रदानमुहूर्तास्सुमुहूर्तास्स्वस्तिन(स्सन्त्वित्यनु)गृह्णन्तु । सुमुहूर्तमस्तु । कर्मणः पुण्याहं वाचयित्वा, विष्णुर्योनिं कल्पयतु । त्वष्टा रूपाणि पिंशतु ।

End:

अनया पूजया च भगवान् सर्वात्मकः ब्रह्मादिपञ्चपालिकादेवतास्सुप्रीतास्सुप्रसन्ना वरदा भवन्तु । आ सप्तरात्रात्प्रजाकाम आ पञ्चरात्रात्पशुकाम आ त्रिरात्रादन्नाद्यकाम(:) सद्यस्काल आयुष्यकाम इत्याह भगवान् बोधायनः ॥

दिशां पतीन्नमस्यामि सर्वकामफलप्रदान् ।
कुर्वन्तु (सफलं कर्म कुर्वन्तु) सततं शुभम् ॥

No. 3738. बोधायनपूर्वप्रयोगः.

BŌDHĀYANAPŪRVAPRAYŌGAḤ.

Substance, paper. Size, 11 × $8\frac{3}{4}$ inches. Pages, 103. Lines, 18 on a page. Character, Devanāgarī. Condition, good. Appearance, new.

Begins on fol. 1*a*. The other work herein is, Sarvasiddhāntasaṅgraha 104*a*.

Incomplete.

Similar to the above.

Beginning:

पूर्वेद्युर्नान्दीमुखप्रतिसरबन्धं कृत्वा, अपरेद्युः उभौ शुची स्नात्वा, प्राणानायम्य, रेवतीनक्षत्रजाताया अस्या मम भार्याया गर्भाधानपुंसवनसीमन्तोन्नयनकर्मणां तन्त्रहोमङ्करिष्ये । तदङ्गं पुण्याहं वाचयिष्ये । ब्रह्मादयः प्रीयन्तां प्रीयन्तां भगवन्तो ब्रह्मादयः । पुण्याहजलैः प्रोक्ष्य, अथ देवयजनोल्लेखनप्रभृत्याग्निमुखात्कृत्वा, मेक्षणेन चरुमालोड्य, पूर्वार्धादवदाय, अपरार्धादवद्यति ; अभिघारयति ; प्रत्यनक्ति ; पुरस्तात् स्रुवाहुतिञ्जुहोति ।

End:

आपूर्वविधिः—

आपूर्वे परिधिः ब्रह्मा वृणीतेध्मं विहाय च ।
न त्वाघाराज्यभागञ्च न जया च मुखाहुतिः ॥
आघारान् तन्त्रवच्चैव अभिघार्य चरुन्तथा ।
परिषिच्य च यन्मे द्वे हुत्वा च व्याहृति(ती)स्तथा ॥
हुत्वा पक्वं स्विष्टकृतमाहुतीर्जुहुयात्पुनः ।
अथ(त) ऊर्ध्वं समानीय एष आपूर्विको विधिः ।

No. 3739. ब्रह्मकूर्चप्रयोगः.

BRAHMAKŪRCAPRAYŌGAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 11*b* of the MS. described under No. 3517.

Concerning a particular expiatory ceremony.

Complete.

Beginning:

पञ्चगव्यप्राशनात्पूर्वेद्युर्नद्यादौ स्नात्वा, जितेन्द्रियश्शुद्धोपवासं कृत्वापरेद्युः पुण्यतीर्थे स्नात्वा, धृतोर्ध्वपुण्ड्रादिः पादौ प्रक्षाल्याचम्य, महा-

जनैरनुज्ञात आरभेत । पवित्रपाणिर्दर्भेष्वासीनो दर्भान् धारयमाणः त्रिः प्राणानायम्य, ... : . . . . . .
उत्तरेणाग्निं दर्भान् संस्तीर्य, तण्डुलकृते स्थण्डिले नवकृतपदरेखाः कृत्वा, तेषु पलाशकृतानि पात्राणि स्थापयित्वा, तत्क्रमश्श्लोकः—

नवकृतपदमध्ये दुग्धमैन्द्रे दधि स्यात्
यमदिशि घृतमिन्दोर्गोमयं गोजलाप्ये ।
अनलनिरृऋतिवाय्वीशकोणेषु पिष्टा-
मलकहरिद्राजलं स्थापयेत्पञ्चगव्ये ॥

End:

त्रिः प्राणानायम्य, निमित्तं सङ्कल्प्य, ध्यायन् नारायणं, देहं प्रणवेन समालोड्य, प्रणवेनोद्धृत्य, प्रणवेनाभिमन्त्रणपूर्वकं

यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके ।
प्राशनं पञ्चगव्यस्य दहत्वग्निरिवेन्धनम् ॥

इति मन्त्रेण स्वाहान्तेन पलाशपर्णेन वा ब्रह्मतीर्थेन वा पिबेत् । तत आसायमष्टोत्तरसहस्रं शतं वा निमित्ततारतम्येन गायत्रीं मूलमन्त्रञ्च जपेत् । सर्वपापैः प्रमुच्यते ॥

Colophon:

अयं सनत्कुमारसंहिताप्रकारब्रह्मकूर्चविधिः समाप्तः ॥

No. 3740. ब्रह्मकूर्चप्रयोगः.

BRAHMAKŪRCAPRAYŌGAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 3533.
Similar to the above.
Complete.

Beginning:

सुप्रक्षालितपाणिपादैरा(द आ)चान्तः नमस्सदसे . उपासताम् । प्रणम्य, अशेषे हे . स्वीकृत्य, मनोवाक्कायैर्मदनुष्ठिताकृत्यकरणकृत्याकरणजनित-

भगवदपचारभा(ग)वतापचारादिसंभावितदोषशान्त्यर्थं ब्रह्मकूर्चविधिना पञ्चगव्यसम्मेलनं कर्तुं योग्यतासिद्धिमनुगृहाण,

* * * *

प्रणवेन कूर्चेनालोड्य, उदीचोऽङ्गारान्निरूह्य, . अग्नौ प्रहरति । येन जुहोति . हरति, अदितेऽनुमन्यस्व . प्रसुव । ओम् अग्नये स्वाहा — अग्नय इदं न मम । सोमाय स्वाहा — सोमायेदं न मम.

End:

सावित्र्या व्याहृतीभिश्च महाव्याहृतय(तिभि)स्तथा ।
होताभिश्चैव होतव्यं हुतशेषन्तु पुण्यदम् ॥

Colophon:

ब्रह्मकूर्चविधिस्समाप्तः ॥

No. 3741. ब्रह्मकूर्चप्रयोगः.

BRAHMAKŪRCAPRAYŌGAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 67 and 93*a* of the MS. described under No. 3680.

Complete.

Same as the above.

No. 3742. ब्रह्मकूर्चप्रयोगः.

BRAHMAKŪRCAPRAYŌGAḤ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 72*a* of the MS. described under No. 3716.

Complete.

Said to have been written by Rāmaswāmi.

Same as the above.

No. **3743.** ब्रह्मकूर्चप्रयोगः.

BRAHMAKŪRCAPRAYŌGAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 9*a* of the MS. described under No. 3546.

Complete.

Same as the above.

No. **3744.** ब्रह्मकूर्चप्रयोगः.

BRAHMAKŪRCAPRAYŌGAḤ.

Pages, 7. Lines, 8 on a page.

Begins on fol. 93*a* of the MS. described under No. 2833.

Same subject as that of the above.

Complete.

Beginning :

सुप्रक्षालितपाणिपादः स्वाचान्तः ब्राह्मणाननुज्ञाप्य, दर्भेष्वासीनो दर्भान् धारयमाणः प्राणानायम्य, श्रीगोविन्देत्याद्यस्यां शुभतिथौ श्रीमन्नारायणप्रीत्यर्थं गोत्रस्य शर्मणः मनोवाक्कायानुष्ठिताकृत्यकरणकृत्याकरणादिसर्वेषां पापानां सद्यः अपनोदनार्थं कायशुद्ध्यर्थमात्मशुद्ध्यर्थं ब्रह्मकूर्चविधिना पञ्चगव्यसंमेलनं करिष्ये—इति सङ्कल्प्य, पुण्याहवाचनं कृत्वा, पञ्चगव्यद्रव्याणि प्रोक्ष्य.

End :

प्राणानायम्य, सर्वप्रायश्चित्तहोमं होष्यामीति सङ्कल्प्य, अनाज्ञातादिप्रायश्चित्तहोमं कृत्वा, प्राणानायम्य, परिषिच्य, मन्थनसमिधमग्नौ प्रहृत्य, अग्निमुपस्थाय, हुतशेषं सङ्कल्पपूर्वकं यत्त्वगस्थीति मन्त्रेण प्राश्याचामेत् ॥

No. **3745.** ब्रह्मचारिनारायणबलिः.

BRAHMACĀRINĀRĀYAṆABALIḤ.

Pages, 4. Lines, 6 on a page.

Begins on fol. 46*a* of the MS. described under No. 3533.

Deals with the ceremony of Nārāyaṇabali to be performed in a relation to a Brahmin who dies a bachelor.

Complete.

For Extracts vide No. 3655.

No. **3746.** ब्रह्मयज्ञप्रयोगः.

BRAHMAYAJÑAPRAYŌGAḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 38*b* of the MS. described under No. 430.

On the worship of the Vēda by continued daily recitation.

Beginning :

एवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ ब्रह्मयज्ञेन यक्ष्ये—

विद्युदसि विद्य मे पाप्मानमृतात्सत्यमुपैमि । हस्ताववनिज्य, द्विराचामेत्, त्रिः परिमृज्य, सकृदुपस्पृश्य,

End :

सुवः – पितॄन् स्वधा नमस्तर्पयामि तर्पयामि तर्पयामि; भूर्भुवस्सुवः –पितॄन् स्वधा नमस्तर्पयामि तर्पयामि तर्पयामि ॥

Colophon :

ब्रह्मयज्ञविधिस्सम्पूर्णम्(:) ॥

No. **3747.** ब्रह्मयज्ञविधिः.

BRAHMAYAJÑAVIDHIḤ.

Pages, 6. Lines, 6 on a page. Character, Nandināgarī.

Begins on fol. 354 of the MS. described under No. 3722.

Similar to the above.

Complete.

अथ ब्रह्मयज्ञविधिः—

तस्य स्वरूपं तैत्तिरीयब्राह्मणे दर्शितम्—

यत्स्वाध्यायमधीयीतैकामप्यृचं यजुस्साम वा तद्ब्रह्मयज्ञः सन्तिष्ठत ॥

लिङ्गपुराणेऽपि—

स्वशाखाध्ययनं विप्र ब्रह्मयज्ञ इति स्मृत इति ।

तस्य कालमाह बृहस्पतिः—

स चार्वाक् तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः ।
वैश्वदेवावसाने वा नान्यादर्ते निमित्ततः ॥ इति ॥

End:

यं यं क्रतुमधीयीत तस्य तस्याप्नुयात्फलम् ।
त्रिर्वित्तपूर्णपृथिवीदानस्य फलमश्नुते ॥ इति ॥

Colophon:

इति ब्रह्मयज्ञप्रकरणं समाप्तम् ॥

No. 3748 भगवदाराधनक्रमः.

BHAGAVADĀRĀDHANAKRAMAḤ.

Pages, 10. Lines, 5 on a page.

Begins on fol. 67*a* of the MS. described under No. 3716.

Relates to the processes connected with the household worship of the image of God.

Complete.

For Extracts vide No. 3557.

No. 3749. भारद्वाजसूत्रम्.

BHĀRADVĀJASUTRAM.

Substance, palm-leaf. Size, $14\frac{1}{4} \times 1\frac{1}{4}$ inches. Pages, 8. Lines, 8 on a page. Character, Telugu. Condition, good. Appearance, new.

Incomplete: the portion here relates to certain ceremonies to be performed in connection with a dying man.

The work evidently treats of Pitṛmēdhikaprayōgaḥ according to Bharadvāja.

See Extract under No. 1235.

No. 3750. मध्वाद्युद्देशत्यागः.

MADHVĀDYUDDĒŚATYĀGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 13*a* of the MS. described under No. 3512.

On ceremonial gifts to be made to Indra and other gods looked upon as Madhu, Mādhava, &c.

Beginning:

इन्द्राय मधव इदम् । मरुद्भ्यो माधवायेदम् । त्वष्ट्रे शुक्रायेदम् । अग्नये शुचय इदम् । इन्द्राय नभायेदम् । मित्रावरुणाभ्यां नभस्यायेदम् ।

End:

अश्विभ्यां तपायेदम् । अग्नये गृहपतये तपस्यायेदम् ॥
द्वादशपदक्रमस्यैष विधिः ॥

No. 3751. महान्यासः.

MAHĀNYĀSAḤ.

Pages, 8. Lines, 9 on a page.

Begins on fol. 22*a* of the MS. described under No. 3521.

Regarding certain details in connection with the performance of Rudrajapa and Hōma.

Incomplete.

Beginning:

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः—

या ते रुद्र इति शिखायाम्; अस्मिन्महत्यर्णवे इति शिरसि सहस्राणीति ललाटे; हꣳसश्शुचिषदिति भ्रुवोर्मध्ये.

End:

अथैतस्य मूर्ध्नि सुवर्णकलशस्य सन्ततमुदकधारा न्य(अ)भिषिञ्चेत् मधुना, सर्पिषा, पयसा.

No. **3752.** महालयविधिः.

MAHĀLAYAVIDHIḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 80*a* of the MSS. described under No. 430.

On the Mahālaya-śrāddha.

Incomplete.

Beginning:

आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
मृताहं(हे) च पितुर्यो वै श्राद्धं दास्यति मानवः ॥
सन्तृप्ताः पितरस्तस्य तस्य संवत्सरं भवेत् ।
अपुत्रोऽनग्निकश्चैव विधवा ब्रह्मचारिणः ॥
दर्शे महालयं कुर्यान्न(र्युर्न)कुर्यात्पुत्रवान् गृही ।

End:

एककाले द्वयं श्राद्धं स्नानं चेद्वयतर्पणम् ।
एकपाके द्वयं श्राद्धं न दिवा भोजनद्वयम् ॥
आधाने यज्ञकाले च मातापित्रोर्मृतेऽहनि ।
गङ्गायां भास्करक्षेत्रे क्षव(क्षौरं) षट्सु विधीयते ॥

No. **3753.** महासङ्कल्पः.

MAHĀSAṄKALPAḤ.

Pages, 6. Lines, 4 on a page.

Begins on fol. 61*a* of the MS. described under No. 3709.

Gives an unabridged statement of details regarding how the vow for the performance of various religious rites is to be taken.

Beginning:

अनन्तवीर्यस्यास्य श्रीमदादिनारायणस्य अचिन्त्यापरिमितशक्त्या भ्रियमाणस्य महाजलौघ(स्य)मध्ये परिभ्रममाणानां

* * * *

चतुर्दशमन्वन्तराणां मध्ये सप्तविंशमहायुगे

End:

ब्रह्मलोके निवाससिद्ध्यर्थं तिलैः सूर्यमण्डलपर्यन्तं कृतराशि(शे)र्वर्षसहस्रावसाने एकैकतिलापकर्षक्रमेण सर्वराश्यपकर्षसम्मितकाले(लं) मया सह दशपूर्वेषां दशापरेषां मद्वंश्यानां पितृणां नरकादुत्तीर्य(त्तारणार्थं) मत्स्य(त्स्य)-पुराणोक्तमहादानान्तवक्ता(र्गत)सालङ्कृतकन्यकादानमहं करिष्ये.

No. **3754.** महासङ्कल्पः.

MAHĀSAṄKALPAḤ.

Substance, palm-leaf. Size, $9\frac{7}{8} \times 1\frac{1}{8}$ inches. Pages, 26. Lines, 4 on a page. Character, Grantha. Condition, good. Appearance, new.

Similar to the above.

Complete.

Beginning:

आचम्य, ओं श्रीगोविन्दगोविन्दगोविन्द आद्यश्रीभगवतः महापुरुषस्य अचिन्त्यापरिमितआ(या)शक्त्या भ्रियमाणस्य महाजलौघ(स्य)मध्ये परिभ्रममाणानामनेककोटिब्रह्माण्डानामेकतमे . . . कावेरीमध्यप्रदेशे सकलजगत्स्रष्टुः (द्वितीय)परार्धे पञ्चा(श)दब्दे व्यतीते प्रथमवर्षे प्रथमदिवसे अहनि द्वितीये यामे तृतीये मुहूर्ते स्वायम्भुवस्वारोचिषोत्तमतामसरैवतचाक्षुषाख्येषु षट्सु मनुषु व्यतीते(षु) वैवस्वतमन्वन्तरे कलियुगे.

End:

अश्वत्थनारायणदेवब्राह्मणत्रयस्त्रिंशत्कोटिदेवतासन्निधौ दिव्यपुण्यकाले कावेर्याः(र्यां)स्नानमहं करिष्ये ॥

No. **3755.** महासङ्कल्पः.

MAHĀSAṄKALPAḤ.

Pages, 9. Lines, 9 on a page.

Begins on fol. 26*a* of the MSS. described under No. 3521.

Similar to the above.

Incomplete.

Beginning:

श्रीगोविन्द गोविन्द श्रीभगवतो महापुरुषस्य श्रीमदादिनारायणस्य महाजलौघस्य मध्ये.

End:

भूपद्मिकाकर्णिकारस्योपरि चतुर्दशसहस्रयोजनमनिर्धे(मध्य)विस्तारस्य परब्रह्मणः नियु . . . . व्यावहारिके प्रभवादिषष्टिसंवत्सराणां मध्ये.

No. **3756.** मासिश्राद्धप्रयोगः.

MĀSIŚRĀDDHAPRAYŌGAḤ.

Pages, 104. Lines, 5 on a page.

Begins on fol. 13*a* of the MS. described under No. 3691.

Details regarding the monthly ceremonies to be performed during the first year after the death of a person: according to Kapardisvāmin's Kārika.

Complete.

Beginning:

कपर्दिकारिक(ा)प्रकारेण मासिश्राद्धप्रयोग उच्यते, प्रत्याब्दिकश्राद्धेऽर्पितथैव—

तिलाक्षतान् गृहीत्वा, प्रदक्षिणं,

समस्तसम्पत्समवाप्तिहेतवस्समुत्थितापत्कुलधूमहे(के)तव(:) ।
अपारसंसारसमुद्रसेतवः पु(न)न्तु मां ब्र(ा)ह्मणपादपांसवः ॥

* * * *

इति तिलाक्षतैर्ब्रा(तान् ब्रा)ह्मणानां शिरसि दत्वा नमस्कृत्य, अस्मत्पितरमुद्दिश्य प्रत्याब्दिकश्राद्धं कर्तुमुद्युक्तोऽस्मि ।

End:

पात्राण्युत्तानानि प्रोक्ष्य, शेषस्य ग्र(ा)सपराद्धच(र्धं)प्राश्नीयात् । आचम्यापूपताम्बूलादिनैवेद्यं कृत्वा "य(ा)ते अग्ने" (इ)ति मन्त्रेणाग्निआत्म(मात्मनि)समारोपयेत् । यस्य कृत्य(स्मृत्ये)ति जपेत् ॥

No. **3757.** मृत्तिकाशौचविधिः.

MṚTTIKĀŚAUCAVIDHIḤ.

Page, 1. Lines, 5 on a page.

Begins on fol. 33*b* of the MS. described under No. 430.

On ceremonial purification through the use of clean mud.

Beginning:

दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥
मूत्रे तु दक्षिणे कर्णे पुरीषे वामकर्णके ।
धारयेद्ब्रह्मसूत्रं तु मैथुने चोपवीतवत् ॥
एका लिङ्गे करे तिस्र उभयोर्मृद्द्वयं स्मृतम् ।
पञ्चापाने दशैकस्मिन् उभयोस्सप्त मृत्तिकाः ॥

End:

स्वग्रामे पूर्णमाचारमन्यग्रामे तदर्धकम् ।
पट्टणे पादमाचारं पथि शूद्रवदाचरेत् ॥

No. **3758.** मृत्तिकास्नानविधिः.

MṚTTIKĀSNĀNAVIDHIḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 52*a* and 100*a* respectively of the MS. described under No. 430.

Contains two copies.

Similar in character to the above.

Beginning:

अथातो मृत्तिकास्नानविधिं व्याख्यास्यामो ब्रह्मचारिग्रहस्थवानप्रस्थ-परिव्राजकानान्—

अश्वक्रान्ते, सहस्रपरमा देवीति भूमिदूर्वे अभिमन्त्र्य, उद्धृतासि इति नदीतो लोष्टमादाय.

End:

अष्टोत्तरविंशतिशतसूर्यनमस्कारं कृत्वा ब्राह्मणः पूतो भवति । ब्रह्महत्यागोवधसुरापानसुवर्णस्नेह(स्तेय)गुरुतल्पकाख्यैस्सर्वपापैः प्रमुच्यत इत्याह भगवान् बोधायनः ॥

No. **3759.** मृत्तिकास्नानविधानम्.

MṚTTIKĀSNĀNAVIDHĀNAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 28*b* of the MS. described under No. 3032.

Same subject as that of the above.

Complete.

Beginning:

अथातो मृत्तिकास्नानविधिं व्याख्यास्यामो ब्रह्मचारिगृहस्थवानप्रस्थपरि-(व्रा)जन(का)नाम्—

मृत्तिकास्नानमहं करिष्ये – इति सङ्कल्प्य, अश्वक्रान्ते, सहस्रपरमा देवी – इति भूमिं दूर्वामभिमन्त्र्य, उद्धृतासि वराहेण, नदीतटलोष्टमादाय, काण्डात्काण्डात् प्ररोहन्तीति द्वाभ्यां दूर्वामादाय, मृत्तिके हन मे पापमिति दूर्वा लोष्टैः प्रतिष्ठाप्य, यत इन्द्र भयामहे, स्वस्तिदाः, स्वस्ति न इन्द्रः, त्रातारमिन्द्रम्, आपान्तमन्युः, परं मृत्यो अनु परेहि–इतः(ति)षड्भिः प्रतिमन्त्रं प्रतिदिशं लोष्टमुत्सृज्य.

End:

अष्टोत्तरसहस्रगायत्रीं जपित्वा ब्राह्मणः पूतो भवति; ब्रह्महत्यात् पूतो भवति; गुरुतल्पगमनात्पूतो भवति; पङ्क्तिशतसहस्रात्पूतो भवति । स महान् भवति । अब्रह्मचारी सुब्रह्मचरी भवति । द्विराचम्य, उत्कामन्तो भूतपिशाचा ये भूता ये निशाचराः । तेषां सर्वाविरोधेन ब्रह्मकर्म समारभेदिति विज्ञायते । वासुदेवं नारायणं प्रपद्यते – इत्याह भगवान् बोधायनः ॥

No. **3760.** मृत्तिकास्नानविधिः.

MṚTTIKĀSNĀNAVIDHIḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 44*a* of the MS. described under No. 3533.

Complete.

Same work as the above.

No. **3761.** मृत्युञ्जयकल्पदूर्वाहोमप्रयोगः.

MṚTYUÑJAYAKALPADŪRVĀHŌMAPRAYŌGAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 113*b* of the MS. described under No. 2898.

Regarding certain pacificatory ceremonies performed with the aid of the Dūrva grass.

Complete.

Beginning:

अथातो मृत्युञ्जयकल्पविधिं व्याख्यास्यामः—

जन्मनक्षत्रे पुण्यनक्षत्रे त्रिजन्मसु ब्राह्मणा(न)न्नेन परितोष्य, पुण्याहं वाचयित्वा, देवयज[मा]नोल्लेखनप्रभृत्यग्निमुखं कृत्वा, चरुं श्रपयित्वा, ओं भूर्भुवस्सुवरिति पुरोऽनुवाक्यामनूच्य, तत्सवितुरिति रा(या)ज्यया जुहोति । प्रादेशमात्रास्तिस्रस्तिस्रो दूर्वासमिधोऽष्टसहस्रमष्टशतमष्टाविंशतिं वा मधुघृतपयांसि समिधायुताभ्यां(न्या) दधाति । अपैतु, परं, मा नो महान्तं, मा नस्तोके, स्वस्तिदाः, त्रियम्बकम्, एते सहस्रमित्यथाज्याहुतीरुपजुहोति ।

End:

धेनुं वृषभमनड्वाहं हिरण्यं कांस्यं वासो वा(प) पुनर्मृत्युं जयतीत्याह भगवान् बोधायनः ॥

Colophon:

इति मृत्युञ्जयहोमः ॥

No. 3762. यतिखननादिप्रयोगः.

YATIKHANANĀDIPRAYŌGAḤ.

Substance, palm-leaf. Size, $9\frac{5}{8} \times 1\frac{3}{8}$ inches. Pages, 68. Lines, 8 on a page. Character, Grantha. Condition, slightly injured. Appearance, new.

Regarding the process of burying the dead body of an ascetic.

Incomplete.

By Śrīśaila Vēdakōṭīra Lakṣmaṇa.

Beginning:

दत्तात्रेयं यामुनार्यं लक्ष्मणार्यं मुनित्रयम् ।
श्रीशैलवेदकोटीरलक्ष्मणाख्यो नमाम्यहम् ॥

यतिधर्मसमुच्चयश्च विश्वेश्वरसंज्ञस्मृतिमप्यहं विलोक्य ।
करवाण्यविरोधमद्य भिक्षोः ख(न)नाद्युत्तरकृत्यसुप्रयोगम् ॥
सप्रमाणमिमं दृष्ट्वा सन्तस्सन्तुष्टचेतसः ।
कृपयामितया दृष्ट्या ह्यनुगृह्णन्तु केवलम् ॥

अथ चतुर्विधानां भिक्षूणां खननसंस्कारविधिं व्याख्यास्यामः—

सिद्धिं गतं यतिं सम्यश्च(ङ्)निरूप्य, शुद्धः पुत्रः सन्निहितश्चेत् परिशुद्धे चित्रासनाद्यलंकृते विस्तीर्णे दारुमये पीठे मृतं साञ्जलिबन्धं यतिमासीनं निवेश्य, यथा न पतितो भूया(भवे)त् ।

End:

अन्यकर्तृकाराधने तु संकल्पादौ अस्मद्ब्रह्मीभूतगुरोः सिद्धिदिनादारभ्य त्रयोदशेऽहनि कर्तव्याराधनं करिष्य इ(ति), गुरु(परमगुरु) परमे(ष्ठि)गुरुपरापरगुरूणामाहवनीयस्थाने भवद्भिः प्रसादः कर्तव्यः— इत्यादिभेदः.

No. 3763. यतिपार्वणश्राद्धप्रयोगः.

YATIPĀRVAṆAŚRĀDDHAPRAYŌGAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 27*b* of the MS. described under No. 2951.

On the annual ceremony of Śrāddha to be performed in the case of a deceased ascetic.

Complete.

Beginning:

अथ(यति)पार्वणश्राद्धविधिं व्याख्यास्यामः—

द्वादशेऽह्नि वा अपरपक्षद्वादश्यां वा अमुष्य नारायणयतेः पार्वणश्राद्धं करिष्य इति संकल्प्य, अमुष्य नारायणयतेः पार्वणश्राद्धे विश्वे(श्व)देवार्थे भवता क्षणः कर्तव्य इत्येकं वृत्वा, एवमात्मार्थे एकम्, अन्तरात्मार्थे एकं, परमात्मार्थे एकम् । एवं चतुर्विप्रान् वृत्वा.

End:

एतत्ते नारायणरूपिणे आत्मान्तरात्मपरमात्म[परमात्म]रूपिणे यत-(चे) . . . (इ)ति पिण्डत्रयं दत्वा, तूष्णीमपो निनीय, अप्सु निक्षिपेत् इति संतिष्ठते ॥

Colophon:

(इति यति)पार्वणश्राद्ध(प्रयोग)स्समाप्तः ॥

No. 3764. यतिसंस्कारः.

YATISAMSKĀRAH.

Pages, 4. Lines, 8 on a page.

Begins on fol. 5*a* of the MS. described under No. 2902.

On the obsequial ceremonies to be conducted in relation to an ascetic who dies.

Complete.

Beginning:

ब्रह्मनिष्ठे च सन्न्यस्ते पिदध्युः परते श्रुते (खटे शुभे) ।
सपिण्डीकरणं नैव नाशौचं नोदकक्रिया ॥
अहन्येकादशे प्राप्ते पार्वणन्तु विधीयते ।
यतौ मृते न वपनं नोदकं नैव च क्रिया ॥
नाशौचं नैव शोकश्च पुत्राणां गोत्रिणामपि ।
न वृषोत्सर्गदाहौ च सपिण्डीकरणं न च ॥

* * * *

अथ यतेस्सिद्धिसमये सुतश्शिष्यो वा गीतादिजपं कुर्वन् देवसन्निधौ गोमयाम्बुना स्थण्डिलं परिमृज्य, पूर्वाभिमुखं संस्थाप्य, कौपीनं दोरसहितं परित्यज्य, मुद्रारहितं दण्डं दक्षिणाग्रं साळग्रामतीर्थेनाभिषिच्य, तुळसीमूलमृत्तिकां गोपीचन्दनञ्चोपलिप्य ।

End:

अस्मत्पितरं नारायणभगवत्पूज्यपादपामनं(शर्माणम्) ओं भूः क्षीरेण तर्पयामि; ओं भुवः क्षीरेण तर्पयामि; ओं सुवः क्षीरेण तर्पयामि; ओं भूर्भुवस्सुवः क्षीरेण तर्पयामि ॥

Colophon:

इति यतिनिक्षेपणं समाप्तम् ॥

No. 3765. यतिसंस्कारप्रयोगः.

YATISAMSKĀRAPRAYŌGAH.

Pages, 4 Lines, 7 on a page.

Begins on fol. 15*a* of the MS. described under No. 2749.

Same subject as that of the above.

Beginning:

अथ संस्कारविधिः—

पुत्रो वाऽन्यो वा गृहस्थः स्नात्वाचम्य, नवघटे पञ्चरत्नं निक्षिप्य, प्रणवेनोदकं संपूर्य, सहस्रशीर्षा पुरुषः, अद्भ्यस्संभूतः, सहस्रशीर्षं देवमिति पुरुषसूक्तैर्यतिं संस्नाप्य, वस्त्रं धारयित्वा, पुण्याहं वाचयित्वा, गन्धपुष्पधूपदीपादिभिरलंकृत्य, अष्टाक्षरेण द(न)त्वा, उदि(दु)त्यं जातवेदसं देवं वहन्ति केतवः । दशे विश्वाय सूर्यमिति मन्त्रेण यतिं शिक्ये संस्थाप्य, प्रणवेन विमानमारोप्य, जयशब्दसमन्विते नदीतीरे गिरिसमीपे गोष्ठेऽश्वत्थछायायां वा परिव्राजं निधाय, त्रिदण्डायामप्रमाणं खात्वा, सप्तव्याहृतीभिः प्रोक्ष्य, यतेर्देहं सावित्र्या प्रोक्ष्य.

End:

सर्वेषां स्नानेन शुद्धिः; नाशौचं नोदकक्रिया । वाहनादिकं कुर्वाणं(णानां)सर्वेषां पदेपदे अश्वमेधफलं भवेत्—इत्याह भगवान् बोधायनः ॥

Colophon:

इति यतिसंस्कारविधिस्समाप्तः ॥

No. **3766.** यतिसंस्कारप्रयोगः.

YATISAṀSKĀRAPRAYŌGAḤ.

Substance, palm-leaf. Size, $11\frac{3}{8} \times 1\frac{1}{4}$ inches. Pages, 19. Lines, 7 on a page. Character, Grantha. Condition, good. Appearance new.

Complete.

Similar to the above.

Beginning:

अथ यतिखननविधिप्रयोगः—

यतौ प्राणविहीने चेत् भित्तिपार्श्वे कूर्मासने आसनं संस्थाप्य, बद्धाञ्जलिपुटं कृत्वा, काषायेन बद्धा, दक्षिणतस्त्रिदण्डं संस्थाप्य, तुलसीनलिनाक्षमणिमालापवित्रादि भूषयित्वा मूलमन्त्रेण, द्वादश प्रणामान् कृत्वा।

End:

प्रपन्नसन्न्यासिनां वासस्थानं परमपदम्; अ(।)पन्नस(न्न्यासि)नां वासस्थानं ब्रह्मस्थ(।)नम् एतत् सर्वं श्रीभाष्यकारनियमितयादवप्रकाशयोगिना कृतयतिधर्मसमुच्चये एकादशपर्वणि, विश्वेश्वरस्मृतौ, भट्टभास्करे, दत्तात्रेयसंहितायां, कूर्मपुराणाद्यनेकस्थले च स्पष्टं द्रष्टव्यम् ॥

No. **3767.** यतिसंस्कारप्रयोगः.

YATISAṀSKĀRAPRAYŌGAḤ.

Pages, 13. Lines, 5 on a page.

Begins on fol. 43*a* of the MS. described under No. 3029.

Incomplete.

Similar to the above.

Beginning:

पुत्रो वा अन्यो वा गृहस्थशिष्यो वा सिद्धिं यतिं प्राप्नुवन्तं निरीक्ष्य, उपनिषदादिजपङ्कुर्वन् देवसन्निधौ गोमयाम्बुना स्थलं परिमृज्य, पूर्वाभिमुखं यतिं (सं)स्थाप्य, कौपीनं दोरसहि(तं) परित्यज्य, दण्डं मुद्रावर्जितं दक्षिणांसे निधाय, साळग्रामतीर्थेनाभिषिच्य, तुळसीमूलमृत्तिकया

उपलिप्य, गोपीचन्दनं स्थानत्रये धारयित्वा, साळिग्रामश्च पुरतः स्थापयेत् । सिद्धचनन्तरं पुत्रो वा अन्यो वा गृहस्थः स्नात्वा शुद्धात्मा सन् प्राणानायम्य, ब्राह्मणाम(न)नुज्ञाप्य, सिद्धिङ्गतं यतिं परमहंसं नारायणं संस्कारकर्म(णा) संस्करिष्ये ।

End:

मग(ङ्ग)लवाद्यैस्सह खननदेशमानीय, व्याहृतिभिर्लिखित्वा कलो(ल्पो)क्तप्रकारेण तत्र संस्थाप्य, वेदिकां कु(त्वा), आत्मानं तर्पयामीति तर्पणं कृत्वा, नैवेद्यं निवेद्य, एवं दश दिनानि पूजयित्वा, एकादशदिने कृतक्षौरः प्रातः स्वगृह्योक्तविधानेन नारायणबलिं करिष्य इति संकल्प्य.

No. **3768.** यल्लाजीयम्.

YALLĀJĪYAM.

Pages, 70. Lines, 24 on a page.

Begins on fol. 144*a* of the MS. described under No. 2714.

On various domestic rites.

By Yallāji.

Beginning:

श्रीपतिं पार्वतीनाथं विघ्नेशं पार्वतीप(सु)तम् ।
गुरून् पितृंश्च(न्स्वकान्) वृद्धान् विप्रान् वेदविदस्तथा ॥
भगवन्तं भरद्वाजं प्रणिपत्य कपर्दिनम् ।
ब्रह्मज्ञो धर्मविदुषो(विदुषामिष्टो) भारद्वाजसमुद्भवः ॥
तल्लमुड्डप्यन्वयभु(भ)वो यल्लुभट्टस्स(सु)तस्सुधीः ।
महाव्रतोद्धरो(ताध्वरी) ब्रह्मनिष्टो(ष्ठो) यल्लाजिनामकः ॥
वक्ष्याम्यहं परेतस्य चाहिताग्नेर्द्विजन्मनः ।
भारद्वाजस्य सूत्रस्य पैतृमेधिकमञ्जसा ॥
तत्सूत्रम(त्राण्य)न्यसूत्राणि तत्तद्भाष्याण्यशेषतः ।

(सद्भिराचरितं पूर्वमाचारं च समाहितः) ॥

विलोक्य विविधान् स(ग्र)न्थान् प्रयोगश्री(प्र)तिवृ(प)त्तये ।

* * * *

अथातः पैतृमेधिकदहनविधिः ।

अथेता(दा)नीं मृतस्य कर्मोच्यते—

पैतृमेधिकमिति कर्मनामधेयम्; अश्वमेधः पुरुषमेध इतिवत् । आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति श्रुतिविहितत्वात् ।

End:

प्रकेतुनेति शंस्ते त्वा हरिं हरन्तमित्यथ ।
अश्मन्वतीराप्यायस्व समेति सञ्जाहकं(नं) ततः ॥
उद्वयं तरणिर्द्वाभ्यामुपस्थाय दिनेश्वरम् ।
धाता त्वियष्ट इत्युक्तमन्यत्सर्वं समं भवेत् ॥

Colophon:

इति ब्रह्ममेधकारिका[यां] समाप्तः(प्ता) ॥

No. **3769.** यल्लाजीयम्.

YALLĀJĪYAM.

Substance, palm-leaf. Size, $17\frac{3}{4} \times 1\frac{1}{2}$ inches. Pages, 400. Lines, 7 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

Same subject as that of the above.

Beginning:

आश्रमिणामपि प्रायश्चित्ते तारतम्यभावो दृश्यते—

गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि ।
शौचवच्छोधनं कुर्युरर्वाक् ब्रह्मनिदर्शनात् ॥

(पूर्णषोडशवर्षस्य) द्विगुणं ब्रह्मचारिणः ।
अर्वागर्धं प्रदातव्यं बालत्वादिति निश्चयः ॥

इति ब्रह्मचारि(वानप्रस्थ)यतीनां शौचवत्प्रायश्चित्तद्वैगुण्यादिविधिरभिहिता(तः) । सर्वप्रायश्चित्तव्यतिरिक्तप्रायश्चित्तानामेवाधिकारभेदादुच्चावचभावकल्पनम् । सर्वप्रायश्चित्तस्याखण्डरूपत्वात् अधिकारिभेदेन उच्चावचभेदो नास्ति ।

End:

नैवेद्यं दत्वा पिण्डान् . . . . गृहमागत्य बन्धुभिस्सह रोदनं कृत्वा, अभ्यङ्गस्नानं कृत्वा, बन्धुभिस्सह भुञ्जीयात्(त) ॥

Colophon:

सपिण्डी(करणं स)माप्तम् ॥

No. **3770.** यल्लाजीयम्.

YALLĀJĪYAM.

Substance, paper. Size, $13\frac{3}{8} \times 8\frac{1}{4}$ inches. Pages, 362. Lines, 24 on a page. Character, Telugu. Condition, good. Appearance, new.

Same subject as that of the above.

Beginning:

तत्रादौ जलस्नानम्, अनन्तरं महासङ्कल्पः, मृत्तिकास्नानम्, सभार्चनम्, विज्ञापनप्रकारः, सभया स्मृतिमार्गेण प्रायश्चित्तविनिर्णयः.

Colophon:

इति सर्वप्रायश्चित्तविधिः ॥

श्रीपतिं पार्वतीनाथं विघ्नेशं विघ्ननाशनम् ।
गुरून् पितॄन् स्वकान् वृद्धान् विप्रान् वेदविदस्ततः ॥

प्रणम्य विदुषामिष्टो भारद्वाजसमुद्भवः ।
तलमुच्यन्वयभवो यल्लभट्टसुतस्सुधीः ।।
महाव्रताध्वरी ब्रह्मनिष्ठो यल्लाजिनामकः ।
आश्वलायनसूत्रस्य पैतृमेधिकमञ्जसा ।।
तत्सूत्रमन्यसूत्राणि तत्तद्भाष्याण्यशेषतः ।
शौनकादिप्रणीतानि शास्त्राणि विविधानि च ।
सद्भिराचरितं पूर्वमाचारं च समासतः ।
विलोक्य विविधान् ग्रन्थान् प्रयोगप्रतिपत्तये ।।

अथ मृतसंस्कारप्रयोगः कथ्यते—

आहिताग्निश्चेदुपतपेत् व्याध्यादिपीडया मुमूर्षुमाहिताग्नि(मग्नि)भिस्सह ग्रामाद्बहिरपराजितां प्राचीमुदीचीं वा दिशं प्रति नीत्वा, तथैवायतनानि कल्पयित्वा, तूष्णीमग्नीन् विहृत्य, तत्रैव तिष्ठेत् ।

End :

अष्टमाद्द्वादशादूर्ध्वं गृहस्थब्रह्मचारिणोः ।
सपिण्डीकरणं कुर्याद(त्रा)र्वागिति यमोदितम् ।।

अष्टमादूर्ध्वं गृहस्थस्स(स्य स)पिण्डीकरणं कुर्यात्; द्वादशादूर्ध्वं ब्रह्मचारिणस्सपिण्डीकरणं कुर्यादित्यर्थः ।।

No. **3771.** यल्लाजीयम्.

YALLĀJĪYAM.

Pages, 272. Lines, 7 on a page.

Begins on fol. 16*a* of the MS. described under No. 3532.
Incomplete.
To the end of Sapiṇḍīkaraṇa.
Same work as the above.

No. **3772.** यल्लाजीयम्.

YALLĀJĪYAM.

Pages, 284. Lines, 8 on a page.

Begins on fol. 66*a* of the MS. described under No. 2649.

It contains Āhitāgnisaṁskāra, Anāhitāgnisaṁskāra, Brahmamēdhasaṁskāra, Yatisaṁskāra.

Incomplete.

Same work as the above.

No. **3773.** यल्लाजीयम्.

YALLĀJĪYAM.

Substance, palm leaf. Size, $17\frac{3}{8} \times 1\frac{3}{8}$ inches. Pages, 316. Lines, 8 on a page. Character, Grantha. Condition, injured. Appearance, old.

Incomplete.

Same work as the above.

No. **3774.** राजाभिषेकविधिः.

RĀJĀBHIṢĒKAVIDHIḤ.

Pages, 8. Lines, 7 on a page.

Begins on fol. 65*a* of the MS. described under No. 2840.

On the ceremonies connected with the coronation of a king.

Complete.

Beginning :

नृपलक्षणमव्यक्तं कीर्त्यते हितकाम्यया ।
कृत्यानि चैव सर्वाणि सङ्क्षेपान्न तु विस्तरात् ।।
नृपः कुलीनस्सत्त्वस्थस्सत्यवादी जितेन्द्रियः ।
समग्रवयसो(सा)वीरः शूरो वाग्मी जनप्रियः ।।

* * * *

ऐतरेयविधानोक्तं ज्ञात्वा सर्वं यथाविधि ।
अथ विष्ण्वालये रम्ये मण्डपं का(रयेद्बुधः) ॥
लेपनास्तरणोपेतं वितानध्वजशोभितम् ।
तोरणैर्वस्त्रसंयुक्तैश्चतुर्द्वारेषु शोभितम् ॥

End:

निस्सपत्नां महीं पाति चिरकालं न संशयः ।
लभते बहुपुत्रांश्च आरोग्यं च न संशयः ॥

Colophon:

इति शौनकीये महाभिषेकविधिः ॥

No. 3775. रामपट्टाभिषेकप्रयोगः.

RĀMAPAṬṬĀBHIṢĒKAPRAYŌGAḤ.

Pages, 17. Lines, 16 on a page. Character, Dēvanāgarī.

Begins on fol. 34*a* of the MS. described under No. 3209.

On certain rites to be observed on the occasion of religiously reading that portion of the Rāmāyaṇa wherein the crowning of Rāma is described.

Complete.

Beginning:

वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः ।
भृगुः कण्वः पुलस्त्यश्च कपिलः पिप्पलस्तथा ॥
* * * *
एतेऽन्ये ब्रह्मवेत्तार ऋषयस्समुपागताः ।
आलोच्य सर्वशास्त्राणि निगमागमसंहिताः ॥
विधानं तेऽब्रुवन् विप्रा रामपट्टाभिषेचने ।
सुदिने शुभनक्षत्रे चन्द्रताराबलान्विते ॥
* * * *

मध्ये ब्रह्ममये पीठे सीतया सहितं विभुम् ।
प्रतिमायां समाकारं कृत्वा कुम्भे निधाय च ॥
वसनाभ्यां समाच्छाद्य यजेद्वेदोक्तमार्गतः ।
वाचको मङ्गलस्नानं सपत्नीकस्समाचरेत् ॥

End:

अभिषेककर्तृभ्यो दक्षिणादि दत्वा, दश दानानि कृत्वा, शतं वा ब्राह्मणान् भोजयेत् ॥

Colophon:

इति रामपट्टाभिषेकविधिः ॥

No. 3776. रामपट्टाभिषेकप्रयोगः.

RĀMAPAṬṬĀBHIṢĒKAPRAYŌGAḤ.

Substance, palm-leaf. Size, $14\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 9. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 67*b*. The other works herein are :—Mahimnastava (with commentary) 1*a*, Harimīdēstōtra 55*a*, Rāmapūjā 61*a*, Mūlabalapramāṇa 65*a*, Vināyakastōtra 72*a*, Dakṣiṇāmūrtistōtra 73*a*, Sarasvatīstōtra 74*a*, Tripurasundarīstōtra 75*b*.

Complete.

Similar to the above.

Beginning:

यद्दिने शुभनक्षत्रे चन्द्रताराबलान्विते ।
वाचकस्य च रामस्य श्रोतुश्चैव विशेषतः ॥

सुनक्षत्रे च सुदिने चन्द्रताराबलान्विते श्रीरामचन्द्रं सम्यगभिषेचयेत्। गृहस्योत्तरभागे यागमण्डपं कृत्वा, सर्वतोभद्रप्रकारेण नीलपीतादिभिरर्चयित्वा, तत्र द्वारपालकपूजा -- पूर्वद्वारे शङ्खाय नमः, चक्राय नमः, हनुमते नमः.

End :

यथाशक्ति कन्यकादानोपनयनदानं दश दानानि च कृत्वा, ब्राह्मणान् भोजयेत् ॥

Colophon :

इति श्रीमदगस्त्यसंहितोक्तप्रकारेण श्रीरामचन्द्रपट्टाभिषेकविधिस्समाप्तः ॥

वेङ्कटेश्वरस्य स्वहस्तलिखितम् ॥

No. 3777. रामपद्धतिः.

RĀMAPADDHATIḤ.

Pages, 33. Lines, 20 on a page.

Begins on fol. 55*a* of the MS. described under No. 412.

Incomplete.

A work on Pūrvaprayōga by an author named Rāma.

Beginning :

तत्र शुद्धसमये रविगुरुचन्द्रवारादिशुद्धौ गर्भाष्टमादे(व)वा अनुकल्पे षोडशसंवत्सराभ्यन्तरे ब्रह्मवर्चसकामस्य पञ्चमेऽप्युदगयनापूर्यमाणः पक्षे अनध्यायषष्ठीरिक्ताद्यतिरिक्ततिथौ रविगुरुशुक्रान्यतमवारे. . . .

कांस्येऽग्निमानीय, स्वाभिमुखं निदध्यात् । ततः कुमारमाचार्यशिष्यद्वाराग्नेः पश्चात्स्वदक्षिणपार्श्वेऽवस्थापयति । ततः कुमारं बद्धाञ्जलिं सम्बोध्याचार्य आह ब्रह्मचर्यमागामिति ब्रूहि । माणवको ब्रह्मचर्यमागाम् ।

End :

पूर्णाहुतीर्जुहुयात् । तत उपविश्य, श्र(स्रु)वेण भस्म मा(चा)नीय, दक्षिणकरेण पूर्वोक्तायुषं कुर्यात् । ततो भूरि(र)सी(ति)दद्यात् ॥

No. 3778. रुद्रहोमः.

RUDRAHŌMAḤ.

Pages, 23. Lines, 7 on a page.

Begins on fol. 55*a* of the MS. described under No. 2854.

Regarding certain offerings made to propitiate the god Rudra.

Complete.

Beginning :

अथ रुद्रहोमविधिः । अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः—

इति बोधायनोक्तत्वान्महान्यासपूर्वकमेकादशरुद्रजप एकः पक्षः ; न्यासपूर्वकहोम एकः पक्षः ; न्यासपूर्वकं लिङ्गार्चन ए(मे)कः पक्षः ; न्यासपूर्वकमभिषेक एकः पक्षः ; सर्वत्र प्रणवपुरस्सरम् ।

* * * *

एकोनसप्तत्युत्तरशतविभागपदविधानेन तिलाक्षतद्रव्येण रुद्रहोमं करिष्ये—इति सङ्कल्प्य, गणेशं संपूज्य, चतुरश्रमग्निकुण्डं कृत्वा, परितो ब्राह्मणैस्सहाचार्यः प्राङ्मुखो भूत्वा, पुण्याहं वाचयित्वा.

End :

रुद्रप्रश्नेन यजमानं कलशोदकैस्स्नापयित्वा, हुतभस्म धरि(धारयि)त्वाथालङ्कृत(तां)गां दद्यात् । एवं कृते दीर्घायु[रायु]ष्मान् भवतीत्याह भगवान् बोधायनः ॥

No. 3779. रोगनाशहोमः.

RŌGANĀŚAHŌMAḤ.

Pages, 2. Lines, 7 on a page.

Begins on fol. 117*a* of the MS. described under No. 2898.

Regarding certain fire-offerings to be conducted with a view to cure diseases.

Complete.

Beginning:

रोगनाशहोम उच्यते—

पुण्याहं वाचयित्वा, उपलेपनाद्यग्निप्रतिष्ठापनपूर्णपात्रनिधानान्तं कृत्वा, निर्वापप्रोक्षणपात्रस्थालीपाकक्रमेण चरुं श्रपयित्वा, अग्निमुखान्तं कृत्वा.

End:

प्रणीतापात्रोदकैः व्याधिग्रस्तमभिषिच्य, आचार्याय गोभूहिरण्यानि दद्यात् । ब्राह्मणान् भोजयित्वा स्वयं च[।]वोद्यशेषं प्राशयेत् ॥

Colophon:

इति रोगशान्तिविधिः ॥

No. **3780.** रोगयुक्तनक्षत्रशान्तिः.

RŌGAYUKTANAKṢATRAŚĀNTIḤ.

Pages, 14. Lines, 6 on a page.

Begins on fol. 107*a* of the MS. described under No. 3237.

Deals with certain ceremonies performed to avert the evil consequences of falling ill under an inauspicious asterism.

Complete.

Beginning:

अथ रोगनक्षत्रशान्तिविधिरुच्यते—

अ(य)स्मिन् नक्षत्रे पीडापरिहारो भवति, तदधिदेवताप्रतिमां सुवर्णेन स्वशक्त्यनुसारेण कारयित्वा, शुचौ देशे गोमयेनोपलिप्य, तण्डुलैश्चतुरश्रं कृत्वा सर्वोपचारैस्संपूजयेत् ।

End:

नैवेद्यम्; अखण्डितपुष्पाणि होमः ॥

Colophon:

इति ज्यौतिषार्णवे शतसहस्रिकायां सं(हितायां रोगनक्षत्रशान्तिस्समाप्ता) ॥

No. **3781.** वध्वञ्जलिहोमः.

VADHVAÑJALIHŌMAḤ.

Pages, 2. Lines, 5 on a page.

Begins on fol. 27*a* of the MS. described under No. 430.

Regarding a certain ceremony in which there is an offering of a handful of curds unto the sacrificial fire.

Complete.

Beginning:

अथैतदपरं दध्न एवाञ्जलिना जुहोति । प्रथममध्यमाष्टकयोः प्रत्याम्नायः । अष्टम्यां प्रातरौपासनं हुत्वा, प्राणानायम्य, वध्वञ्जलिहोमं होष्यामीति सङ्कल्प्य, अग्नेरुपसमाधानाद्यग्निमुखान्ते अञ्जलिद्व्योस्संस्कारोऽन्यः कुर्यात् । अन्योऽञ्जलावुपस्तीर्य, दध्नो द्विरवदाय, अभिघार्य.

End:

प्राचीनावीती, (कृत)प्राणायामोऽन्वष्टकाश्राद्धं करिष्यामीति सङ्कल्प्य, सर्वं मासिश्राद्धवत् । श्वोऽन्वष्टकाश्राद्धं भविष्यति; तत्र भवद्भिः क्षणः प्रसादः करणीय इति क्षणे विशेषः ॥

Colophon:

वध्वञ्जलिहोमस्समाप्तः ॥

No. **3782.** वपनविधानम्.

VAPANAVIDHĀNAM.

Pages, 3. Lines, 5 on a page.

Begins on fol. 26*b* of the MS. described under No. 3686.

Regarding the ceremonial rules for getting appropriately shaved.

Beginning :

आपो मूलं घृतञ्चैव पयःपाकन्तथैव च ।
फलं ब्राह्मणकामाय गुरोर्वचनमौषधम् ॥

* * * *

कन्याकर्कटकुम्भेषु चापमासे षु (च)यो द्विजः ॥
केशखण्डं गृहस्थस्य पितॄन्नाशयते यमः ।
धनुकुम्भद्वयो(ये)भागे पूर्वभागं परित्यजेत् ॥

End :

आकाशात्पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रतिगच्छति ॥

No. **3783.** वर्धापनहोमप्रयोगः.

VARDHĀPANAHŌMAPRAYŌGAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 121*a* of the MS. described under No. 2898.

This Hōma is performed with a view to attain long life.

Complete.

Beginning :

यजमानः अभ्यङ्गस्नानं कृत्वा, स्वस्तिवाचनं कृत्वा, आचार्यऋत्विग्वरणं, नवग्रहमखः, आयुष्यहोमः, दूर्वाहोमः, तिलहोमः, आयुष्यचरुहोमः । आ नो भद्रेति दशर्चस्य दीर्घतम ऋषिः.

End :

रे(रै)णुकेय महावीर्य कार्तवीर्यकुलान्तक ।
आयुः प्रयच्छ मे राम जामदग्न्य नमोऽस्तु ते ॥
एवं प्रार्थयित्वा ब्राह्मणान् भोजयित्वाशिषो गृह्णीयात् ॥

Colophon :

इति वर्धापनविधिः ॥

No. **3784.** वामनकारिका.

VĀMANAKĀRIKĀ.

Pages, 160. Lines, 20 on a page.

Begins on fol. 1*a* of the MS. described under No. 3720.

A work by Vāmanācārya on Pūrvaprayōga; written according Khādiragṛhya.

Complete.

Beginning :

प्रणम्य खादिराचार्यं गृह्यमाश्रित्य तत्कृतम् ।
संक्षेपेण पदार्थानां स्मार्तानां वक्ष्यते क्रमः ॥
अन्येष्वपादबद्धेषु पूर्वपूर्वेषु सत्स्वपि ।
पाठधारणसौख्यार्थं क्रियते पद्यया गिरा ॥
यथावन्निर्मितस्तेषु पूर्वपूर्वेषु सत्स्वपि ।
परमश्वरमस्तद्धदयं ग्रन्थो भविष्यति ॥
अथ कर्माण्यनादेशे सर्वाण्यप्युत्तरायणे ।
पूर्वपक्षे शुभे चाह्नि तिथिवारगुणान्विते ॥

* * * *

तत्र नान्दीमुखश्राद्धक्रमस्तावदुदीर्यते ॥
तच्छ्राद्धे देवतीर्थेन पूर्वाह्णे प्राङ्मुखेन च ।
तिलस्थाने यवान् कृत्वा कार्यं यज्ञोपवीतिना ॥

End :

पशूनां देहनिष्पन्नकृमिनाशं य इच्छति ॥
स सायं लाङ्गलैः कृष्टमृत्तिकां गृह्य पाणिना ।
वैहायसीन्ततः कृत्वा वृतस्तस्य तु पांसुभिः ॥
प्रतिष्किरन् कृमिस्थानं हतस्त इति षट्कृतः ।
कृमिनाशं व्रजन्त्ये(व) पशवस्तेन कर्मणा ॥

स्वादिरादीन् समालोच्य वामनेन मया कृताम् ।
पद्यभूतां कृतिं प्राज्ञाः प्रतिगृह्णन्तु निर्ममाः ॥

Colophon:

पार्थिवाब्दे चैत्रमासे कृष्णपक्षे हरेस्तिथौ ।
विलिख्य पूर्तिमगमदेषा वामनकारिका ॥

*   *   *   *

यत्करोषीति वचनं हृदि कृत्वा महेशितुः ।
अर्पये लिखितामङ्घ्र्योरिमां वामनकारिकाम् ।

No. 3785. वायसोत्पतनशान्तिः.

VĀYASOTPATANAŚĀNTIḤ.

Pages, 3. Lines, 5 on a page.

Begins on fol. 111*b* of the MS. described under No. 115.

Complete.

For Extracts, &c., See No. 3412.

No. 3786. विधवाप्रायश्चित्तम्.

VIDHAVĀPRĀYAŚCITTAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 72*a* of the MS. described under No. 1240.

Deals with certain purificatory ceremonies performed with a view to extricate widows from the sin of having violated the obligations of the ascetic life imposed upon them by religion.

This work has been omitted to be shown under the above number.

Complete.

Beginning:

एवं तिथौ मम विधवावस्थायाः अस्नानभोजनपर्वकालरात्रिभोजन-ताम्बूलचर्वणपर्युषितान्नभोजन.

End:

प्रायश्चित्तं मुख्यं कारयित्वा अधिकारसंपदस्त्विति भवन्तो ब्रुवन्तु । पवित्रपाणिस्सन् . . . . प्रदक्षिणीकृत्य ब्रह्मदण्डं कुर्यात् ॥

No. 3787. विभूतिधारणम्.

VIBHŪTIDHĀRAṆAM.

Pages, 6. Lines, 5 on a page.

Begins on fol. 102*a* of the MS. described under No. 29.

On the putting on of the sacred ashes.

Complete.

Beginning:

विभूतिं वामहस्ते निधाय, दक्षिणकरेण पिधाय, जातवेदसेन गायत्रेण त्रियम्बकं चाग्निरिति; मानस्तोके त्रियायुषं जमदग्निरिति; षड्भिर्ब्रह्म-(भिर)भिमन्त्र्य, मूलविध्या(द्य)या सप्तवारमभि[रभि]मन्त्र्य, ईशान इति शिरसि । तत्वं(त्पु)रुषायेति वक्त्रे । अघोरेभ्य इति हृदये । वामदेवायेति गुह्ये । सद्यो जातमिति पादयोः । श्रीविद्यया शिरसि । दीपिनीविद्यया मुखे । ज्वालामालिन्या वक्षसि । वह्निवासिन्या नाभौ । सुदर्शनास्त्रेणोर्वोः । पाशुपतास्त्रेण जङ्घयोः । शैवाघोरविद्यया पादयोः । वैष्णवविद्यया हृदि । अघोरसिद्धविद्यया पृष्ठे । मातृकाविद्यया सर्वाङ्गसन्धिप्रदेशेषु ।

End:

सर्वदोषान्मोचय(२) साय(२) स्वाहा । इति सप्तवारमभिमन्त्र्य, तदुपरि मूलं दशवारं जप्त्वा, इष्टदेव्यै त्रिवारं वेद्या(देव्या) मूलेन त्रिपुण्ड्रं कुर्यात् ॥

प्रातर्भस्मजलं धार्यं मध्याह्ने चन्दनान्वितम् ।
सायाह्ने केवलं भस्म तद्भस्म श्रीकरं भवेत् ॥

Colophon:

इति विभूतिधारणविधिः ॥

No. **3788.** विवाहकल्पः.

VIVĀHAKALPAḤ.

Pages, 20. Lines, 8 on a page.

Begins on fol. 106*a* of the MS. described under No. 2378.

On the conduct of the ceremony of marriage.

Incomplete.

Beginning:

कांस्यपात्रे तण्डुलताम्बूलहिरण्यादिकं गृहीत्वोत्थाय, तत्र देवताभ्यः सत्यवसुसंज्ञिकाभ्यः विश्वे(श्वाभ्यो)देवताभ्यः नान्दीमुखा(भ्य)ः प्रपितामहीभ्यः, पितामहीभ्यः, मातृभ्यः, गोत्राभ्यः . . . . तत् पात्रमग्रतस्संस्थाप्य, इडावाचनं करिष्य इति संकल्प्य.

End:

दम्पत्योर्जन्मनक्षत्रे सग्रहे सदैवते सह सोमेन क्रियतां प्रजापतिस्त्रियामित्यादि यज्ञो मे कामस्समृध्यतामित्यन्तं ब्रुवन् अञ्जलौ सन्ततमुदकधारां स्रावयन्.

No. **3789.** विवाहादिप्रयोगः.

VIVĀHĀDIPRAYŌGAḤ.

Substance, palm-leaf. Size, $15\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 58. Lines, 6 on a page. Character, Telugu. Condition, much injured. Appearance, old.

Breaks off in Arkavivāha.

On the conduct of various kinds of marriages and other rites.

Beginning:

मङ्गलस्नानं कृत्वा, प्राणानायम्य, एवंगुणविशेषणविशिष्टायां शुभतिथौ पाणिग्रह . . . वृद्ध्यर्थमभ्युदयार्थं च महाजनैस्सह स्वस्तिपुण्याहवाचनं करिष्ये । पुण्याहवाचनं कृत्वा.

End:

एवंविधविवाहं च कृत्वा पूर्ववदुद्वहेत् ॥
सर्वान् कामानवाप्नोति पुत्रपौत्रविवर्धनम् ।
इत्येवं मनुना प्रोक्तमर्कोद्वाहसमापनम् ॥

अर्कविवाहप्रयोग(गो)वक्ष्यते—

* * * *

यस्मै कामकामाय स मृद्वाजामहे तस्मै भ्वां(त्वं) कामवत्त्वात्तथैव तु घृतं पिब स्वाहा--अग्नय इदं न मम ॥

No. **3790.** वैभवेष्टिः.

VAIBHAVĒṢṬIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3517.

Regarding certain rites to be performed by one who seeks to become a Vaiṣṇava.

Complete.

Beginning:

वैष्णवेष्टिविशेषो वैभवेष्टिप्रकारो लिख्यते—

स्वस्य पितृनुद्दिश्य तेषां वैष्णवत्वसिद्ध्यर्थं वैभवेष्टिं कुर्यात् । यो वैष्णवत्वात्प्रच्युतो भवति, सोऽपि स्वस्य वैष्णवत्वसिद्ध्यर्थमिमामिष्टिं कुर्यात् ।

End :

पाषण्डादिदूषिते तत्परिहारश्च, सर्वप्रायश्चित्तरूपता, अनिष्टशान्तिः, अभीष्टफलप्राप्तिः, स्वयंप्रयोजनरूपभगवत्प्रीत्यात्मककैङ्कर्यता, समस्तदोषशान्तिरूपता च भवति । यजमानो वा स्वपित्रादीन् प्रति कुर्यात् ॥

Colophon :

इति वैभवेष्टिस्समाप्ता ॥

No. **3791.** वैश्योपनयनविधिः.

VAIŚYŌPANAYANAVIDHIḤ.

Pages, 24. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3556.

Regarding the ceremony of the investure with the sacred thread as applicable in the case of a Vaiśya.

Complete.

Contains the ritualistic procedure relating to the ceremonies running from Jātakarma to Upanayana as applicable to a Vaiśya. The peculiarity is that no Vēdic Mantras are used though the ceremony is intended to entitle the undergoer thereof to the study of the Vēdas.

Beginning :

वैश्योपनयनविधिः—

शुभनक्षत्रे शुभदिने आचार्यः प्रयतः पवित्रपाणिः स्वस्य दक्षिणपार्श्वे शिष्यं स्नातं धौतवस्त्रन्दार्य(धारिणं) धृतोर्ध्वपुण्ड्रं [शिष्यं] निधाय स्वयं तिष्ठन् उपनयनद्रव्याणि गृहीत्वा, अस्य वैश्यकुमारस्य जातकर्मनामकरणान्नप्राशनचौलोपनयनकर्मारम्भमुहूर्तः सुमुहूर्तोऽस्त्वित्यनुगृह्णन्तु इति प्रार्थ्य, स्वयं दर्भेष्वासीनो दर्भान्धारयमाणः ।

End :

अथानुग्रहं कारयित्वा, भिक्षातण्डुलं कारयित्वा, सदस्यान् गन्धपुष्पताम्बूलदक्षिणादिभिः पूजयेत् सदस्यानाशीर्वादङ्कारयित्वा ॥

Colophon :

इति वैश्योपनयनविधिः सम्पूर्णः ॥

No. **3792.** वैश्वदेवक्रमः.

VAIŚVADĒVAKRAMAḤ.

Pages, 4. Lines, 7 on a page.

Begins on fol. 3*a* of the MS. described under No. 2749.

On the daily Vaiśvadēva offering.

Complete.

By Vēdāntadēśika.

Beginning :

श्रीमान्वेङ्कटनाथार्यः कवितार्किककेसरी ।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि ॥

स्वाग्निं संस्थाप्य पूर्वं कुशनिचयलसत्संस्तरस्वासुयाम·
स्वाकूत्याधिश्रयोक्तिप्रतिवचनहविःप्रोक्षणं स्थापनं स्यात् ।
अन्नं द्वेधोत्तरार्धं त्रिविधविभजितं पश्चिमारम्भमन्नात्
भागं द्वेधा विभक्ते हुतभुजि जुहुयात् तत्र पूर्वस्थमन्नम् ॥
आद्यैष्षड्भिस्सतारैर्मनुभिरथ पृथक् पाणिना होममग्नौ
कृत्वा तत्रैकदेशं हविरथ समितं पश्चिमांशेन तेन ।
पश्चादग्नेर्धरण्यां बलिहरणविधौ मार्जनप्रोक्षणादेः ·
पात्रेष्वाहृत्य तोयं क्रमविधिविहिते मार्जनप्रोक्षणे च ॥
धर्माधर्मादिभेदप्रचुरबलिविधिस्थाननिर्देशनं तत्
सर्वं चक्रान्तरस्थं व्यजनविकृतिगं वेदशास्त्रानुरोधम् ।

पित्र्ये रौद्रे तथा स्यात् क्रमविधिविहिते मार्जनप्रोक्षणादौ
यद्यत्प्राचीनसूत्रं यदपि तदितरत् यच्च तीर्थं निपीतम् ॥
पश्चाद्वैहायसस्य प्रथमबलिमतो वायसस्याग्रभागे
श्वभ्यां तस्याग्रभागे बलिमथ निविशेदत्र पादात्मशुद्धिः ।
ध[ा]र्मादेर्दर्शनश्चेदसुखकरमतच्चा(श्रा)न्द्रमत्रोपवासः
स्याद्देवे पित्र्यभूतद्वययजनविधौ पश्चिमस्थं हविः स्यात् ॥
मध्यादुद्धृत्य भागान्मनुजयजनमित्यग्रभागेऽग्रदानं
कृत्वा गोदोहकालक्षपणविधिबलात् तत्र लब्धातिथिभ्यः ।
दद्याल्लक्ष्मीविशिष्टस्वदितमपि हविर्यज्ञशिष्टान्नयुक्तं
कृत्वा पाद्यासनार्घ्यैर्विधिवदपचितिं कल्पयित्वा यथार्हम् ॥

End:

सायं रौद्रान्तमन्नाद्यदि हितमशनं यद्यथा तत्तथा स्यात्
नक्तश्चामेन तोयाद्यदि मनुजपतस्तच्च रौद्रान्तमाहुः ।
केचित्त्वामेन तोयान्मनुजपकरणैष्षाड्भिरेवाद्यमन्त्रैः
नक्तं स्यात्सायमेव त्वनशननियतश्राद्धभोक्तुर्जपः स्यात् ॥
नेत्रेन्दू नयनं युगं शशिविधू चन्द्रावतारौ शशी
चन्द्रश्चन्द्रशशीन्दवोऽत्र गणिता धर्मादिकास्सेचने ।
तद्देवेन धनं क्रमात्पितृमखे चन्द्रश्च भूते शशी
मर्त्येन्दुश्च तथा गृहे हुतवहे पूर्वाहुती(ति)ष्वीक्षणम् ॥
इत्थं व्यासपराशरादिमुनिभिस्सिद्धान्तितार्थोऽप्ययं
श्रीमल्लक्ष्मणयोगियामुनमुखैर्नाथादिभिर्नन्दितः ।
तत्सर्वं त्ववलोक्य तत्करुणया तद्वैश्वदेवक्रमः
सन्मोदाय च वेङ्कटेशकविना प्रोक्तोऽभवद्धीमता ॥
कवितार्किकसिंहाय कल्याणगुणशालिने ।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

No. 3793. वैश्वदेवप्रयोगः.
VAIŚVADĒVAPRAYŌGAḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 16*a* of the MS. described under No. 2985.
Details regarding the process of the Vaiśvadēva offering.
Complete.

Beginning:

देवकृतस्यैनसोऽवयजनमसि स्वाहा । मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा । पितृकृतस्यैनसोऽवयजनमसि स्वाहा । आत्मकृतस्यैनसोऽवयजनमसि स्वाहा । . . . . यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा ।

End:

ऐन्द्रवारुणवायव्याः सौम्या याम्याश्च नैरृताः ।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम् ॥
देवा मनुष्याः पशवो वयांसि सिद्धाश्च रक्षोरगदैत्यसङ्घाः ।
प्रेताः पिशाचास्तरवस्समस्ता ये चान्नमिच्छन्ति मया प्रदत्तम् ॥
स्वाहा । अग्न्युपस्थानम् ॥

No. 3794. वैश्वदेवप्रयोगः.
VAIŚVADĒVAPRAYŌGAḤ.

Pages, 4. Lines, 8 on a page.

Begins on fol. 33*a* of the MS. described under No. 1058.
Almost complete.
This work has been missed to be noted under the above number.
Same work as the above.

No. 3795. वैश्वदेवप्रयोगः.
VAIŚVADĒVAPRAYŌGAḤ.

Pages, 5. Lines, 8 on a page.

Begins on fol. 66*a* of the MS. described under No. 3680.
Similar to the above.
Complete.

Beginning:

अथातश्चक्राकारबलिं व्याख्यास्यामः—

अहरहर्वैश्वदेवं पञ्चविंशत्याहुतिमग्नौ जुहुयात् । उत्तरार्धपूर्वार्धस्थाने गोमयेनोपलिप्तं(प्ते) स्थण्डिल उपलिप्यानन्तरं बलिश्च कारयेत् ।

End:

हव्यं देवेभ्यः पितृभ्यस्स्वधा नमस्स्वाहा ॥

हस्ताहुतन्तु नाश्नीयादब्दमुक्तानुमासिके ।
अग्नौ प्रक्षेपणङ्कुर्यात् सपिण्डीप्रेतकर्मसु ॥

No. **3796.** **वैश्वदेवप्रयोगः.**

VAIŚVADĒVAPRAYŌGAḤ.

Pages, 11. Lines, 6 on a page.

Begins on fol. 83a of the MS. described under No. 2510.

Similar to the above.

Complete.

Beginning:

भगवति निवेदितहविष(ा) वैश्वदेवमौपासने पचने वा कुर्यात् । तत्प्रकारः—

यजमानस्सुप्रक्षालितपाणिपादो द्विराचम्य, अग्नेः पश्चादासने उपविश्य, पाककर्त्रा हविरादाय, भूतमित्युक्ते स्वयमुच्चैरोमित्युपांशु मा क्षान्नमस्त इत्युक्त्वा, तद्धविर्गृहीत्वा अग्नेरुत्तरतो दर्भेषु निदध्यात् ।

End:

अन्यत्सर्वं कुर्यात् । एवं मुख्यानुष्ठानाशक्तौ दिवानक्तं तत्तदाकारेण तर्पणरूपेण वा कुर्यात् ॥

No. **3797.** **वैश्वदेवप्रयोगः.**

VAIŚVADĒVAPRAYŌGAḤ.

Pages, 3. Lines, 7 on a page.

Begins on fol. 7a of the MS. described under No. 3512.

Similar to the above.

Complete.

Beginning:

प्राणानायम्य, संकल्प्य, परमेश्वरप्रीत्यर्थं समस्तैनोनिर्हरणार्थं शकलहोमं करिष्ये । उल्लेखनादि परिषिच्य, देवकृत, मनु, पितृ, आत्म, अन्य, असतकृ(त) ।

End:

वैश्वदेवसाद्गुण्यार्थम् अनाज्ञातत्रयम् । बृहत्साम । किंचिदन्नमादाय वायसेभ्यो दद्यात् ॥

पादौ प्रक्षाल्याचम्य, सिंहानुवाकं जपेत् ॥

No. **3798.** **वैश्वदेवप्रयोगः.**

VAIŚVADĒVAPRAYŌGAḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 1a of the MS. described under No. 1014.

Similar to the above.

Complete.

Beginning:

एवंगु . तिथौ — द्वारा परमे — त्यर्थम् आत्मशि(शु)द्धिद्वारा अन्नशुद्ध्यर्थं सिद्धेनान्नेन वैश्वदेवं करिष्ये—

अग्नावधिश्रित्य, अग्नेव्य(रु)त्तरतः उदगुद्वास्य, अद्भिः प्रोक्ष्य, अभिघार्य. तदन्नं पञ्चधा विभज्य, अभिघार्य, तिथौ . . . . . परमेश्वरप्रीत्यर्थं पूर्वभागे षडाहुति(भि): ओदनवैश्वदेवं करिष्ये ।

End:

श्वानो(नौ) हि श्यान(म)शबलौ वैवस्वतकुलोद्भवौ ।
ताभ्यां बलिं प्रदास्यामि रक्षेतां पति(थि)सर्वदा ॥
ऐन्द्रवारुणवायव्ययाम्या वै नैरृतास्तथा ।
(वाय)साः प्रतिगृह्णन्तु भूमावन्नं मयार्पितम् ॥

No. 3799. वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Pages, 3. Lines, 6 on a page.

Begins on fol. 24*b* of the MS. described under No. 2821.
Similar to the above: applicable to Sāmavēdins.
Complete.

Beginning:

(सामवेदिप्रयोगोऽयम्)—

वैश्वदेवप्रकारं वक्ष्ये । वैश्वदेवहोमं करिष्ये । अग्निं निधाय, देव . सु(व) इति परिषेचनम् । अग्नये स्वाहा । धन्वन्तरे(रये)स्वाहा । विश्वेभ्यो देवेभ्यस्स्वाहा । प्रजापतये स्वाहा । अग्नये स्विष्टकृते स्वाहा ; अपग्नें वा उ इत्यन्नाहुतीर्जुहुयात् ।

End:

अग्ने विवस्वदूषासा इति साम्ना बलिः । सर्वेभ्यो देवेभ्यस्स्वाहा । महा-विष्णवे स्वाहा ॥

इति बलिहरणम् । तूष्णीं परिषेचनम् ॥

No. 3800. वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Page, 1. Lines, 4 on a page.

Begins on fol. 30*a* of the MS. described under No 3239.
Incomplete.

Beginning:

शकलहोमं करिष्ये—

देवकृत, मनुष्यकृत, पितृकृ(त), आत्मकृत, अन्यकृ(त), असत्कृ(त), यद्दिवा च न, यत्स्वपन्त, यत्सुषुप्त, यद्विद्वांश्च ।

End:

आत्मनश्च संस्कारार्थं वैश्वदेवं करिष्ये । भूतं सुभूतम् । अग्नावधिश्रित्य, अद्भिः प्रोक्षेत् । तदन्नं पञ्चधा कृत्वा मध्यमात्तु षडाहुतीः ॥

No. 3801. वैश्वदेवप्रयोगः.

VAIŚVADĒVAPRAYŌGAḤ.

Pages, 6. Lines, 3 on a page.

Begins on fol. 14*a* of the MS. described under No. 2841.
Incomplete.

Beginning:

अग्नये स्व(ा)हः(हा)—अग्नय (इ)दं न (मम) । विश्वेभ्यो देवेभ्यः स्वाहा—विश्वेभ्यो देवेभ्य (इदं न मम) । ध्रुवाय भूमाय स्वाहा—ध्रुवाय भूमाय इदं न मम । (ध्रुवक्षितये स्वाहा—ध्रुवक्षितय इदं न मम) । अच्युतक्षितये स्वाहा—अच्युतक्षितय इदं न मम । अग्नये स्विष्टकृते स्वाहा—अग्नये स्विष्टकृत इदं न मम । एनोनिर्हरणार्थं शकलहोमं करिष्ये । देवकृतस्यैनसोऽवयजनमसि स्वाहा.

End:

श्वा(श्वा) नौ द्वौ श्यामशबलौ वैवस्वतकुलोद्भवौ ।
ताभ्यां बलिं प्रदास्यामि स्यातां न्ये(स्यातां)नः पापहि(हिंस)कौ ॥
ऐन्द्रवारुणवायव्याः सौम्या याम्याश्च नैरृताः ।
वायसाः प्रतिगृह्णन्तु भूमौ बलिं(बलिं भूमौ) मदर्पितम् ॥

No. **3802.** वैश्वदेवविधिः.

VAIŚVADĒVAVIDHIḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 95*a* of the MS. described under No. 1035.

Regarding the details of the daily offerings to the Viśvē-Dēvas.

Complete.

Beginning :

प्राणानायम्य, संकल्प्य, वैश्वदेवं करिष्य इति संकल्प्य, गृहपाकाद्ध-विष्यमन्नमादाय, अग्नावधिश्रित्योद्वास्याद्भिः प्रोक्ष्य, तदन्नं पञ्चधा विभज्य, अदितेऽनुमन्यस्वेत्यग्निं परिषिच्य, प्रथमभागमादाय, अग्नये स्वाहा—अग्नय इदम् ।

End :

इति श्वानबलिं वायसबलिं च दद्यात् । पादौ प्रक्षाल्याचम्य गृहं प्रविशेत् । ततः अतिथिभिस्सह भुञ्जीयात्(त) ॥

Colophon :

इति वैश्वदेवविधिः ॥

No. **3803.** वैश्वदेवविधिः.

VAIŚVADĒVAVIDHIḤ.

Pages, 8. Lines, 5 on a page.

Begins on fol. 45*a* of the MS. described under No. 401.

Similar to the above.

Complete.

Beginning :

पञ्चसूनाघनिवृत्तिद्वारा श्रीमहाविष्णुप्रीत्यर्थं वैश्वदेवं करिष्ये—

अग्निं प्रति अदितेऽनुमन्यस्व, देव सवितः प्रसुव । अग्नये स्वाहा—अग्नय इदं न मम । सोमाय स्वाहा—सोमायेदं न मम । विश्वेभ्यो देवेभ्य

स्वाहा—विश्वेभ्यो देवेभ्य इदम् । ध्रुवाय भूमाय स्वाहा—ध्रुवाय भूमाय इदम् ।

End :

अदितेऽन्वमꣳस्थाः . . प्रासावीः ।

नमस्ते गार्हपत्याय नमस्ते दाक्षिणाग्नये ।
नम आहवनीयाय महावेद्यै नमो नमः ॥

No. **3804.** वैश्वदेवविधिः.

VAIŚVADĒVAVIDHIḤ.

Pages, 4. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 885.

On the same subject as that of the above.

Incomplete.

Beginning :

अथ वैश्वदेवं गृही कुर्यात् ।

स्नातको ब्रह्मचारी वा पृथक्पाकी . . . ।
. . . . . प्रकुर्वीत स्त्रीबालौ कारयेद्यथा ॥ इति ॥

यवो दिवास्य प्रारम्भो नात्र . . . .

(य)ज्ञतन्त्रमौपासनवत् । मूर्तिध्यानान्ते पञ्चसूनादिदोषपरिहारद्वारान्नस्य चात्मनश्च संस्कारार्थं देवयज्ञभूतयज्ञपितृ(यज्ञमनुष्ययज्ञब्रह्मय)ज्ञात्मकं वैश्वदेवकर्म करिष्य इति सङ्कल्प्यौपासनं पचनं वा परिसमुह्य, पर्युक्ष्यालङ्कृत्य, सिद्धं हविष्यमधिश्रित्य.

End :

प्राग्ब्रह्मणो बलेर्हृत्वा वरुणायेति मन्त्रतः ।
तस्मादुदक्तु वरुणपुरुषेभ्यो ब(लिं हरेत्) ॥

सोमायेत्यन्तराळस्य हरेरुत्तरतो बलिम् ।
सौम्याद्बलेरुदक्सोमपुरुषेभ्यो बलिं हरेत् ॥

No. 3805. व्यासपूजाविधिः.

VYĀSAPŪJĀVIDHIḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 35*a* of the MS. described under No. 322.

On the worship of Vyāsa.

Incomplete

Beginning:

आषाढ्यां पौर्णमास्यां क्षौरस्नानानन्तरं पादौ प्रक्षाल्याचम्य, गुरोरनुज्ञां लब्ध्वा, गन्धाक्षतादिपूजाङ्गं निधाय, प्राणायामं कृत्वा, प्रणवं षडङ्गन्यासपूर्वकं व्यासपूजां करिष्य इति संकल्प्य सलिलं स्पृशेत् । पीठपूजां कुर्यात्—

आधारशक्त्यै नमः, मूलप्रकृतये नमः ।

End:

मुहूर्तमपि नासीत यत्र धर्मपराङ्मुखाः ।
त्रिकालमेककालं वा पूजयेत् पुरुषोत्तमम् ॥
तेषु मासेषु केशादीन्.

No. 3806. शकलहोमः.

ŚAKALAHOMAḤ.

Pages, 2. Lines, 6 on a page.

Begins on fol. 24*a* of the MS. described under No. 2821.

This forms a part of the Vaiśvadēva ceremony.

Complete.

Beginning:

मम सकलपापनिर्हरणार्थं शकलहोमं करिष्ये ।

देव सवितः प्र सुव इति शकलं पर्युक्ष्य, देवकृतस्ये(स्यै)नसोऽवयजनमसि स्वाहा ।

End:

पुनर्मामै, पुनर्मनः पुनरा, भूर्भुवस्सुवः, ओं भूः, देव सवितः प्रासावीरित्यनुपर्युक्षणम् ॥

Colophon:

इति शकलहोमस्समाप्तः ॥

No. 3807. शयनविधिः.

ŚAYANAVIDHIḤ.

Pages, 2. Lines, 4 on a page.

Begins on fol. 215*a* of the MS. described under No. 2892.

Regarding certain rules as to how one should go to bed.

Complete.

Beginning:

अथ शयनविधिरुच्यते—

कृत्वा(त) पादादिशौचः भुक्त्वा सायं ततो गृहमागच्छेत् ।

शय्यास्फुटीकामेकदारुमयीं सुवः । प्रसङ्गात्पद्प(त्खट्वा)लक्षणमा(ह)- विष्णुः—

नावशाखां न वै भग्नां नासमाङ्गलिनां न च ।
न च तन्तुमयी(यीं)शय्यामभीष्टदनास्मृता ? ॥

End:

अथ मार्कण्डेयः—

सूत्रायमाणमिति न रात्रिसूक्तं जपेद्बुधः ।
देवताया नमस्कारं श्रुत्वास्वापि (कृत्वा स्वप्यात्) सदा बुधः ॥

Colophon:

इति शयनविधिः ॥

No. **3808.** शान्तिकल्पप्रयोगः.

ŚĀNTIKALPAPRAYŌGAḤ.

Pages, 5. Lines, 5 on a page.

Begins on fol. 31*a* of the MS. described under No. 430.

On the details of a pacificatory ceremony intended to avert the evil consequences of a girl attaining puberty or of a child-birth taking place under astrologically inauspicious asterisms.

Complete.

Beginning :

अथातश्शान्तिकल्पविधिं व्याख्यास्यामः—

पुण्याहे दम्पत्योश्चन्द्रताराबलान्विते पूर्वाह्णे दम्पती मङ्गलस्नानं कृत्वा, ब्राह्मणानाहूय[:], प्राङ्मुखमुपवेश्य, पुण्याहं वाचयित्वा, सन(पुनः) प्राणानायम्य, पत्नी दुष्टनक्षत्रे चरणे प्रथमरजस्वला प्रसूतिर्वा(ता वा) यो दोषस्समजाने, तद्दोषपरिहारार्थं तन्नक्षत्राधिदेवतानु(मु)द्दिश्य तन्नक्षत्राधिदेवताप्रीत्यर्थं नक्षत्रदेवताशान्तिकर्म करिष्य इति सङ्कल्प्य, वेदवन्तं कुटुम्बिनं वित्तहीनमाचारवन्तं ब्राह्मणमाचार्यत्वे नियोज्य, एवंलक्षणयुक्तमपरं ब्रह्मत्वे नियोज्य, एवंविधानवशिष्टान् ब्राह्मणानवशिष्टेषु कलशाराधनार्थं चतुरो ब्राह्मणान् नियोज्य.

End :

पङ्गा(ङ्गु)दीनान्धकृपणजनान् यथासम्भवद्रव्येण सन्तर्प्य, शतं पञ्चाशत् पञ्चविंशतिर्वा(तिं) वा ब्राह्मणान् भोजयेदित्याह भगवान् बोधायनः ॥

No. **3809.** शान्तिकल्पप्रयोगः.

ŚĀNTIKALPAPRAYŌGAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 69*a* of the MS. described under No. 3237.

Same work as the above.

Complete.

No. **3810.** शान्तिकल्पप्रयोगः.

ŚĀNTIKALPAPRAYŌGAḤ.

Pages, 8. Lines, 4 on a page.

Begins on fol. 56*a* of the MS. described under No. 3709.

Same work as the above.

Complete.

No. **3811.** शान्तिकल्पप्रयोगः.

ŚĀNTIKALPAPRAYŌGAḤ.

Pages, 18. Lines, 6 on a page.

Begins on fol. 18*a* of the MS. described under No. 3645.

Same work as the above.

Incomplete.

No. **3812.** शिथिलीशान्तिप्रयोगः.

ŚITHILĪŚĀNTIPRAYŌGAḤ.

Pages, 9. Lines, 6 on a page.

Begins on fol. 44*a* of the MS. described under No. 2898.

On the details of a ceremony to be performed with a view to drive away white ants from houses.

Complete.

Beginning :

अथ शिथिलीशान्तिं व्याख्यास्यामः—

बोधायनोक्तमते गृहशि(सी)मां च चतुरश्रं नवभागं कुर्यात् । गृहमध्ये शिथिल(ले)जाते सप्ताहाच्छिवो भवति । अत ऊर्ध्वं व्याधिर्भवति । इन्द्रो देवता । इन्द्रं वो विश्वतस्परि, यत इन्द्र भयामहे इति द्वाभ्यां पलाशान्नाज्यैश्चाष्टोत्तरशतं जुहुयात् ।

End:

रुद्रभूमौ शवसमीपे अस्थिनिक्षेपस्थाने चेत् बहुप्राणिनाशमरणमहाव्याधयो भवन्ति । यमाय सोममिति पलाशाज्यान्नेन हुत्वा व्याहृतिभिस्तिलानष्टोत्तरसहस्रं जुहुयात् ॥

Colophon:

इति बोधायनोक्तशिथिलीशान्तिः ॥

No. **3813.** शूद्रपञ्चसंस्कारप्रयोगः.

ŚŪDRAPAÑCASAMSKĀRAPRAYŌGAḤ.

Pages, 37. Lines, 7 on a page.

Begins on fol. 1*a* of the MS. described under No. 3656.

On the details of how to initiate a Śūdra into the religion of Śrī-Vaiṣṇavas.

Complete.

Beginning:

अथ शूद्रपञ्चसंस्कारप्रयोगं व्याख्यास्यामः—

आचार्यः शुभदिने शुभे नक्षत्रे शुभे मुहूर्ते प्रातः स्वनित्यकर्म समाप्य, नदीतीरे वा स्वगृहे वा सुप्रक्षाळितपाणिपादः स्वाचान्तः शुचौ देशे शिष्येण सह ताम्बूलदक्षिणां गृहीत्वा,

श्रीवैष्णवेभ्यस्सदसि स्थितेभ्यो नमोऽस्तु गुर्वाश्रयणोन्मुखानाम् ।
तापादिकं कर्म करिष्यमाणं शुभावहञ्चास्तु भवत्प्रसादात् ॥

इत्यक्षतैर्ब्राह्मणानभ्यर्च्य, स्वामिनः भवत्पादमूले मया समर्पितामिमां सौवर्णीं यत्किञ्चिद्दक्षिणां यथोक्तदक्षिणामिव स्वीकृत्य एनं भगवद्दासभूतं मम शिष्यमाज्ञानुज्ञाकैङ्कर्ययोग्यतासिध्यर्थं तापादिपञ्चसंस्कारैः संस्कर्तुं योग्यतासिद्धिमनुगृहाण—इत्यनुज्ञाप्य, ताम्बूलदक्षिणादिभिः ब्राह्मणान् परितोषयेत् । ततो दर्भेष्वासीनो दर्भान् धारयमाण आचार्यः प्रणववर्जं

मूलमन्त्रेण पञ्चविंशत्यभ्यस्तेन प्राणानायम्य, श्रीगोविन्देत्याद्यस्यां शुभतिथौ श्रीभगवदाज्ञया श्रीमन्नारायणप्रीत्यर्थमादौ विष्वक्सेनाराधनं करिष्ये इति सङ्कल्प्य, तण्डुलोपि(परि)द्वौ दर्भौ प्राङ्मुखौ निधाय तत्र विष्वक्सेनं सपरिवारमावाहयामि ।

End:

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥

इति चरमश्लोकञ्च उपदिश्य समाराधनञ्चोपदिशेत् । ततः प्राणानायम्य, प्रायश्चित्तहोमं होष्यामीति सङ्कल्प्य, केशवाय नम इत्यादिक्रमेण दामोदराय नम इत्यन्तं हुत्वा, प्राणानायम्य, पूर्णाहुतिं करिष्य इति सङ्कल्प्य, स्रुचि(क्)चन्दनं पुष्पं जातीशलाटुं नाळिकेरशुष्कञ्च निधाय, आज्येनापूर्य, स्रुवेण सञ्छाद्य, समस्तपरिवाराय श्रीमते नारायणाय नम इति हुत्वा, अग्निं पूर्ववत्परिषिच्य, विष्णुब्रह्मोद्वासनञ्च कृत्वा, आवाहितदेवता उद्वास्य—

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

इति सविष्णुमग्निमुपस्थायाचामेत् । ततः शिष्य आचार्यं वस्त्रभूषादिभिस्तोषयित्वा ब्राह्मणान् परितोषयेत् ॥

Colophon:

इति सुदर्शनपाञ्चजन्याङ्कनप्रयोगः ॥

No. **3814.** शूद्रपञ्चसंस्कारप्रयोगः.

ŚŪDRAPAÑCASAMSKĀRAPRAYŌGAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 41*a* of the MS. described under No 3533.

Similar in character to the above.

Complete.

Beginning:

शूद्राणां पञ्चसंस्कारविधिर्वक्ष्यते –

आचार्यस्ताम्बूलं दक्षिणाञ्च गृहीत्वा,

नमोऽस(स)दाचार्यपरम्परे(रा)भ्यो नमो नमो भागवतप्रजाय(भ्यः) ।

नमो नमो . . . . ॥

इत्यनुज्ञाप्य, अमून् शूद्रकुमारकान् पञ्चसंस्कारैस्संस्करिष्यामि इति सङ्कल्प्य, तदङ्गं प्रतिसरबन्धकर्म करिष्य इति सङ्कल्प्य,

रक्ष रक्ष जगन्नाथ रमानाथ दयानिधे ।

विक्रमत्रयविक्रान्तजगत्त्रितय कौतुकम् ॥

इति कौतुकमभिमन्त्र्य.

End:

क्रमेण तत्तदावाहितानुद्वास्य सदस्याञ्च(स्यांश्च) संभावयेत् । शिष्यस्तु गुरून्नत्वा, स्वामित्वो(त्वेन) ध्यात्वा, धनधान्यवस्त्रादिकं यथाशक्ति समर्पयेत् ॥

Colophon:

इति वसिष्ठसंहितायामाचारकाण्डे वसिष्ठशौनकसंवादे शूद्रपञ्चसंस्कारविधिस्समाप्तः ॥

No. **3815.** शूद्रपञ्चसंस्कारप्रयोगः.

ŚŪDRAPAÑCASAMSKĀRAPRAYŌGAḤ.

Substance, palm-leaf. Size, 15 × 1⅛ inches. Pages, 6. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, not very old.

Similar to the above.

Complete.

Begins on fol. 61*a*. The other work herein is Vāsiṣṭhasaṁhitā 1*a*.

Beginning:

अथ शूद्रपञ्चसंस्कारविधिक्रमः—

श्रवणर्क्षे रोहिण्यां वा शुभे दिवसे अन्यस्मिन् हरेर्दिवसे वा शूद्राणां पञ्चसंस्कारं कुर्यात् । अथाचार्यः प्रातः स्वकर्म निवृत्य(र्वर्त्य), पादौ प्रक्षाळ्य, आचम्य, गुरुपरम्परानुसन्धानपूर्वकं दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः शिष्यानाहूय, स्वस्य दक्षिणतो निधाय सताम्बूलदक्षिणाहस्त उत्थाय, अक्षतान् गृहीत्वा ।

श्रीवैष्णवेभ्यस्सदसि स्थितेभ्यो नमोऽस्तु गुर्वाश्रयणोन्मुखानाम् ।

तापादिकं कर्म करिष्यमाणं शुभावहञ्चास्तु भवत्प्रसादात् ॥

इति श्रीवैष्णवेभ्यस्ताम्बूलदाक्षिणां समर्प्य.

End:

श्वेतमृत्स्नया पुण्ड्राणि धारयित्वा, ततः केशवाद्यैर्मन्त्रैर्जुहुयात् । ततः शिष्यस्य नामकरणं कृत्वा, नामहोमं करिष्य इति सङ्कल्प्य, तन्नाम्ना चाग्नौ जुहुयात् । ततो मन्त्रहोमं करिष्य इति सङ्कल्प्य, शरणागतिमन्त्रेण मन्त्ररत्नेन च जुहुयात् । ततः शिष्यस्य द्वयमुपदिश्य, ततो मूलमन्त्रं तारवर्जमुपदिश्य, ततश्चरमश्लोकमुपदिशेत् । यागहोमं करिष्य इति सङ्कल्प्य, द्वयेन मूलमन्त्रेण च जुहुयात् । श्रीभूमिनीळामन्त्रैस्सकृद्धुत्वा यागमुपदिशेत् । सर्वप्रायश्चित्तहोमं करिष्य इति सङ्कल्प्य, समस्तपरिवाराय श्रीमते नारायणाय नम इति प्रायश्चित्ताहुतिं कृत्वाग्निं परिषिच्य, ब्रह्मोद्वासनं कृत्वा, उपस्थाय, आवाहितान् देवान् उद्वास्य तन्त्रशेषं समापयेत् ॥

Colophon:

इति शूद्रपञ्चसंस्कारविधिस्समाप्तः ॥

No. 3816. शूद्रसत्कर्मचन्द्रिका.

ŚŪDRASATKARMACANDRIKĀ.

Pages, 20. Lines, 6 on a page.

Begins on fol 33*a* of the MS. described under No. 2865.

On the ten domestic ceremonies to be conducted in relation to such good Śūdras as have become Śrī-Vaiṣṇavas.

Six Khaṇḍas. Complete.

By Rāmānujayōgin.

Beginning:

वरदं द्विरदाद्रीशं प्रणिपत्य श्रियः पतिम् ।
कुर्वे रामानुजो योगी शूद्रसत्कर्मचन्द्रिकाम् ॥
गर्भादा(धा)नं पुंसवनं सीमन्तं जातकर्म च ।
नामकर्मान्तसंस्कारः चूडोपनयने तथा ॥
विवाहः प्रेतसंस्कारः संस्कारा दशधा स्मृताः ।

इति कश्यपोत्तरसंहिताप्रतिपादितानि सच्छूद्रसत्कर्माणि दशविधानि । शुभे लग्ने

ऋतुस्नातां गुणवतीं पञ्चसंस्कारसंस्कृताम् ।
स्नातामलङ्कृतां शुद्धां स्वभार्यां बन्धुभिस्सह ॥

समानीय गृहं गोमयालिप्तं रङ्गवल्ल्याद्यलङ्कृतं वितानतोरणगन्धपुष्पाक्षतैर्युतं सोपाध्यायैर्ब्राह्मणैर्वैष्णवैश्च संयुतं वेदिकातलमानीय, ब्राह्मणा(न)नुज्ञाप्य, प्राणानायम्य, शुद्धिहोमं सङ्कल्प्य, लौकिकाग्निं समादाय, स्थण्डिलं कल्पयित्वा, परिस्तीर्य, प्राच्यां दिशि स्वाचार्यं दक्षिणस्यां दिशि वैष्णवं च संस्थाप्य, दर्भपात्रेध्मादीन् तूष्णीं प्रोक्ष्य, उत्तरतस्संस्थाप्य.

End:

इति द्वादश हुवेत् । ततः प्रायश्चित्ताहुतिं कृत्वा, विष्णुं ब्राह्मणमुद्वास्य, तण्डुलैर्यवैर्वा सायंप्रातश्चतुराहुतीने(रे)तान्(:) । एवं त्रिदिनं पञ्चदिनं सप्तदिनं वा यथारुचि हावयेत् । अवसानदिने प्रातर्नित्यकर्म समाप्य

प्राणानायम्य, शेषहोमं सङ्कल्प्य, विष्णुं ब्राह्मणमावाह्य, पश्चाहुतिपुरस्सरं नमो नारायणायेति हुत्वा, प्रायश्चित्ताहुतिं हुत्वा, विष्णुं ब्राह्मणमुद्वास्य, त्रिमासं दीक्षितो भूत्वा ततो दीक्षां समापयेत् ॥

Colophon:

इति काश्यपोत्तरसंहितोक्तप्रकारेण सच्छूद्रसत्कर्मचन्द्रिकायां षष्ठः खण्डः ॥

No 3817. शेषहोमप्रयोगः.

ŚĒṢAHŌMAPRAYŌGAḤ.

Pages, 6. Lines, 9 on a page.

Begins on fol. 4*b* of the MS. described under No. 3521.

On the details of a fire-offering to be conducted at the conclusion of the marriage ceremony.

Beginning:

यदहर्भार्यामापतेत् त्रिरात्रमधश्शय्या, ब्रह्मचर्यं, क्षारलवणवर्जनं च; तयोश्शय्यामन्तरेण दण्डो गन्धलिप्तो वाससा सूत्रेण वा परिवीतस्तिष्ठति । तां चतुर्थ्यामपररात्रे उदीर्ष्वातो विश्वावसो नमसेदा(डा)महे त्वा । अन्यामिच्छ प्रभ(फ)र्व्यं सं जायां पत्या सृज ।

End:

यां मलवद्वाससमित्येतानि रजसः प्रादुर्भावात्स्नातामृतुसमावेशन उत्तराभिरभिमन्त्रयेत ।

No. 3818. श्राद्धनिमन्त्रितान्नवमनादिप्रायश्चित्तम्.

ŚRĀDDHANIMANTRITĀNNAVAMANĀDI-PRĀYAŚCITTAM.

Pages, 7. Lines, 6 on a page.

Begins on fol. 15*a* and 22*a* of the MS. described under No. 3672.

On the expiatory processes to be gone through by the guests who are fed on the occasion of Śrāddha ceremonies, if those guests happen to become polluted in any manner or if they vomit the food they take.

Complete.

Beginning:

श्राद्धे निमन्त्रितानां भोजनकाले परस्पर्शे पात्रस्थमन्नं भुक्त्वा भोजनान्ते अष्टशतं गायत्रीजपं कुर्यात्। भोजनकाले अन्योच्छिष्टलेपनस्पर्शे स्पृष्टप्रदेशमन्येन पाणिना प्रक्षाल्य, भोजनान्ते स्नात्वा गायत्रीं त्रिशतं जपेत् ।

* * * *

पिण्डदानात्परमेकस्य द्वयोस्त्रयाणां वा वमने सूक्तजप ए(मे)व प्रतिब्राह्मणं कुर्यात् । प्रयोगदर्पणे तु पितामहस्य प्रपितामहस्य वा वमने पात्रमुद्धृत्य शुद्धिं कृत्वा.

End:

दीपनाशे सूर्यं ध्यायन्तः पाणिभ्यां भोजनपात्रं गृह्णन्तः पुनर्दीपे प्रज्वलिते भोजनपात्रस्थमन्नं भुञ्जीरन् इति प्रयोगदर्पणोक्तं द्रष्टव्यम् ।

पिण्डदानात् प्रागग्निनाशे तद्दिने उपोष्य श्वः पुनः श्राद्धं कुर्यात् ॥

Colophon:

श्राद्धप्रयोगनिमन्त्रितवमने उच्छिष्टप्रायश्चित्तं समाप्तम् ॥

No. **3819.** श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Pages, 35. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 3143.

A work by Gōpāladēśika.

On the details of how to conduct the Śrāddha ceremony.

Complete.

Beginning:

त्रय्यन्तसूरिसिद्धान्तदुग्धसिन्धुसुधाकरम् ।
आत्रेयगोत्रपद्मार्कं श्रीगोपालगुरुं भजे ॥

तात्पर्यदर्शनं गृह्यप्रयोगव्याकृतिं पुनः ।
सुधीविलोचनं वैद्यनाथीयाख्यनिबन्धनम् ॥
प्रयोगदर्पणं चापि समीक्ष्य श्राद्धकर्मणि ।
पुंसां सुखेन बोधार्थं प्रयोगोऽत्र विलिख्यते ॥

पित्रोः प्रत्याब्दिकदिनात्पूर्वं त्रि(श)द्दिनेषु पञ्चदशसु वा अत्यन्ताशक्तौ त्रिषु दिनेषु वा परान्नं क्षौरं च वर्जयित्वा, श्राद्धदिनात्पूर्वदिने दन्तधावनतैलाभ्यञ्जनादि वर्जयित्वा, मध्याह्न एव वस्त्रशोधनादि कृत्वा, आतपे शुष्कीकृत्य, श्राद्धप्रदे(शं)गोमयादिनोपलिप्य, तत्र भोजनादि वर्जयित्वा, रात्रौ सायमौपासनं कृत्वा, कृतसायमाशान् श्वित्रादिदोषरहितान् यथोक्तगुणसम्पन्नान् निमन्त्रयेत् ।

End:

सर्वस्मादन्नात् किञ्चित्किञ्चिदादाय, उपवीती—

“प्राणे निविष्टोऽमृतं जुहोमि । ब्रह्मणि म आत्मामृतत्वाय” इति ग्रासावरार्धं प्राश्याचम्य, पुत्रक(ा)मिन्यां मध्यमं पिण्डम् “आधत्त पितरो गर्भं कुमारम् । यथेह पुरुषोऽसत्” इति मन्त्रेणारोगिण्यै पुत्रजननयोग्यायै पत्न्यै दद्यात् । ततः पिण्डान् ब्रह्मचारिणे गोभ्यो वा दद्यात् । अप्सु वा प्रक्षिपेत् । एवं श्राद्धं कृत्वा, उक्तनियमादियुक्तं स्थित्वापरेद्युः श्राद्धाङ्गतर्पणमपि कुर्यात् ॥

Colophon:

इति श्रीमद्गोपालसूरीन्द्रकृता(तः) प्रपन्नश्राद्धप्रयोगस्समाप्तः ॥

No. **3820.** श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Pages, 28. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3672.

Same work as the above.

Complete.

No. 3821. श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Pages, 57. Lines, 6 on a page.

Begins on fol. 1*a* of the MS. described under No. 3633.

Similar to the above.

Complete.

Beginning:

पवित्रवन्त इत्याद्यनयोर्ब्रह्मा बृहस्पतिर्जगति(ती); आभ्यां पवित्रधारणे विनियोगः । पवित्रवन्तः परिवाजमासते । पितैषां प्रत्नो अभिरक्षति व्रतम् । महस्समुद्रं वरुणास्तिरोदधे । धीरा युञ्चे(इच्छे)कुर्धरणी(रुणे)ष्वारभम् । पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते । श्रि(शृ)तास इद्वहन्तस्तत्समासत । दैवी गायत्रीच्छन्दः, प्राणायामे विनियोगः ।

* * * *

ब्रह्मदण्डार्थं किंचिद्धिरण्यं तिलकुशयवान् गृहीत्वा,
समस्तसंपत्समवाप्तिहेतवः . . . . पांसवः ॥
सर्वेभ्यो ब्राह्मणेभ्यो नमः ।

आधिव्याधिहरं नणां मृत्युदारिद्र(द्र्य)नाशनम् ।
श्रीपुष्टिकीर्तनं(र्तिदं) वन्दे विप्रश्रीपादपङ्कजम् ॥

* * * *

प्राचीनावीती, यजमानस्य पितुः प्रतिसांवत्सरिकमृताहान्नश्राद्धं कर्तुं मुख्यकालो भूत्वा(यात्) यजमानस्याधिकारसम्पदास्त्विति भवन्तो ब्रुवन्तु । अधिकारसम्पदस्तु ।

सव्येन प्राणानायम्य.

End:

आब्रह्मस्तम्भपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरस्सर्वे मातृमातामहादयः ॥

अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ।
आ ब्रह्मभवनाल्लोकादिदमस्तु तिलोदकम् ॥
ये के चास्मत्कुले जाता अपुत्रा गोत्रजा मृताः ।
ते गृह्णन्तु मया दत्तं सू(व)स्त्रनिष्पीडनोदकम् ॥

No. 3822. श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Pages, 42. Lines, 6 on a page.

Begins on fol. 30*a* of the MS. described under No. 1183.

According to Āpastamba.

Similar to the above in subject matter.

Complete.

Beginning:

ऋध्यास्म हव्यैर्नमसोपसद्य । दीर्घायुष्यमस्तु; उत्तरोत्तराभिवृद्धिरस्तु ।

ओन्नमस्सदसे नमस्सदसस्पतये . . . सर्वेभ्यो ब्राह्मणेभ्यो नमः । अशेषे हे परिषत् . योग्यतासिद्धिमनुगृहाण ।

यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

* * * *

पादौ प्रक्षाल्याचम्य, गोत्रस्य शर्मणः मम पितुः प्रत्याब्दिकश्राद्धं भवति । तत्राहवनीयार्थे भवद्भिः प्रसादः करणीयः । करिष्याम इति प्रतिवचनम् । प्राचीनावीतम्, ओं

समस्तसंपत् . . . . . . पांसवः ॥

End:

भगवानेव स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषितैकरसेनानेन जन्मना स्वकीयैश्चोपकरणैः स्वाराधनायैकप्रयोजनाय परमपुरुषस्सर्वशेषी श्रियः पतिः स्वस्मै (स्व)प्रीतये स्वशेषभूतमिदं मम पितुः प्रत्याब्दिकश्राद्धाख्यं कर्म भगवान् स्वप्रीतये स्वयमेव कारितवान् ॥

No. 3823. श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Pages, 40. Lines, 5 on a page. Character, Grantha. Condition, much injured.

Begins on fol. 1*a* of the MS. described under No. 3632.

Similar to the above.

Complete.

Beginning:

स्नात्वा, माध्याह्निकं कृत्वा, पादौ प्रक्षाल्य, द्विराचम्य, तिलाक्षतात् गृहीत्वा प्राचीनावीती,

समस्तसंपत्समवाप्तिहेतवः . . . पांसवः ॥

उपवीती, देवेभ्यो नमः; प्राचीनावीती, अस्मत्पितृपितामहप्रपितामहेभ्यो नमः; उपवीती, श्राद्धसंरक्षकश्रीमहाविष्णवे नमः। प्राचीनावीती,

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।

नमस्स्वधायै स्वाहायै नित्यमेव नमो नमः ॥

End:

आत्मसमारोपणं करिष्ये—

या ते अग्ने यज्ञिया तनूस्तयेह्यारोहात्मात्मानम् । अच्छा वसूनि कृण्वन्नस्मे नर्या पुरूणि । यज्ञो भूत्वा यज्ञमासीद स्वां योनिम् । जातवेदो भुव आ जायमानस्स क्षय एहि . . . . . .

परेऽहनि कर्तव्यं सद्यस्तिलतर्पणं करिष्ये — तर्पणं कृत्वा, उपवीती, आचम्य ॥

No. 3824. श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Pages, 62. Lines, 5 on a page.

Begins on fol. 1*a* of the MS. described under No. 3634.

Similar to the above.

Complete.

Beginning:

समस्तसंपत्समवाप्तिहेतवस्समुत्थितापत्कुलधूमकेतवः ।

अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ॥

आपद्घनध्वान्तसहस्रभानवस्समीहितार्थार्पणकामधेनवः ।

समस्ततीर्थाम्बुपवित्रमूर्तयो रक्षन्तु मां ब्राह्मणपादपांसवः ॥

सर्वेभ्यो ब्राह्मणेभ्यो नमः ।

आधिव्याधिहरं नृणां मृत्युदारिद्र्यनाशनम् ।

श्रीविष्णु(पुष्टि)कीर्तनं(तिदं) वन्दे विप्रश्रीपादपङ्कजम् ॥

विप्रौघदर्शनात् सद्यः क्षीयन्ते पापराशयः ।

वन्दनान्मङ्गलावाप्तिरर्चनादच्युतं पदम् ॥

नमो ब्रह्मण्यदेवाय, यावतीर्वै देवतास्तास्सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवेदिवे नमस्कुर्यान्नाश्लीलं कीर्तयेत्(ए)ता (देता एव) देवताः प्रीणाति । यजमानस्य पितुः प्रतिसांवत्सरिकमृता(हा)न्नश्राद्धं कर्तुं . . भवन्तो महान्तोऽनुगृह्णन्तु । प्राणानायम्य, संकल्प्य.

End:

साधु वासाधु (वा) कर्म यद्यदाचरितं मया ।

तत् सर्वं भगवन् विष्णो गृहाणाराधनं परम् ॥

अनादरमतिक्रम्य नमस्कारन्तु(रादि)पूर्वकम् ।

उभयोः करमुत्थाय(प्य) आसीमान्तमनुव्रजेत् ॥

No. 3825. श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Substance, paper. Size, 7 × $4\frac{5}{8}$ inches. Pages, 32. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, old.

Copying is said to have been completed at Vallam on Monday, the 7th of the first half of Āśvija in the year Manmatha.

Same work as the above.

No. 3826. श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Substance, palm-leaf. Size, $11\frac{1}{4} \times 1\frac{3}{8}$ inches. Pages, 19. Lines, 9 on a page. Character, Grantha. Condition, good. Appearance, old.

Begins on fol. 1*a*. The other works herein are Navagrahavidhi 11*a*, Sthālīpāka 14*a*, Rāmakṛṣṇapūjā 17*a*, Saundaryalaharī 19*a*.

Similar to the above.

Incomplete.

Beginning:

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च ।
नमस्स्वधायै स्वाहायै नित्यमेव नमो नमः ॥

एवं त्रिः पुरूरवा(वोमा)द्रवसङ्झि(स्संज्ञि)क(केभ्यो)विश्वेभ्यो देवेभ्यो नमः ।

End:

स्वामिनः यथाशक्ति राक्षोघ्नान् पित्रिया(न्या)न् वैष्णवा(न)न्यांश्च धर्मेतिहासपुराणानि च . . . श्रावयिष्ये । स्वामिनः वसिष्ठ . तथा रक्षध्वम् ॥

No. 3827. श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Substance, palm-leaf. Size, $16\frac{1}{2} \times 1\frac{1}{4}$ inches. Pages, 46. Lines, 6 on a page. Character, Grantha. Condition, good. Appearance, old.

Similar to the above.

Some leaves are lost in the middle.

Incomplete.

Beginning:

ओन्नमस्सदसे नमस्सदसस्पतये नमस्सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्यै । सप्रथ सभां मे गोपाय । ये च सभ्यास्सभासदः । तानिन्द्रियावतः कुरु । सर्वमायुरुपासताम् ।

* * * *

अनेन प्रातरौपासनाख्यकर्मणा भगवान् प्रीयतां श्रीनरसिंहः । सर्वं श्रीकृष्णार्पणमस्तु.

उपवीती—गोत्रस्य शर्मणः यजमानस्य पितुः अद्यास्मिन् प्रत्याब्दिकश्राद्धे पुरो(रू)रव(वो)माद्रवस्संज्ञिकविश्वदेवाः अत्र भवद्भिः प्रसादः करणीयः । करिष्यामः—इति प्रतिवचनम् । प्राचीनावीती—गोत्रस्य . . करणीयः । उपवीती—गोत्रस्य . . . ओं प्राचीनावीती—कर्ता तिलाक्षतान् गृहीत्वा,

समस्तसंपत्समवाप्तिहेतवः

End:

मार्जयन्तां मम मातरः, मार्जयन्तां मम पितामह्यः, मार्जयन्तां मम प्रपितामह्यः, ये च गोत्रे(वोऽत्र)ये चास्माश्वा(स्वाशंसन्ते).

No. 3828. श्राद्धप्रयोगः.

ŚRĀDDHAPRAYŌGAḤ.

Pages, 18. Lines, 6 on a page.

Begins on fol. 48*a* of the MS. described under No. 2765.

It contains at the end Vaiśvadēvaviṣaya and Bhānuvāravrata.

Similar to the above.

Incomplete.

Beginning:

त्र्यन्तसूरिसिद्धान्तदुग्धसिन्धुसुधाकरम् ।
आत्रेयगोत्रपद्मार्कं श्रीगोपालगुरुं भजे ॥
तात्पर्यदर्शनं गृह्यप्रयोगव्याकृतिं पुनः ।
सुधीविलोचनं वैद्यनाथार्यीयनिबन्धनम् ॥
प्रयोगदर्पणञ्चापि समीक्ष्य श्राद्धकर्मणः ।
पुंसां सुखेन बोधार्थं प्रयोगोऽत्र विलिख्यते ॥

प्रथममुपवीती देवार्थं ब्राह्मणान् पादावुपसंगृह्य, श्वः श्राद्धं भविता; तत्राहवनीयार्थे भवद्भिः प्रसादः करणीय इति देवार्थे द्वौ एकं वा निमन्त्र्य.

अक्रोधनैश्शौचपरैस्सततं ब्रह्मचारिभिः ।
भवितव्यं भवद्भिश्च मया च श्राद्धकारिणा ॥

End:

परिधिप्रहरं कुर्यात् शम्या एवेति केचन ॥
विवाहे सरबन्धे तु ब्रह्मग्रन्थे ततः परम् ।
इतरेषु च सर्वत्र सङ्कल्पानन्तरं स्मृतम् ॥
कन्यादाने पितुः श्राद्धे अध्वरे सोमदर्शने ।
भार्या दक्षिणतस्तिष्ठेत् विप्रपादाभिषेचने ॥

No. **3829.** श्राद्धीयपिण्डनिक्षेपक्रमकारिका.

ŚRĀDDHĪYAPIṆḌANIKṢEPAKRAMAKĀRIKĀ.

Pages, 9. Lines, 8 on a page.

Begins on fol 94*a* of the MS. described under No. 3680.

Verses relating to the offering of food in a small lump to the manes of departed ancestors on the occasion of the various Śrāddha ceremonies.

Complete.

Beginning:

पितॄणां पश्चिमे भागे मातृपिण्डं यथाक्रमम् ।
मातामहानान्तत्पूर्वमात्मपत्न्यास्तदुत्तरे ॥
सुतभ्रातृपितृव्याणां पिण्डन्दद्यात्तदुत्तरे ।
पृ(पि)तृमातामहा मध्ये मातुलानां सभार्यकम् ॥
दुहिता सर्वकारुण्ये शेषन्दक्षिणतो दिशि ।

End:

यमद्वारे(र)पथे घोरे पथि मातुश्च सेचनम् ।
तस्य नि क्रमणार्थाय मातृपिण्डन्ददाम्यहम् ॥

No. **3830.** श्रीचूर्णप्रतिष्ठाविधिः.

ŚRĪCŪRṆAPRATIṢṬHĀVIDHIḤ.

Pages, 2. Lines, 9 on a page.

Begins on fol. 88*a* of the MS. described under **No.** 2833.

On a preliminary ceremony connected with the funeral rites of Śrī-Vaiṣṇavas.

Complete.

Beginning:

. . . . दिवर्जिताम् ।

सुवर्णां सुदृढां श्लक्ष्णां रक्तां हरिद्रामादाय, खण्डशः कृत्वा, तुलसीदलानि मूलमन्त्रेण सङ्गृह्य, ... कर्पूरं कस्तूरीं काश्मीरं स्वर्णचूर्णं च सङ्गृह्य, मूलमन्त्रेण उलूखलं मुसलं च प्रक्षाल्य, गन्धपुष्पधूपदीपादिभिरभ्यर्च्य, तयोश्चूतपल्लवमाबध्य, अथ महाद्भिः श्रीवैष्णवैस्सह तुलसीचन्दनस्वर्णचूर्णकुङ्कुमादिमिश्रितां हरिद्राम्.

End:

देवगात्रे तद्दिनं चूर्णं संस्थापयेत् । प्रभाते भगवन्तं संपूज्य, चूर्णं पात्रान्तरे गृहीत्वा, आचार्यमु(खे)भ्यः किञ्चित्प्रदापयेत् ॥

Colophon:

इति खगेश्वरसंहिताप्रोक्तश्रीचूर्णप्रतिष्ठाविधिः ॥

No. **3831.** श्रीशैलसङ्कल्पः.

ŚRĪŚAILASAṄKALPAḤ.

Substance, palm-leaf. Size, $15\frac{1}{2} \times 1\frac{3}{8}$ inches. Pages, 9. Lines, 6 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 30*a*. The other works herein are Śivakarṇāmṛta 1*a*, Gītāsāra 35*a*, Agastyāṣṭaka 40*b*.

A form of vow to be taken in connection with the gift of a maiden in marriage, and in worshipful meditation of Śiva as dwelling on the hill of Śrī-śaila.

Complete.

Beginning:

अस्य श्रीमदादिदेवस्य सच्चिदानन्दविग्रहस्य भगवतः परब्रह्मणः सकलजगदुपादानभूतविराडूपाधिष्ठितसदसद्विलक्षणप्रपञ्चबाह्याभ्यन्तरपरिपूर्णसच्चिदानन्दनित्यनिरतिशयानन्दकन्दलितस्य श्रीशैलशिखराग्रसिंहासनासीनस्य मध्यमध्यासीनस्य राजधानीसहस्रेषु मुख्यतमे . . . .

* * * *

श्रीशैले अर्धनारीश्वरमराम्बापरमेश्वरीसप्तकोटिमहाशक्तिस्थानानां सप्तमपीठस्य, कोल्लापुरीमहालक्ष्मी.

End:

दशपूर्वेषां दशापरेषां मद्वंश्यानां मया सह नरकादुत्तीर्य शिवलोके निवाससिद्ध्यर्थं सालंकृतकन्यादानं करिष्ये ॥

Colophon:

इति श्रीशैलसङ्कल्पम्(:) ॥

No. **3832.** श्रीसूक्तादिमन्त्रानुष्ठानम्.

ŚRĪSŪKTĀDIMANTRĀNUṢṬHĀNAM.

Substance, palm-leaf. Size, $10\frac{3}{4} \times 8\frac{1}{8}$ inches. Pages, 6. Lines, 18 on a page. Character, Telugu. Condition, good. Appearance, new.

Begins on fol. 61*a*. The other works herein are Kālikāgama 1*a*, Hōmavidhāna 58*a*, Paraśurāmasūtram 131*a*.

On how to repeat ceremonially the hymn known as Śrī-sūkta.

Complete.

Beginning:

अस्य श्रीहिरण्यवर्णामिति लक्ष्मीपञ्चदशर्चश्रीसूक्तमन्त्रस्य सहस्रशीर्षेत्यादिनारायणमहाषोडशर्चमहामन्त्रस्य च, आनन्दकर्दमचिक्लीतप्रजापत्याङ्गिरसा नारायणा ऋषयः, आद्यास्तिस्रोऽनुष्टुभः, महापुरुषसूक्तस्यानुष्टुप् छन्दः, कांसो बृहती, पश्चात् द्वे त्रिष्टुभौ, ततः पश्चादष्टानुष्टुभः, एका प्रस्तारपङ्क्तिश्छन्दः, श्रीराज्ञि(ग्यौ) स्यातां देवते.

* * * *

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो ममावह ॥

सहस्रशीर्षा पुरुषस्सहस्राक्षस्सहस्रपात् ।
स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥

End:

अन्तस्समुद्रे ततो वितिष्ठे । भुवनानु(नि)विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि । अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा । परो दिवा पर एना पृथिव्यै तावति महीना संबभूव ॥

Colophon:

इति श्रीसूक्तं संपूर्णम् ॥

No. **3833.** श्रौतस्मार्तकर्मप्रयोगविवेचनम्.

ŚRAUTASMĀRTAKARMAPRAYŌGAVIVECANAM.

Substance, palm-leaf. Size, $17\frac{1}{8} \times 1\frac{3}{8}$ inches. Pages, 120. Lines, 6 on a page. Character, Telugu. Condition, injured. Appearance, new.

On details connected the performance of various Śrauta and Smārta ceremonies.

Incomplete.

Beginning:

द्वे दर्व्यौ वा द्वौ स्रुवौ वेति केचित्प्राहुः स्थालीपाककर्मादिषु स ।

आज्यग्रहणसामर्थ्यं न दर्व्यास्संभवत्यथ ।
हविर्धारणसामर्थ्यं स्रुवस्य तु न सिध्यति ॥

* * * *

शक्त्यभावात् ग्रहीतुमाज्यं हव्यं भर्तुमेव स्रुवस्य.

End:

पित्रोर्मृताहो यदि चेत् कुहूदिने ह्यादौ मृताहं कुतु(त)पे समारभेत् ।
श्राद्धं समाप्याथ पितृक्रतुस्ततोऽमाश्राद्धमित्युक्तमनाहिताग्निभिः ॥

No. **3834.** षष्टिपूर्तिविधानम्.

ṢAṢṬIPŪRTIVIDHĀNAM.

Pages, 2. Lines, 6 on a page.

Begins on fol. 15*a* of the MS. described under No. 3533.

On the conduct of a ceremony to be performed when a man becomes just sixty years old.

Complete.

Beginning:

शौनकीये—

अथातः षष्टिपूर्तिविधिं व्याख्यास्यामः—

यस्य पुरुषस्य जननमारभ्य षष्टिवर्षाणि परिगण्य(न्ते), षष्टितमे वर्षे स जन्मनक्षत्रे शान्तिं कुर्यात् । यजमानः मङ्गलस्नानं कृत्वा, जन्मवर्षमारभ्य षष्टितमवर्षपर्यन्तं मनोवाक्का(या)दिभिः . . . . प्राजापत्यकृच्छ्रत्रयं कृत्वा, आचार्यवरणं कृत्वा, ऋत्विजो वृत्वानुग्रहं कारयित्वा.

End:

जयादि ब्रह्मोद्वासनान्तं कृत्वाचार्योपस्थानमाचर्य, प्रतिमां दत्वा, आचार्यं वस्त्रकुण्डलाभरणैस्सम्पूज्य, ऋत्विग्भिस्सह ब्राह्मणैस्सम्पूज्य, गन्धाक्षतताम्बूलदक्षिणाश्च दद्यात् ॥

Colophon:

षष्टिपूर्तिविधिस्समाप्तः ॥

No. **3835.** षोडशकर्मप्रयोगः.

ṢŌḌAŚAKARMAPRAYŌGAḤ.

Substance, palm-leaf. Size, $9\frac{3}{4} \times 1\frac{3}{8}$ inches. Pages, 262. Lines, 9 on a page. Character, Nandināgarī. Condition, injured. Appearance, old.

On the sixteen ceremonies to be conducted by a householder.

Incomplete.

Beginning:

उच्यन्ते—

पुण्याहं कर्मणः पूर्वेद्युः पुंसवने च सीमन्तोन्नयनचौळोपनयने गौ(गो)दानस्नान उद्वाहे नान्दीश्राद्धं परे दिने उपाकरणे नैमित्तिके ग्रह- शांन्त्यौ(न्त्यां)स्नातकव्रते गर्भाधाने जातकर्मणि सद्यः कर्ता स्नात्वालङ्कृत्य, धान्यकलशोपरि पूर्णकलशद्वयं संस्थाप्य.

* * * *

अभ्युदयार्थञ्च महाजनैस्सह पुण्याहवाचनङ्करिष्ये ।

End:

अग्न आयूंषि पवस इति तृचं पठित्वा, अग्ने त्वन्न इति द्वाभ्यां बन्धुस्सुबन्धुर्विश्वे देवा गायत्री, अग्ने त्वन्नः, प्रजापते, हिरण्यगर्भः, प्रजापतिस्त्रिष्टुप् प्रजापते, तन्तुं तन्वन्, हिरण्यगर्भः समवर्तताग्रे, ओञ्चम इति पठित्वा ॥

Colophon:

इति सायमुपस्थानम् ॥

No. 3836. संक्रमस्नानविधानम्.

SAṀKRAMASNĀNAVIDHĀNAM.

Pages, 3. Lines, 8 on a page.

Begins on fol. 54*a* of the MS. described under No. 3546.

On the ceremonial bath connected with the passage of the sun from sign to sign in the zodiacal circle.

Incomplete.

Beginning:

रात्रौ स्नानं प्रकुर्वीत दानञ्चैव विशेषतः ।
नैमित्तिकन्तु कुर्वीत स्नानन्दानञ्च रात्रिषु ॥

* * * *

वृद्धगार्ग्योऽपि—

यदास्तमयवेळायां मकरं याति भास्करः ।
प्रदोषे वार्धरात्रे (वा) स्नानन्दानं परेऽहनि ॥

End:

रात्रौ सङ्क्रमणे पुण्यं दिनार्धं स्नानदानयोः इति विधानात् विकल्प इति कालादर्शानुसारिण आहुः । उक्तस्य स्नानदानादेरुक्तेष्वपि कालेषु विशेषमाह शातातपः ।

No. 3837. संप्रोक्षणप्रयोगविधिः.

SAṀPRŌKṢAṆAPRAYŌGAVIDHIḤ.

Pages, 7. Lines, 6 on a page.

Begins on fol. 8*a* of the MS. described under No. 3517.

On the process of sanctifying by means of sprinkling hallowed water.

Complete.

Beginning:

सम्प्रोक्षणदिनात्पूर्वं पञ्चमे दिने सप्तमे दिने वा कञ्चित् सुश्रोत्रियमाचार्यं वृणुयात् । तत आचार्यः स्नात्वा प्रयतः महाजनैर . . . . नमस्सखीनां पुरोगाणां चक्षुषे नमो दिवे नमः पृथिव्यै । सप्रथ सभां मे गोपाय । . . . .

यथोक्तदक्षिणामिव स्वीकृत्य, अस्य देवदेवस्य भगवतो नारायणस्य श्रीभूनीळासमेतस्य नित्यसूरिभिर्भागवतैश्च सहितस्य सम्प्रोक्षणक . . . .

सुमुहूर्तोऽस्त्वित्यनुगृहाणेति प्रार्थ्य, दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः प्राणानायम्य ।

End :

सम्प्रोक्षणकर्माङ्गं पुरुषसूक्तषोडशर्ग्भिराज्याहुतीर्होष्यामीति द्रव्याज्यं गृहीत्वा प्रत्यृचं जुहुयात् । प्राणायामं प्रायश्चित्तं सर्वप्रायश्चित्तं पूर्णाहुतिञ्च हुत्वा, अग्निमुपस्थाय प्रणमेत् । ततश्शिष्यो गुरवे दक्षिणां दत्वा ब्राह्मणान् भोजयेत् ॥

Colophon :

इति संप्रोक्षणप्रयोगः ॥

No. **3838.** संस्कारनिर्णयः.

SAṀSKĀRANIRṆAYAḤ.

Substance, palm-leaf. Size, 13$\frac{5}{8}$ × 1$\frac{1}{4}$ inches. Pages, 118. Lines, 7 on a page. Character, Grantha. Condition, injured. Appearance, old.

Up to Dvibhāryāgnisandhānam.

A work by Candracūda, son of Bhaṭamāṇabhaṭṭa, son of Paurāṇika Dharmabhaṭṭa.

Regarding the conduct of the various domestic ceremonies.

Incomplete.

Beginning :

तत्र युग्मासु सकृत् सकृदेव गमनं कुर्यात् ।

तथाह याज्ञवल्क्यः—

सुस्थ इन्दौ सकृत् पुत्रं लक्षण्यं जनयेत् पुमान् ।

गृह्ये चतुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां युग्मां प्रजानिश्रेयसमृतुगमनमित्युपदिशन्ति । व्यासोऽपि—

रात्रौ चतुर्थ्यां पुत्रस्स्यादल्पायुर्धनवर्जितः ।
पञ्चम्यां पुत्रिणो(णी)नारी षष्ठ्यां पुत्रस्तु मध्यमः ॥

* * * *

स्मृत्यन्तरे—

प्रेतवाहोदधिस्नानं वपनं पिण्डपालनम् ।
विदेशगमनञ्चैव न कुर्याद्गर्भिणीपतिः ॥

Colophon :

इति संस्कारनिर्णये गर्भिणीतत्पतिधर्माः ॥

End :

त्रिरावर्तनीयम् । अन्ते ब्राह्मणान् भोजयित्वाशिषो वाचयेत् ॥

Colophon :

इति संस्कारनिर्णये प्रत्यवरोहणम् ॥

No. **3839.** सन्ध्यावन्दनम्.

SANDHYĀVANDANAM.

Pages, 31. Lines, 6 on a page.

Begins on fol. 23*a* of the MS. described under No. 3556.

On the process of offering the morning and the evening prayers to the gods.

Incomplete.

Beginning :

आचमनम्—

भूम्यादिऊ(देरू)र्ध्वलोकस्य उपर्यास्ते दिवाकरः ।
दशप्रणवसंयुक्तं त्रिरावृत्ति पुनः पुनः ॥
अङ्गुळ्यग्रैर्नासिकाग्रं सम्पीडय्य पापनाशनम् ।
प्राणायाममिदं प्रोक्तमृषिभिः परिकल्पितम् ॥

समस्तपापक्षयार्थं प्रातस्सन्ध्या(मा)चरिष्ये नमः; माध्याह्निकमाचरिष्ये नमः; सायंसन्ध्यामाचरिष्ये नमः । प्रोक्षणमन्त्रम्(ः)—

सर्वतीर्थसमुद्भूतं पापानां पापनाशनम् ।
आपश्शरीरसंशुद्धिं कुर्वन्तु मम सर्वदा ॥
इति प्रोक्ष्य.

End:

इन्द्राद्यष्टदिक्पालकाय नमः, सर्वऋषिभ्यो नमः । गोत्रं वेङ्कटेश-गुप्तमभिवर्धताम् . . . .
कर्मणा मनसा वाचा पादमेहनपाणिना ।
यत्कृतं निखिलं पापं सत्ये सर्वं जुहोमीति नमः ॥
आचमनमच्युतानन्दगोविन्द; केशवनारायणेत्यादितर्पणम्; केशवं तर्पणं नम इत्यादि ॥

No. 3840. सन्ध्यावन्दनमन्त्रर्षिच्छन्दोदेवताः.

SANDYĀVANDANAMANTRARṢICCHANDŌDĒVATĀḤ.

Pages, 6. Lines, 6 on a page.

Begins on fol. 65*a* of the MS. described under No. 3302.

On the Ṛṣi, Mantra, Chandas and Dēvatā of the Vedic hymns used in connection with the morning and the evening prayers.

Complete.

Beginning:

आपो हि ष्ठेति मन्त्रस्य सिन्धुद्वीप ऋषिः, गायत्री छन्दः, आपो देवता, शिरःप्रोक्षणे विनियोगः । दधि क्राव्णेत्यनुवाकस्य वामदेव ऋषिः, अनुष्टुप् छन्दः, विश्वे देवा देवता, दधिक्रावेति केचित् . . . एतैर्मन्त्रैर्हृदयादिषडङ्गन्यासं कृत्वा, ध्यानम्.

End:

ओं नारायणाय मध्यमाभ्यां नमः, ओं ओं अनामिकाभ्यां नमः, ओं नमः कनिष्ठिकाभ्यां नमः, ओं नारायणाय करतलकरपृष्ठाभ्यां नमः ॥

No. 3841. सन्न्यासविधिः.

SANNYĀSAVIDHIḤ.

Pages, 8. Lines, 8 on a page.

Begins on fol. 110*a* of the MS. described under No. 2786.

By Aḻagiyamaṇavālajīyar.

The owner of the book is said to be Aḻagiyamaṇavālajīyar.

On how to adopt the vow of religious asceticism.

Complete.

Beginning:

अथ सन्न्यासविधिर्लिख्यते—

पुनश्चरणत्वेन कृच्छ्रचतुष्टयं कृत्वा, उत्तरायणे शुक्लद्वादश्यां पौर्णमा[वा]स्यां वा स्नानानुष्ठानानन्तरं प्राङ्मुखो दर्भेष्वासीन आचम्य, विष्वक्सेनं संपूज्य ।

End:

इदं (ऋतं) च सत्यं चापीद्धात्तपसोऽध्यजायत . . अघो सुव इति मन्त्रेण वाघमर्षणस्नानं कृत्वा, षोडश प्राणायामान् कृत्वा, उत्तीर्य जपे प्रक्षालयेत् । इदमस्य क्रतोरवभृथस्नानम् । अतः परं यतिधर्मोऽनुष्ठेयः ॥
समाप्तस्सन्न्यासविधिः ॥
ब्रह्मचारिणां चाग्निसमारोपः ॥

Colophon:

इति सन्न्यासविधिप्रयोगस्समाप्तः ॥

No. 3842. समावर्तनसङ्कल्पः.

SAMĀVARTANASAṄKALPAḤ.

Pages, 5. Lines, 6 on a page.

Begins on fol. 44*a* of the MS. described under No. 3511.

On how to begin the ceremony with which the vow of student-life is concluded before entering upon the married life.

Incomplete.

Beginning :

समावर्तनसङ्कल्पः—

अस्यां तिथौ विशेषेण मम उपनयनादारभ्य व्रतसमावर्तनशुभलग्न-पर्यन्तमुपनयनकाले आचार्योपदिष्टानां यथोक्तशौच.

End :

